दिखाया जाय वह विपक्ष है ( सरोवर )। जिसमे ये तीनो लक्षण मिले वही सम्यक् हेतु है। जैसे इस पर्वत पर अग्नि नहीं होती वहाँ धूम भी नहीं होता, जैसे सरोवर। हेतु का यह लक्षण असिद्ध, विरुद्ध और अनैकान्तिक दोषों से विरहित है। अतः त्रैरूप्य ही हेतु का निर्दोष स्वरूप है।[1]

अनुमान के दो भेद हैं—स्वार्थानुमान और परार्थानुमान। स्वार्थानुमान वह ज्ञान है जो निश्चित साधन के द्वारा साध्य का ज्ञान कराये और परार्थानुमान वह ज्ञान है जो अविनाभावी साध्यसाधन के वचनों से साध्य का ज्ञान कराये। इस परिभाषा के आधार पर स्वार्थानुमान को ज्ञानात्मक और परार्थानुमाम को शब्दात्मक कहा जा सकता है। स्वार्थानुमान के तीन अंग है—धर्मी, साध्य और साधन। धर्मी को पक्ष भी कहा जाता है।

उपर्युक्त हेतु के स्वरूप को नैयायिक पञ्चरूप वाला मानते है—पक्षधर्मत्व, सपक्षसत्व, विपक्षव्यावृत्ति, अबाधित-विषयत्व और असत्प्रतिपक्षत्व। त्रैरूप्यवादी बौद्ध हेतु के इस पञ्चरूप मे से अबाधित-विषयत्व और असत्प्रतिपक्षत्व को अनावश्यक मानते है। तथा अविनाभाव को तादात्म्य और तदुत्पत्ति से नियत बताते हैं। वहाँ हेतु के तीन भेद कहे गये है—स्वभाव हेतु, कार्य हेतु और अनुपलब्धि हेतु। प्रथम दो हेतु विधिसाधक है और अन्तिम हेतु प्रतिषेध साधक हैं। जैन दर्शन मे हेतु के स्वभाव, व्यापक, कार्य, कारण, पूर्वचर, उत्तरचर और सहचर भेद किये गये है। जैन दर्शन मे अकलंक ने हेतु के सामान्यतः दो भेद किये है—उपलब्धिरूप और अनुपलब्धिरूप। ये हेतु विधेयात्मक और प्रतिषेधात्मक होते है। उनमें प्रत्येक के ६ भेद है—स्वभाव, कार्य, कारण, पूर्वचर, उत्तरचर और सहचर। बौद्धदर्शन मे स्वभाव और कार्य ये दो ही भेद स्वीकार किये गये है। जैनदर्शन में हेतु का एक ही रूप माना गया है—अविनाभाव नियम। उसके दो भेद है—सहभाव नियम और क्रमभाव नियम।

न्याय दर्शन में परार्थानुमान के पाँच अवयव माने जाते है—प्रतिज्ञा, हेतु, उदाहरण, उपनय और निगमन। इनमें जैन दर्शन मे प्रतिज्ञा और हेतु को आवश्यक माना गया है। परन्तु बौद्ध दर्शन केवल हेतु के प्रयोग को ही आवश्यक मानता है। उनके अनुसार पक्ष का प्रयोग निष्प्रयोजन है। मात्र हेतु के प्रयोग से ही गम्यमान पक्ष मे साध्य का ज्ञान हो जाता है। सांख्य और मीमांसक उक्त पाँच हेतुओं में उपनय और निगमन को अवश्यक नही मानते।

---

१— न्या० कु० च० पृ० ४३८, हेतुस्त्रिरूप. न्यायप्रवेश, पृ० १, प्रमाण वा० ३.१४

**हेत्वाभास**—हेतु के स्वरूप से विरहित होकर भी जो हेतु की तरह प्रतिभासित होता हो वह हेत्वाभास कहलाता है। नैयायिक हेतु के पञ्च रूप के समान पाँच हेत्वाभास मानते हैं—असिद्ध, विरुद्ध अनैकान्तिक, कालात्ययापदिष्ट और प्रकरणसम। बौद्ध त्रैरूप्य के रूप में तीन हेत्वाभास मानते हैं—असिद्ध, विरुद्ध और अनैकान्तिक। जैन दर्शन में भी साधारणतः इन्हीं हेत्वाभासों को स्वीकार किया गया है। पर अकलंक मात्र असिद्ध को हेत्वाभास मानते हैं।

**वादविवाद**—वादविवाद की परम्परा भारतीय संस्कृति में बहुत प्राचीन है। मिलिन्दपञ्ह में वाद के दो रूपों का उल्लेख आया है—पण्डितवाद और राजवाद। पण्डितवाद में शैक्षणिक स्तर पर वादविवाद किया जाता है। पर राजवाद में कठोर अनुशासन बना रहता है। न्यायशास्त्र में इसके तीन भेद मिलते हैं—वाद, जल्प और वितण्डा। वीतरागकथा को वाद कहा जाता है। इसमें तत्त्वनिर्णय करना मुख्य उद्देश्य है। यहाँ छल, जाति आदि निग्रह स्थानों का प्रयोग नहीं किया जाता। परन्तु जल्प और वितण्डा में जय-पराजय की भावना होती है और उसमें छलादि निग्रह स्थानों का यथासंभव प्रयोग किया जाता है। बौद्धदर्शन में उपायहृदय आदि ग्रन्थों में निग्रहस्थानों का प्रयोग प्रचलित रहा है परन्तु धर्मकीर्ति ने उनका प्रयोग अनुचित बताया है। यहाँ अहिंसा का दृष्टिकोण प्रमुख रहा है। इसलिए धर्मकीर्ति ने असाधनांगवचन और अदोषोद्भावन नामक दो निग्रहस्थानों को स्वीकार किया है।

**शब्द अथवा आगमप्रमाण**—शब्द अथवा आगम प्रमाण भी विवादास्पद विषय है। वैशेषिक शब्द को अनुमान प्रमाण के अन्तर्गत रखते हैं। मीमांसक शब्द और अर्थ का नित्य सम्बन्ध बताते हैं तथा शब्द को नित्य मानकर वेद को अपौरुषेय मानते हैं। वैयाकरणों के अनुसार शब्द क्षणिक होने से वे अर्थबोधक नहीं होते अतः वे स्फोट नामका एक अन्य नित्य तत्त्व मानते हैं तथा यह मत व्यक्त करते हैं कि संस्कृत शब्दों में ही अर्थबोधक शक्ति होती है। पालि-प्राकृत आदि देशी भाषाओं में उस शक्ति का अभाव है। जैन दार्शनिक शब्द या आगम प्रमाण को तीर्थङ्कर के वचनों से निबद्ध साक्षात् या प्रणीत ग्रन्थों तक ही सीमित नहीं रखते, बल्कि व्यवहार में संकेतादि से उत्पन्न ज्ञान को भी आगम प्रमाण में गर्भित कर लेते हैं। परन्तु बौद्ध[1] शब्द को ही प्रमाण नहीं मानते क्योंकि शब्द का अर्थ के साथ उनकी दृष्टि में न तादात्म्य सम्बन्ध है और न तदुत्पत्ति। उनकी दृष्टि में शब्द विकल्प वासना से उत्पन्न होते हैं। अतः वे बाह्यार्थ का ग्रहण कराने में असमर्थ हैं। जैसे

---

१. प्रमाण वा. टी., ३. २१२; तत्वसंग्रह, पृ-४४०

"अंगुलि के अग्रभाग में सौ हाथी हैं।"[1] इस प्रकार के तथ्यहीन वाक्यों के उच्चारण में व्यक्ति अथवा वक्ता दोषी नहीं। क्योंकि यदि वक्ता गूंगा हो तो वह इस प्रकार का असत्य ज्ञान नहीं करा सकता। इस प्रकार के ज्ञान उत्पन्न करने में तो शब्दों की ही महिमा मूल कारण है। अतः पुरुष भी यदि ये शब्द बोलेगा तब भी असत्य ज्ञान होगा। अतः विकल्प वासना से शब्दों का जन्म होता है और शब्दों से विकल्पों का जन्म होता है। शब्द अर्थ का स्पर्श भी नहीं करता।

बौद्धदर्शन में श्रुत को अविसंवादि नहीं माना है। उसक चिन्तन है कि जिस शब्द का प्रयोग सत् अर्थ में होता है वही शब्द अर्थ के अभाव में भी देखा जाता है। अतः शब्द विधि रूप से कथन नहीं करते। इसलिए अन्यापोह को ही शब्दार्थ मानना चाहिए। बौद्ध दृष्टि में शब्द और लिंग का विषय माना जाय तो वह बाह्य अर्थ न स्वलक्षण रूप हो सकता है और न सामान्य रूप हो सकता। सामान्य रूप में अर्थ भी शब्द का विषय इसलिए नही है कि वास्तविक सामान्य ही असम्भव है, अर्थ क्रियाकारी न होने के कारण। अपोह ( निषेध ) के दो पर्युदास और भेद हैं प्रसज्य। पर्युदास भी दो प्रकार का है—बुद्धिरूप और अर्थरूप। सविकल्पक ज्ञान में अर्थाकार रूप से जो अर्थ का आभास होता है उसे अपोह कहा जाता है। जिसके द्वारा अन्यका अपोह ( निषेध ) किया जाय उसे अन्यापोह कहते हैं। वह अन्यापोह शब्द का मुख्य रूप से अभिधेय है। तात्पर्य यह है कि शब्दज्ञान में जो प्रतिभासित हो उसे ही शब्दार्थ मानना उचित है। शब्द ज्ञान में न तो प्रसज्यप्रतिषेध ( तुच्छाभावरूप ) का ही अध्यवसाय होता है और न स्वलक्षण का ही प्रतिभास होता है। किन्तु बाह्यार्थ की निश्चायक एक शाब्दी बुद्धि उत्पन्न होती है। अतः उसे ही शब्दार्थ मानना चाहिए। शब्द का अर्थ के साथ वाच्य-वाचक सम्बन्ध भी कार्य कारण भाव से भिन्न नहीं है क्योंकि बुद्धि में जो अर्थ का प्रतिबिम्ब होता है वह शब्द-जन्य है इसलिए उसे वाच्य कहते हैं और शब्द का जनक होने से वाचक कहते है।[2]

इस प्रकार बौद्ध धर्म ने दार्शनिक क्षेत्र मे आकर चिन्तन की भूमिका को आगे बढ़ाया। आध्यात्मिक सिद्धान्तों को दार्शनिक रूप देना और उस पर अपने ढंग से विचार प्रस्तुत करना बौद्ध दार्शनिकों का विशेषता है। दर्शन के क्षेत्र में यह उनका अविस्मरणीय योगदान कहा जा सकता है।

—: ० :—

---

१. प्रमाण वा. टी. १. पृ० २८८, जैन न्याय, पृ. १३६

२—जैन न्याय, पृष्ठ २४३–२४६

# मूल-टिप्पण्युपयुक्तग्रन्थसङ्केतविवरणम्[1]

| | |
|---|---|
| AK. | अभिधर्मकोश ( BB ) |
| AKV. | अभिधर्मकोश व्याख्या |
| B. | भास्कर, डॉ० भागचन्द्र जैन |
| BI. | Bibliotheca Indica Series |
| BCp. | बोधिचर्यावतारपञ्जिका ( BI. ) |
| Dsn. | धर्मसङ्गणी ( p. T. S. ) |
| JASB. | Journal of Asiatic Society of Bengal. |
| JRAS. | Journal of Royal Asiatic Society. |
| Kp. | काश्यपपरिवर्त, सम्पादक-Baron, A. १९२६. |
| MK. | मूलमाध्यमिक कारिका |
| MV. | माध्यमिकवृत्ति, चन्द्रकीर्तिकृत प्रसन्नपदा सहित (BB)। |
| MVt. | महाव्युत्पत्ति ( BB ). |
| NS. | न्यायसूत्र |
| NK. | न्यायकन्दली ( प्रशस्तपादभाष्य ) |
| S. | महा० हरप्रसाद शास्त्री, चतुःशतिका, Memoirs of the Asiatic Society of Bengal, vol. 3, No. 8, pp. 449-514. |
| T. | तिब्बती सीरिज चतुःशतक |
| V. | वैद्य, डॉ० पी० एल०, Etudes sur Aryadeva et Son Catuh Satak, १९२३ |
| Vt. | अभिधम्मत्थसंग्रह प्रकरण पर विभाविनीटीका |

---

१—इस तालिका में निर्दिष्ट ग्रन्थ प्रायः वही है जिनका उपयोग डॉ० विधुशेखर भट्टाचार्य ने अपने चतुःशतक में किया था।

# भूमिका में प्रयुक्त ग्रन्थों की सूची

## प्राचीन ग्रन्थ

अभिधम्मत्थसंगह— सं० रेवतधम्मथेर, वाराणसी, १९६५
अभिधर्मकोश टीका— सं० राहुल सांकृत्यायन, वाराणसी
अभिधर्मकोश भाष्य— सं० डॉ० पी० प्रधान, पटना, १९६७
अभिधर्म विनिश्चयसूत्र— सं० डॉ० एन० एच० सामतानी, जायसवाल रिसर्च इन्स्टीटयूट, पटना, १९७१
उदान— सं० जगदीश कश्यप, नागरी संस्करण
इतिवुत्तक— सं० जगदीश कश्यप ना० सं०
अंगुत्तरनिकाय— सं० जगदीश कश्यप, ना० सं०
गुह्यसमाजतन्त्र— सं० १९३१ बी० भट्टाचार्य, बड़ोदा,
चतु:शतक— सं० डॉ० पी० एल० वैद्य, विधुशेखर भट्टाचार्य, कलकत्ता १९३१
चित्तविशुद्धिप्रकरण— प्रभुभाई भिखाभाई पटेल, वि० भारती १९४९
तत्त्व संग्रह— सं० कृष्णमाचार्य, बड़ोदा, १९२६
तत्त्वार्थवार्तिक— सं० डॉ० महेन्द्रकुमार, वाराणसी, १९५३
दीघनिकाय— सं० जगदीश कश्यप, ना० सं०
थेरगाथा— सं० जगदीश कश्यप, ना० सं०
थेरीगाथा— सं० जगदीश कश्यप, ना० सं०
धम्मपद— सं० जगदीश कश्यप, ना० सं०
न्यायकुमुदचन्द्र— सं० महेन्द्र कुमार, बम्बई, १९३८
न्यायावतार वार्तिकवृत्ति—सं० दलसुख मालवणिया, बम्बई, १९४९
प्रमेयकमलमार्तण्ड— निर्णय सागर, बम्बई
बोधिचर्यावतार— सं० शान्तिभिक्षु शास्त्री, लखनऊ, १९५५
मज्झिमनिकाय— सं० जगदीश कश्यप, ना० सं०
मूलमाध्यमिककारिका— सं० पी० एल० वैद्य, दरभंगा, १९६०
माध्यमिकावतार— सं० आयस्वामी शास्त्री, O.R. मद्रास, १९३०
मिलिन्दपञ्ह— सं० आर० डी० वाडेकर, बम्बई, १९४०
ललितविस्तर— सं० पी० एल० वैद्य, दरभंगा, १९५८

ललितविस्तारा— सं० भानुविजय गणिवर, अहमदाबाद, १९६३
विनयपिटक— सं० जगदीश कश्यप, ना० सं०
विभङ्ग— सं० जगदीश कश्यप, ना० सं०
विसुद्धिमग्ग— धर्मानन्द कौशाम्बी, बम्बई, १९४०
विज्ञप्तिमात्रतासिद्धि— सं० महेश तिवारी, वाराणसी, १९६७
सद्धर्मपुण्डरीक— सं० पी० एल० वैद्य, दरभंगा, १९६०
साधनमाला— सं० बी० भट्टाचार्य, बड़ोदा, १९२५, १९२८
सिद्धिविनिश्चय टीका— सं० महेन्द्र कुमार, वाराणसी, १९५९
सुत्तनिपात— सं० धर्मरत्न, वाराणसी, १९६०
सौन्दरानन्द— सं० जोन्सन, लन्दन, १९२८
संयुत्तनिकाय— सं० जगदीश कश्यप, ना० सं०

## आधुनिक ग्रन्थ

उपाध्याय, बलदेव बौद्धदर्शनमीमांसा, वाराणसी, १९५४
उपाध्याय, भरतसिंह, बौद्धधर्म तथा अन्य भारतीय दर्शन, इलाहाबाद, १९५३
जोशी, लालमणि, स्टडीज इन दि बुद्धिस्ट कल्चर आफ इन्डिया, वाराणसी, १९५६
नरेन्द्रदेव, बौद्ध-धर्म-दर्शन, पटना, १९५६
पाण्डे, गोविन्दचन्द्र, बौद्धधर्म के विकास का इतिहास, लखनऊ, १९६३
ओरिजन्स आफ बुद्धिज्म, इलाहाबाद, १९५७
भास्कर, भागचन्द्र जैन, जैनिज्म इन बुद्धिस्ट लिटरेचर, श्रमण भारती, नागपुर, १९७२
मूर्ति, टी० आर० ह्वी० दि सेन्ट्रल फिलासिफी आफ बुद्धिज्म, लन्दन, १९५५
शास्त्री, कैलाशचन्द्र, जैन न्याय, भारतीय ज्ञानपीठ, वाराणसी।
सांकृत्यायन, राहुल, दर्शन दिग्दर्शन, इलाहाबाद, १९४४
सेरबात्स्की थ० बौद्ध न्याय, Buddhist Logic का हिन्दी अनुवाद, वाराणसी
हरदयाल, दी बोधिसत्त्व डाक्ट्रिन इन बुद्धिस्ट संस्कृत लिटरेचर, १९३२

# चतुःशतकम्

# चतुःशतकम्

## सप्तमं प्रकरणम्

### विषयसम्भोगाभिनिवेशप्रहाणोपायसन्दर्शनम्

१५१

§ १. क्लेशप्रहाणोपाय उक्तः । साम्प्रतं संसारदोषोपलम्भसन्दर्शनेन तत्रोत्पाद्योद्वेगार्थं कर्मप्रहाणोपायकथनकाम आह—

अस्य दुःखसमुद्रस्य सर्वथान्तो न विद्यते ।
निमग्नस्येह बालस्य भीतिस्ते किं न जायते ॥ १ ॥

१५२

§ २. अत्राह । यौवनादिदर्पसंमूढस्य संसाराद् भयं नोद्भवति । उच्यते—

पश्चाद् यौवनमुत्पद्य पूर्वमुत्पद्यते पुनः ।
अस्मिंल्लोके स्थितिरपि गतिस्पर्धेव दृश्यते ॥ २ ॥

§ ३. तस्य यौवनदर्पो न युज्यते । जन्ममरणवत् । चक्रपीडकच्छायावच्च । यथा प्राणिनां जन्ममरणे परिवर्तमाने पूर्वं भूत्वा पश्चाद् भवतः, अपि च, यथा छिद्रवता चक्रेण तिलान् पीडयतां छाया पूर्वं भूत्वा पश्चाद् भवति, तथा यौवनमपि भवति । द्रुतः क्षिप्रोऽहं पूर्वमहं पूर्वमिति परस्परमाजौ साहसेन रथि धावकवत् । एवं यौवनादीनां अस्थितिः परीक्षणीया ॥ २ ॥

१५३

§ ४. अत्राह । यद्यपि गतिधर्मकत्वाल्लोकस्यावश्यमेव गतिस्तथापि स्वयं तस्य न तस्माद्भयम् । उच्यते—

स्वेच्छया विद्यते नैव गतिरन्या भवेत् तव ।
पारतन्त्र्योऽपि निर्भीको भवेत् कः खलु बुद्धिमान् ॥ ३ ॥

§ ५. संसारे नित्यं तत्र तत्र भ्रमतः स्वेच्छया देवमनुष्यादिषु गतिषु गमनं कदापि न भवति । अपि च, यः स्वेच्छया त्यक्त्वा न गच्छति स आत्म-

बन्धो न भवति। यदि [ पुनर् ] आत्मवशवत् निर्भीको भवेत् तस्मात् मूढतरः कोऽन्यो भवेत्। बुद्धिमान् हि परवशभूतो न निर्भीको भवति ॥ ३ ॥

१५४

§ ६. आह चात्र।

> संसृतौ संसृतेर्जन्मोर्यत्कर्मवशतो गतिः।
> छेत्तव्यं कर्म तत् कस्माद् गतिर्नैव भवेदिति ॥

अत्राह। अस्य सुखाभिमुखत्वाद् गतिश्छेत्तुं न शक्यते। अनागते जन्मनि योगः करिष्यते। उच्यते—

> सर्वमनागते नास्ति सर्वदापि पृथग्जनः।
> अतीते त्वं यथात्रापि न तथेति तथा गुरुः ॥ ४ ॥

§ ७. अनागते कालेऽनन्तं कर्म। अतीतेऽपि तथा। त्वमप्यतीते काले सर्वतः पृथग्जनः। अतोतः कालस्ते तथा निरर्थको जातस्तथानागतोऽपि मा भूदिति तथा कुरु। क्लेशोपशमनमननुभवतस्तेऽतीतः कालो गतः। तस्मादेवमपि यथास्य भवस्यान्तो भवेत् तथोद्यमो कार्यः ॥ ४ ॥

१५५

§ ७. यथातीतः कालो निरर्थकः क्लेशेनातिक्रान्तस्तद्वदनागतोऽपि तथा न भविष्यतीति तथा कुर्वित्युक्तम्। अत्राह—

> "अस्मिन्नेवोद्यमं काले कुर्याद् विमुक्तिसिद्धये।
> निश्चयः परलोके कः सद्धर्मभक्तिसम्भवे ॥"

सूत्रे[1]ऽपि उक्तं "लभ्यते बुद्धोत्पादशतं लभ्यते च मनुष्यलाभसमूहः। श्रद्धा-धर्म श्रवणं च शतेऽपीदृशेषु कल्पेष्वतिदुर्लभमिति।"

§ ८. अत्राह। अथास्य संसारस्यान्तोऽस्ति न वा। यद्यस्ति तदा विना प्रयासेनान्तोऽस्तीत्युद्यमो निरर्थक एव। अथ नास्ति। तदा कृतेऽपि प्रयासेऽन्तो नास्तीत्युद्यमो निरर्थक एव।

उच्यते। नेदमेकान्तेनावधारयितुं शक्यम्। कुत इति। निःस्वभावत्वात्। निःस्वभावस्यान्तवत्त्वानन्तवत्त्वज्ञानाज्ञानहेत्वभावात्। तद्द्वयस्याप्यनेकप्रत्ययान्तरायत्वात्। प्रत्ययानामप्यतिदुर्लभत्वादिदं द्वयमत्र निश्चयेन व्यवस्थापयितुं न शक्यते। तमनिश्चयमुपपादयन्नाह—

---

१. महाव्युत्पत्ति, २०६.५, मज्झिमनिकाय भाग, १, पृ० ४२६.

श्रोतृश्रोतव्यवक्तव्यानुरूपोऽप्यत्यन्तदुर्लभः ।
संसारस्तेन सुश्रो नानन्तवानन्तवान् न च ॥ ५ ॥

१५६

§ ९. यद्यपि प्रवचनस्थितया द्वयं भवत्येव तथापि श्रोता न सम्भवति । कुत इति । यस्मात्—

प्रायेण यदसत्पक्षं परिगृह्णन्ति मानवाः ।
तस्मात्पृथग्जनाः प्रायो ध्रुवं गच्छन्ति दुर्गतिम् ॥ ६ ॥

§ १०. यस्मात् सत्त्वाः प्रायेणाज्ञानान्धाः परक्लेशे रमन्ते । एते हि नरा असत्पुरुषसंसर्गेण प्राणिवधादिदशाकुशलकर्मपथानन्तर्यात् प्रायेण दुर्गतिं गच्छन्ति ॥ ६ ॥

१५७

§ ११. आह चात्र—

"यत्पृथुं गच्छति गतिं गतिं गच्छति वा पृथक् ।
गतिं पृथुं जनयति तेनोक्तोऽत्र पृथग्जनः ॥"

§ १२. अत्राह । यद्यपि दुर्गतिरक्षणत्वाद्[1] विविधक्लेशभावाच्चाभिरतिस्थानं भवत्येव तथापि पुण्यद्वारा सुगतिगमनमभिरतिस्थानं भवति । उपद्रवरहितत्वात् । तस्मात् तत्र खेदो न कर्तव्यः । उच्यते । दुर्गताविव सुगतावपि खेद उचितः । तथा हि—

दृश्यते भूतले पापविपाकस्य विडम्बना ।
भवो हि भासते तेन सूनास्थानसमः सताम् ॥ ७ ॥

सुगतावुपन्ना अपि निखिलानिष्टकर्मविपाकादङ्गप्रत्यङ्गनाशेन्द्रियवैकल्यदारिद्रदौर्बल्यप्रज्ञादारिद्रसदवद्याचारशङ्कारूपविडम्बनातिव्यसनाप्रीतिमनुभवन्ति ॥७॥

१५८

§ १३. अत्राह । यदि सता भवः सूनास्थानसमः किं तस्माल्लोकस्य नोद्वेगः । उन्मत्तहस्तिनो मदोन्मदवद् उन्मत्तस्वभावत्वात् । किम् अस्मिन् लोके सर्वस्योन्मादः । तथेत्याह । उन्मत्तलक्षणत्वात् । इह धातुवैषम्यादनवस्थितचित्तवृत्ति पुद्गलं लोकश्चेदुन्मत्त इति कथयेत् । स्वभावेन चलचित्तमप्यनवस्थितवृत्तिर्भव ( कथयेत ) । तथाहि—

---

१. महाव्युत्पत्ति, § १२०, बोधिचर्यावतारपञ्जिका, पृ० १० :
नरकप्रेततिर्यञ्चो म्लेच्छा दीर्घायुषोऽमराः ।
मिथ्यादृग्बुद्धकान्तारौ मूकताहृष्टाविहाक्षणाः ॥

**विज्ञानस्यानवस्थानादुन्मत्तो जायते यदि।**
**तस्को भवस्थं न ब्रूयादुन्मत्त इति पण्डितः ॥ ८ ॥**

§ १४. पण्डिताह्यनवस्थितविज्ञा[1]नमेवोन्मत्तं वदन्ति। यो भवपर्यापन्न आर्यैर्नोन्मत्त इत्युच्यते, यस्य चैकस्मिन्नालम्बने विज्ञानं सदावतिष्ठते, न स कश्चिदपि पृथग्जनो वर्तते। तस्मादुन्मादहेतुरिति मद्यपानवदयमा[2]त्मश्रेयस्कामेन परिवर्जयितुं युक्तः ॥८॥

१५६

§ १५. तदेवं सूनास्थानसमत्वाच्च[3]पण्डितैः परिवर्जनीयो भवः। स च सर्वकर्मप्रवृत्तिनिरोधेन[4] परिव[5]र्जनीयः। [6]अस्ति चास्य भवस्य परिवर्जनोपायश्च सर्वकर्मक्षयः[7]। स कथं भवतीति तदुपायावेदनायाह—

**हीयमानां रुजं दृष्ट्वा गमनादेर्विपर्यये।**
**सर्वकर्मक्षये तेन करोति मतिमान् मतिम् ॥ ९ ॥**

१६०

§ १६. यथा गम[8]नादिजनिता रुजश्चङ्क्रमणादि[9]परिवर्जनेन पूर्वाक्षेपवेग[10]क्षयादनुपूर्वं क्षीयन्ते तथा सर्वेण सर्वं सर्वरुजः सर्वकर्मोच्छेदे[11]। ततः सर्वकर्मप्रबन्धोच्छेदमर्थयमानः[12] कुशलःपुरुषः सर्वकर्मक्षयाय[13] वर्तते ॥ ९ ॥

§ १७. तदेवं सर्वकर्मक्षयः सर्वदुःखनिवृत्तिकारणमिति सर्वकर्मक्षये मतिमता मतिः कार्येति। इतश्च युक्तः संसारत्यागो धीमतां भयकारणत्वात्। तथाहि—

---

१. विज्ञानस्यार्थश्चित्त
२. भवस्यात्रोल्लेखः।
३. T. सूनास्थानसमत्वात्
४. T. (साहित्पर) निरोध द्वारा।
५. T. वर्जनीयः।
६. T. न तत्र वाक्यमिदं वर्तते।
७. T. हीयमाना रुजो
८. S. गमनादी
९. T. रुज. परिवर्जने
१०. S. आवेधपरिक्षयाद्
११. तुलनार्थं द्रष्टव्यम् दिव्यावदान, पृ. ३९, १४०, २७०, दीघनिकाय, द्वितीय भाग, पृ-५७
१२. S. सकलोच्छेदमन्वयमानः
१३. S.सर्वकर्मक्षयायार्थं

**यदैकस्यापि कार्यस्य दृश्यते नादिकारणम् ।**
**तदा कस्य भयं न स्याद् दृष्ट्वैकस्यापि विस्तरम् ॥ ९ ॥**

§ १८. इहैकस्यापि तावत् कार्यस्य भौतिकस्य चैत्तसिकस्य[1] वा पूर्वापर-पर्येण परिक्ष्यमाणस्यादिकारणं यदा न दृश्यतेऽनादिमत्त्वाज्जगत्प्रवृत्तेः[2] । एवमेवैकस्यापि कार्यस्यानन्त्यमतिविस्तारं[3] दृष्ट्वा तदा कस्येह पुरुषस्याधिगत-भयस्य जगत्प्रवृत्तिदर्शनाद्भयं न स्यात् ॥ १० ॥

१६१

§ १९. अपि च । यदयमभिलषंस्तृष्णया परिस्पन्दते, तस्य यदि नियमतः[4] सिद्धिः स्याद् युक्तं स्पन्दितुम् । तस्य च —

**सिद्धिः सर्वस्य कार्यस्य नियमेन न जायते ।**
**नियमेन कृतस्यान्तः किं तदर्थं विहन्यते ॥ ११ ॥**

§ २०. इह हि सर्वस्यैव कार्यस्य प्रारब्धस्य सिद्धिर्भवति न वा । सिद्धस्य तु सर्वस्यैव[5] कार्यस्य नियमादवश्यमेव विनाशो भवति । तत्र यस्य कृतस्या चिरा[6]दवश्यमेव नियमतो विनाशः किं तदर्थमयं बालो[7] विहन्यते ॥ ११ ॥

१६२

§ २१. यथा च कार्यस्य[8] ध्रुवो विनाशस्तथा कर्मणोऽपीति प्रतिपाद यन्नाह—

**यत्नतः क्रियते कर्म कृते नश्यत्ययत्नतः ।**
**विरागोऽस्ति न ते कश्चिदेवं सत्यपि कर्मणि ॥ १२ ॥**

§ २२. इह खलु महता यत्नेन बहुभिः साधनोपायैः कर्म क्रियते तत्तु प्रयत्नेन बहुभिरपि साधनैः कृतमयत्नादेव कार्यवद्[9] विनश्यति । तदेवमतिमहा-

१. S. भौतिकस्य वात्तिकस्य पैत्तिकस्य वा चैत्तसिकस्य
२. T. (साहित्यिक) एकैकजन्मपरम्परायाः
३. S. सविस्तरं
४. S. नियोगतः
५. T. सिद्धस्य तु कार्यस्य
६. S. सुचिराद्
७. T. लोको
८. S. कायस्य
९. S. कायवत्

पुरुष[1]कारसाधन[2]मपार्थकमिति कर्मणि[3] कथं नाम न स्याद् वैराग्यं विदुषः। तव पुन[4]स्तत्कर्माचरणाद् विरागाभावो जड़तामेव वेदयते ॥ १२ ॥

## १६३

§ २३. अत्राह यद्यप्ययत्नात् कार्यं[5] नश्यति तथापि सुखहेतुत्वान्न तत्र वैराग्यं भवतीति । उच्यते—

**अतीतस्य सुखं नास्ति नाप्यप्राप्तस्य विद्यते ।**
**वर्तमानोऽपि यात्येव श्रमोऽयं कस्य नाम ते ॥ १३ ॥**

§ २४. अतीतस्य तावद् विज्ञानस्य सुखं नास्ति निरुद्धत्वात् । अनागतस्य सुखं नास्ति स्थित्यभावात् । तदेवमसति सुखे तेनानुग्रहाभावात् सुखसम्भोग-लालसस्य योऽयं सुखहेतुकर्मोपार्जनश्रमो भवतः स कस्य कृते भवतु । विफल एव सर्वथा सुखहेतूपार्जनपरिश्रमोपायास इत्यभिप्रायः ॥ १३ ॥

## १६४

§२५. अत्राह । यद्यप्येवं तथापि स्वर्गसुखार्थमवश्यमेव कुशलं कर्म कर्तव्यमिति उच्यते—

**स्वर्गो निरयतुल्योऽपि विदुषां स्याद् भयङ्करः ।**
**सर्वथा दुर्लभस्तेषां भवो यो न भयङ्करः ॥ १४ ॥**

§२६. तत्र त्रिविधसंक्लेशोदय[6]द्वारत्वात् तीव्रतरः[7] विषयसम्भूतक्लेशाग्नि-सन्दीपितत्वान् मोहभूयस्त्वाच्च स्वर्गमपि निरयवद् भयङ्करत्वात् परिवर्जयन्ति सन्तः । अपि शब्दश्चात्र भिन्नक्रमः[8] स्वर्गशब्दानन्तरं द्रष्टव्यः । तिष्ठतु तावदन्यो भवः स्वर्गोऽपि विदुषां निरयतुल्य इति व्याख्येयम् ॥ १४ ॥

---

१. T. एवं महापुरुष
२. S. धन
३. T. साधनेऽपार्थके कर्मणि
४. S. तत्पुनःपुनः ।
५. S. कार्यं
६. S. क्लेशाय
७. T. तीव्र
८. T. भिन्नक्रमप्रयोगः

१६५

§२७. अपि च। यथा खलु पण्डिताः संसारदोषप्रत्यवेक्षानिपुणादुःखाग्नि-ज्वालापरिगतमेकान्तदुखं संसारं यथावदीक्षन्ते तथा खलु—

**संसारदुखं जानीयाद् यदि बालोऽपि सर्वशः।**
**गच्छेदत्यन्ततो नाशं सह चित्तेन तत्क्षणम् ॥ १५ ॥**

§२८. यद्दुःखं भावयन्त[1] आचार्याः संसारादुद्विजन्ते तद्यपि पृथग्जनः शक्नुयादध्यक्षयितुं तदा तत्क्षणमेव[2] शतधा[3] विशीर्येत हृदयम्। अनवबोधात् त्वयं[4] अभिरमते संसारे। अत्यन्ततो नाशं गच्छेन्मोक्षमित्यर्थः।

१६६

§२९. अपि च। संसारे क्रियासु सामर्थ्यवतः समीहमानस्य सुखं स्यात्। स च निरूप्यमाणः—

**अमानी दुर्लभः सत्त्वो[5] मानी नास्ति घृणान्वितः।**
**उक्तः सुदुर्लभस्तेन ज्योतिर्ज्योतिःपरायणः ॥ १६ ॥**

§ ३०. शक्तस्यैव क्रियासु पुरुषकारेणा[6]नुपात्त[7]सुखवेदनीयविषयोपार्जनाद् उपात्तपरिरक्षणाच्चावश्यमेव पुरुषस्य[8] मान उपजायते। मानतश्चायमात्मानं विशेषतः परिकल्पयन्नधिकसहमानस्तदुपजिघांसया निर्दयो भवति। निर्दयस्य चास्यापाय[9]पर्यवसानतया [ कुत्र सन्ति ] सम्पदो यतोऽस्य सुखानुभवः सम्भाव्येत। अतएव भगवता ज्योतिर्ज्योतिःपरायणः पुद्गलो दुर्लभ इत्युक्तं कुलभोगैश्वर्य-मानेन नियतमधःपतनात् ॥ १६ ॥

१६७

§ ३१ .यद्येवं मानिनः पापाचरणादपायनिम्ना इति गर्हिता विपर्ययेण त्वमानिनः[10] स्वर्गसुखसाधनधर्माचरणात् प्रशस्यास्ततश्चैकान्तेन [ न ] गर्हितः संसार इति। उच्यते। धर्मेऽपि वैपरीत्यादयुक्तः सङ्गः। तथा हि—

---

१. S. आकारयन्तः
२. T. देहेन सह तत्क्षणमेव
३. T. शब्दोऽत्र न विद्यते।
४. T. त्वयम् रिक्तेन सहायेन प्रतिच्छशत्रुकार्यवत्
५. T. शक्तः
६. T. शक्तस्यैवानुपात्तः
७. S. नपात्त
८. T. पुरुषस्य दधिमांसवतः
९. T. दुर्गति
१०. S. ब्रह्मानिनः

**निवृत्त विषयस्येह विषयः किल लभ्यते ।**
**केनापि हेतुना धर्मो विपरीतोऽपि स स्मृतः ॥ १७ ॥**

§ ३२. यः किल विषयेष्वनास्थस्तान्[१] परित्यजति ब्रह्मचर्याभ्युपगमात् तस्ये[२]तपच्युतस्येश्वरकुले स्वर्गे[३] वोत्पन्नस्य [ इष्टो विषयो लभ्यते यस्मादयं त्याग-शील इव स्वयं लब्धरूपं फलमभिसम्पादयति तस्माद् धर्मे विपरीतः । स चैवं विपरीतोऽपि केनापि हेतुनेति सतामनाभिमतेन केनापिविपरीत भू ] तेन लोके-नाङ्गीकृतश्चेति नात्राभिनिवेशो न्यायान् ॥ १६७ ॥

१६८

§ ३३. एवं तावद्धर्मे विपरीतत्वात्त्याज्यः । यदपि तद्ध[४]र्मफलमैश्वर्यं तदपि स्ववशत्वाभावाद्[५] विविधव्यसनस्थानत्वाच्च नास्थेयं विदुषा । तथा हि—

**पुण्यस्य फलमैश्वर्यं[६] तच्च रक्ष्यं सदान्यतः ।**
**कथं नाम तदात्मीयं यद् रक्ष्यं सर्वदान्यतः ॥ १८ ॥**

§ ३४. पूर्वकृतस्य पुण्यस्य[६] फलमैश्वर्यम् । तच्चात्मीयसंज्ञितम् । तच्चेह सदैव रक्षणीयं[७] प्रत्यर्थिभ्यः । यदि तदात्मीयं[८] स्यान्नैव[९] प्रत्यर्थिभ्यो रक्षणीयं स्यात् । यच्च परैराच्छेद्यत्वात् सततमाधीयमान[१०]रक्षाविधानं कथं तदात्मीयमिति शक्यं वक्तुम् । तदयं रक्षाविधान निरन्तरः परमनिर्वृत्तः कदा नाम विषयरसमा-स्वादयेत् । तस्मात् फलमप्यस्य नानुग्रहाय पर्याप्तम् ॥ १८ ॥

१६९

§ ३५. अनवस्थितत्वाच्च लौकिकस्य धर्मस्य तत्रास्था न ज्यायसी । तथा हि—

**या या लोकस्थितिस्तां तां धर्मः समनुवर्तते ।**
**धर्मादपि ततो लोको बलवानिव दृश्यते ॥ १९ ॥**

---

१. S. तान् विषयान्
२. S. तस्येह, T. ततः
३. T. इश्वरकुले स्वर्गे वोत्पन्नस्य : S.
४. T. तत्कर्म
५. S. वशत्वाभावाद्
६. S. कर्मणः
७. S. संरक्ष्यते
८. S. आत्मनीनम्
९. T. स्यानैवात्मीय (?) दस्यूदकाग्निवातादिभ्यः
१०. T. विधीयमान

§ ३६. लोको हि यां यां स्थितिं व्यवस्थापयति कन्यादानोद्वहनादिकां तां तां धर्मः समनुवर्तते[1]। तस्यास्तस्याः स्थिते धर्म इति प्रसिद्धेः[2]। न चैव स्वभावव्यवस्थितस्य न्यायो युज्यते यद् देशकालभेदयोरन्यथात्वादन्यथा स्यात्। ततो नात्रात्यन्तादरो युक्तः ॥ १९ ॥

१७०

§ ३७. अत्राह अभिलषितविषयसमुत्पादमन्तरेण सुखवेदनानुभवो नास्ति। सच विषयोत्पादः कृतपुण्यानामेव यस्माद् भवति तस्माद् विषयार्थिना कर्तव्य एव धर्म इति। उच्यते—

**विषयश्च शुभेनेष्टो विषयः स च कुत्सितः।**
**श्रेयान् यस्य परित्यागो निष्पन्नेनापि तेन किम् ॥ २० ॥**

§ ३८. योऽय[3]मिहेष्टपञ्चकाम[4]गुणात्मको विषयो[5] रूपशब्दगन्धरसस्पर्शाख्यसंज्ञितः स शुभेन कर्मणा लभ्यते। स एव सत्वानां मोक्षकामाणां कुत्सितोऽमेध्याक्तगात्र इव। यस्य च श्रेयान् परित्यागोऽनर्थमूलकत्वाद् अनित्य दुःखाशुच्यनात्मकत्वेनानिर्वृतिकरत्वाद् रागादिकक्लेशोत्पादकत्वेन प्रमादस्थानत्वाच्च निष्पन्नेनापि तेन न किञ्चित् प्रयोजनमिति।

१७१

§ ३९. अत्राह। यद्यपि विषयस्य कुत्सितत्वाद् विषयसाधनार्थो धर्मो निष्प्रयोजनस्तथाप्याज्ञारसास्वादसुखगुरूणि राज्यानीति तदर्थं राज्याधिपत्यपुण्येषु प्रवर्तितव्यमिति। उच्यते। नैव हि सर्वेषामाज्ञया कार्यं भवन्ति। ततश्च—

**कार्यं नास्त्याज्ञया यस्य तस्य धर्मो निरर्थकः।**
**आज्ञार्थः खलु यस्य स्यात् स जडो नाम जन्मनि ॥ २१ ॥**

§ ४०. यस्य हि समीहितार्थसंसिद्धिरन्यथा न सम्भवति स [परस्तत्साधयितुं प्रवर्तिष्यत इत्याज्ञादानश्रमं प्राप्नोति। परो विनाज्ञया ध्रुवं सिद्धिमनायासेन

१. T. अनुवर्तते
२. S. प्रसिद्धिगमनात्
३. T. अयमिति शब्दो न विद्यते
४. S. काय
५. T. इष्टो विषयो।

प्राप्नोति । तस्याज्ञया न किमपि प्रयोजनम् । यस्याज्ञया न प्रयोजनं तस्य तद्धेतुधर्मोऽपि निरर्थकः । एवं तावदाज्ञार्थः स धर्मो न भवति । अथाज्ञार्थो भवति तस्य धर्मः सफल इति तदर्थो युज्यते । अत्रोच्यते—

आज्ञार्थः खलु यस्य स्यात् स जडो नाम जन्मनि ।

४१. जडस्य हि युक्तमयुक्तं च चरितुं शक्तिर्नास्त्ययेवेत्याज्ञायाः प्रार्थनं भवति । पण्डितस्तु बाह्यानन्द (?) प्रयोजनश्रमं सुखं न मन्यते । अन्यच्चाय-माज्ञाबाधया प्रीतिविरहेण तदननुकूलेषु प्रवृत्त्यावस्थितविष्टवद् कार्यं करोति । तस्मादतिदुःखस्थानावकाशात् प्रार्थनं न युज्यते । यद्ययं शुभकर्मणाज्ञामात्रं प्रार्थयते अशुभस्कन्धराज्यं प्रार्थयते । तस्माज्जडतरः कोऽपरो भवेत् ]

१७२

§ ४२. अत्राह । स्वर्गपदे नरेषु धर्मफलमैश्वर्यविशेषमुपलभ्यानागतफल-विशेषेच्छाया कः खलु पण्डितः श्रद्धावान् पुण्यानि न कुर्यात् । उच्यते—

**धर्मरागेण रागो ते दृष्ट्वा फलमनागतम् ।**
**अनागतस्य दृष्टान्तं किं नु तत् कुतोऽभयं ॥ २२ ॥**

§ ४३. अनागताभीष्टफलकाम एष कुशलेषु संस्कारेषु रागं पोषयति । तत्फलं तु तदनन्तरमुत्पन्ना दुर्गतिरत्यन्तमनिष्टम् । तत्परित्यागेन फलवद्धर्मेऽप्यास्था त्याज्या । फले धर्मे च रागाभावो हि नूनं परिनिर्वाणधर्मको भवति ॥ २२ ॥

१७३

§ ४४. अन्यच्च फलनिमित्तं शुभमिष्यते—

**पुण्यं सर्वप्रकारेण भृतानां भृतिसन्निभम् ।**
**शुभं न कामयन्ते ये ते कुर्वन्त्यशुभं कथम् ॥ २३ ॥**

यथा भृतकः फलेच्छाया भृत्यर्थं कर्म करोति तथा सोऽपि जनः फलनिमित्तं दानभिक्षायां प्रवर्तते । तस्माद् भृतकवद् भवतीर्तष्टफलनिमित्तं दानादिकर्मणि न प्रयाततव्यम् । तत्र पण्डितानां तस्मान्निवर्तनं नाशङ्कितव्यम् तथाहि—

शुभं न कामयन्ते ये ते कुर्वन्त्यशुभं कथम् ॥

अभीष्टे हि कार्ये स्वपरसुखोद्भवहेतुतया पुण्यकार्ये प्रधाने सति ये तदपि संसारहेतुत्वान्न कामयन्ते ते साम्प्रतं स्वपरात्यन्तानर्थभूतमशुभं कथं कुर्वन्ति । ये भवहेतुरिति पुण्यान्यपि कर्तुं न शक्नुवन्ति ते कथं दुर्गतिमूलमित्यपुण्यानि कुर्वन्ति ॥ २३ ॥

१७४

§ ४५. **जगद् यन्त्रसमूहाभं मायापुरुष सन्निभम् ।**
**येऽपश्यंस्ते व्यक्ततरं गच्छन्ति पदमुत्तमम् ॥ २४ ॥**

यन्त्रं ह्यनेकसूत्रकाष्ठादिभः सम्पद्यते । माया रहस्यमन्त्रमहौषधबलप्रत्ययोद्भूतस्त्रीपुरुषवेशा । यथा यानि विपरीतानि कर्माण्यपण्डितानां संक्लेशहेतवस्तानि खलु तत्स्वरूपपण्डितानां यन्त्रमायाकाराणां स्त्रीपुरुषस्वभावशून्यतादर्शिनां संक्लेशहेतवो न भवन्ति तथा ये जगत् प्रतीत्यसमुत्पादाद् यन्त्रमायादिवत् स्वभावरहितमभावस्वरूपं पश्यन्ति ते विपर्याससमुत्यादितुं संसारमुत्तीर्य पुण्यपापकार्यातीतनिर्वाणपुरैकान्तगा भवन्ति । ।२४ ॥

१७५

§ ४६. तस्मादेवं मायास्वभावस्य अविश्वासधर्मस्वभावस्य च । ( १ ) विज्ञानाम्—

**येषां भवति संसारे न रतिर्विषयैरपि ।**
**एतस्मिन् सर्वथा तेषां रतिर्नैवोपपद्यते ॥ २५ ॥**

योगाचारे चतुःशतके मानुषेष्टसम्भोगाभिनिवेशप्रहाणोपाय सन्दर्शनं सप्तमं प्रकरणम् ॥

विषयरागो हि बालानां संसार स्थितिहेतुः । येषां धर्मस्वभावसुप्रत्यवेक्षणान्न संसारेऽभिरतिर्न चानुकूलेस्वपि देवमानवविषयेष्वभिरतिर्ननु तेषामुद्वेगात्यनुकूलजन्मजराव्याधिमृत्युशोकपरिदेवनासंग्रामविशेषवत्यन्नस्मिन्यभिरतिर्भवेदित्यसम्भवो मन्यते । तेषामिह रतिः सर्वथा नोपपद्यत इत्युच्यते । पण्डितानां हि रतिहेतुविपर्यासप्रहाणात् संसाररति र्न भवति ॥ २५ ॥

अचार्यार्थदेवीये बोधिसत्त्वयोगाचारे चतुःशतके मानुषाभीष्टविषयसम्भोगाभिनिवेशप्रहाणोपायसन्दर्शननामक सप्तमप्रकरणवृत्ति ।

# अष्टमं प्रकरणम्

शिष्यचर्या

१७६

१. यो महता रागबन्धनेन बन्धनसमर्पितत्वादात्मनोऽन्यस्य च रागप्रहाणं न सम्भाव्यत इत्याशङ्कते, तमाह—

**नरेषु प्रतिकूलेषु[1] चिरं स्नेहो[2] न तिष्ठति।**
**एवं सर्वत्र दोषज्ञे चिरं रागो न तिष्ठति॥ १॥**

२. एवं यथा विरुद्धेषु नरेषु स्नेहश्चिरं न तिष्ठति तथा योगिनोऽपि बाह्यान्तरभावानां दोषदर्शनात् कथं सर्वस्माद् विरागो न सम्भाव्यते॥ १॥

१७७

३. इतश्च तत्प्रहाणं[3] सम्भाव्यते रागवस्त्वभावात्[4]। यथा च तद्वस्तु नास्ति[5] तथा प्रतिपादयन्नाह—

**तत्रैव रज्यते कश्चित् कश्चित्तत्रैव दुष्यति।**
**कश्चिन्मुह्यति तत्रैव तस्मात् कामो[6] निरर्थकः॥ २॥**

रञ्जनीयवस्त्वायत्तोदयो[7] हि रागः। तच्च रञ्जनीयं वस्तु स्वरूपासिद्धम्। तथाहि[8]—यदेव ह्येकस्य रञ्जनीयं तदेवापरस्य द्वेषणीयं मोहनीयं[9] वोपलभ्यते। यदि च रञ्जनीयं वस्तु स्वरूपतः स्यात् सर्वदा सर्वस्य च तथैव स्यात्। न त्वेष नियमो दृष्टः। तथाहि— यत्रैको रज्यति तत्रैवापरो दुष्यति तत्रैवापरो मुह्यति।

---

१. V. अनुरूपेषु
२. V. रागो, ''. शब्दस्यास्य नानुकूल्यं, "स्नेहो" इति शब्दोऽनुकूलतरो, तदर्थं वृत्तिर्द्रष्टव्या— तथा कस्याचद् राज्ञः पुत्रोऽतीवापायः (. . नरियः)। स कदाचिद् व्युत्थितः। स तेन राज्ञा संग्रामे निर्जित्य गृहीतः। तस्य च राज्ञस्तद्दोषदर्शनात् ( S. दर्शितत्वात् )। तस्मात् स्नेहो विगतः।
३. S. तन्नप्रहाणं
४. S. रागवस्त्वभावत्वात्
५. S. शब्दस्यास्याभावस्तन्न।
६. S. कार्यो; V. रागो, तत्तु नानुकूलः, वृत्तौ हि कथितः—तस्माद् विषयकामः स्वरूपासिद्धित्वात् शून्यः।
७. T. रञ्जनीयवस्त्वायत्तो
८. S. तथा
९. S. नात्र शब्दो 'मोहनीयं'।

तस्माद विषयकामः[१] स्वरूपासिद्धत्वाच्छून्यः । न चैवं रज्जुनीरूपवस्तुशून्यताभावना-तत्परस्य योगिनो रागप्रहाणं[२] न सम्भाव्यत इति[३] ॥ २ ॥

१७८

५. एवं[४] नास्ति रागादीनामालम्बनस्य स्वरूपसिद्धिः । एवं तावदालम्बना-सिद्धया रागाद्यसिद्धिं प्रतिपाद्य हेत्वसिद्ध्यापि रागाद्यसिद्धिप्रतिपादयितुकाम[५] आह ।

**विना कल्पनयास्तित्वं रागादीनां न विद्यते ।**
**भूतार्थकल्पना चेति को ग्रहीष्यति बुद्धिमान् ॥ ३ ॥**

६. विषयेष्वयोनिशः कल्पना रागादिसिद्धिकारणम्[६] । ततश्च येषां सत्या-मेव कल्पनायामस्तित्वम् असत्यां च कल्पनायां नास्तित्वं[७] ध्रुवं तेषां रज्जुकुण्ड-लके परि[८]कल्पितसर्पवत् स्वरूपासिद्धिरवसीयते । यस्तु स्वरूपासिद्धिं रागादी-नामभ्युपैति नियतं तेन कल्पनापेक्ष्यजन्मत्वं स्वरूपसिद्धिविरुद्धं नाभ्युपेतव्यम् । यदि ह्यसौ भूतोऽर्थः किमर्थं तदर्थं कल्पनापेक्ष्यते । कथमसौ भूतार्थः । इत्येवयं[९] संपपत्तिकागमभासावभासितचित्तसन्तानत्वान् न विद्वांसःस्वरूपसिद्धस्य कल्पना-जनितत्वमङ्गी कुर्वन्ति । जडास्तु कथञ्चिद् विपर्य्यासात्प्रव र्तन्ते ॥ ३ ॥

१७९

७. अत्राह । विद्यत एव रागादीनां स्वभावो बन्धनत्वात् । तथाहि—स्त्री पुरुषविषयेण रागेण पुरुषेण सह बद्धा नातिक्रामति पुरुषम् ! पुरुषश्च स्त्रीविषयेण रागेण स्त्रिया सह बद्धो न परित्यजति[१०] स्त्रियमिति उच्यते—

---

१. T. तस्मात्कामः
२. T. 'न' इति निषेधात्मकशब्दस्याभावः । cf. सर्वदर्शनसंग्रह (B1) पृ०१५.
३. S. इति विद्यत एव रागप्रहाणम् ।
४. T. एवमितिति शब्दाभावः ।
५. T. प्रतिपादयितुम् ।
६. T. रागादिक्लेशकारणं हि विषयेष्वयोनिशः कल्पना ।
७. S. असत्यां च कल्पनायां नास्तित्वमित्यंशाभावः ।
८. T. परीतिशब्दाभावः ।
९. T. इतीति शब्दाभावः
१०. T. त्यजति

**कस्यचित् केनचित् सार्धं बन्धो नाम न विद्यते[1] ।**
**परेण सह बन्धस्य[2] विप्रयोगो न युज्यते ॥ ४ ॥**

८. यथैव[3] हि रागः कल्पनापेक्ष्यजन्मत्वात् स्वभावासिद्धस्तद्वत् स्त्रीपुरुषयोरपि स्वरूपासिद्धत्वात् कस्यचिदर्थस्य केनचिदर्थेन सह नास्ति स्वरूपतो बन्ध इति न बन्धकारणत्वाद् रागः स्वरूपतः सिध्यति । अथावप्यवधूयेत्थं विचारं परेण सह परस्य बन्धः परिकल्प्यते[4] एवमपि परेण सह बन्धस्य विप्रयोगो न युज्यते ।

९. विप्रयोगो विमोक्षो विमुक्तिरित्यनर्थान्तरम्[5] । यदि हि स्वरूपस्य परेण[6] बन्धकारणत्वं स्यात् तदा स्वरूपस्यान्यथाभावासम्भवान् मुक्त्यभाव एव[7] स्यात् । अस्ति च मुक्ति[8]रिति नास्ति बन्धनकारणत्वं रागस्य[9] । असति च[10] बन्धनकारणे कुतो बन्ध इति स्वभाव शून्या एव रागादयः स्वभावशून्यतादर्शनात् प्रहीयन्त इति शक्यमास्थातुम् ॥ ४ ॥

१८०

§ १०. यद्येवं विचारात् क्लेशा निवर्तन्ते तत् किमित्यजितक्लेशाः प्रायो दृश्यन्ते । गम्भीरधर्माधिमुक्तिविरहात् । तथाहि—

**अस्मिन् धर्मेऽल्पपुण्यस्य सन्देहोऽपि न जायते**
**भवः सन्देहमात्रेण जायते जर्जरीकृतः ॥ ५ ॥**

§ ११. अनादिसंसाराभ्यस्तविपर्यास[11]दर्शनो । ह्यविद्वान् प्रतिबिम्बोपमेषु

१. V. युज्यते
२. V. बद्धस्य
३. T. एवं, तथा
४. T. कल्प्यते
५. S. वाक्यमिदं "यदि ही एवं स्या" दिति वाक्यानन्तरे शास्त्रिभ महोदयेन युज्यते ।
६. S. परस्य स्वरूपतो
७. T. नाऽत्र 'एवं शब्दः
८. T. विमुक्ति
९. S. परस्य रागस्य
१०. S. असति चेति शब्दाभावः
११. S. सन्दर्शनो

पश्यन्निदं सत्याभिनिविष्टः स्वभाव[1]शून्यतोपदेशं प्रपातमिव मन्यते । शून्यताधि-मुक्ति[2]हेतुकुशलमूल[3]विरहितचित्तसन्तानत्वात् तथाविधस्य सत्वस्यास्मिन्[4] विप-रीतविनिश्चयविनिर्मुक्ते[5] शून्यताधर्मे किमेवं नैवमिति सन्देहोऽपि न जायते, अन्यत्र विपरीतनिश्चयात्[6] । ततश्च मुक्तिहेतुविपर्ययत्वात् कुतोऽस्य मोक्षः[7] । यदि स्वयं केनापि[8] हेतुना शून्यताधर्मे सम्य[9]गुपदिश्यमाने संशयमुत्पा-दयेत् किमयं धर्म एवं[10] नैवमिति निश्चितमस्यानेनापि सन्देहमात्रेण जर्जर[11] एव संसारो[12] जायते । सन्देहकालेऽपि जर्जर एवास्य संसार लक्ष्यते तद्भे[13]दानुकूला-वस्थावस्थितत्वात् ॥ ५ ॥

१८१

§ १२. अपि च[14] योऽयं स्वभावशून्यता लक्षणो धर्मो यस्मिन् सन्देहोऽपि भवस्य जर्जरत्वाय संवर्तते[15] तस्य भगवता प्रथमक्षान्तिक्षणमुपादाय यावन् मोक्ष-स्तावदपरिहाणिर्वृद्धिश्चोपवर्णिता । न त्वेवं लौकिकानां धर्माणाम् । ते हि विपाकक्षयादपि क्षीयन्ते प्रत्ययवैकल्यादपि न प्रवर्तन्ते । न हि प्रज्ञापारमिता-निधिष्ठिता दानादयः समर्था जात्यन्धा इव सर्वज्ञतानगरमनुप्राप्तुमित्युवाच शास्ता । तदेवम् —

आ मोक्षाद्यस्य[16] धर्मस्य वृद्धिमेवोक्तवान् मुनिः ।
तत्र भक्ति र्न यस्यास्ति सुव्यक्तं बुद्धिमान् न सः ॥६॥

---

१. T. नाऽत्र स्वभावेति शब्दः
२. S. शून्यविमुक्ति
३. S. मूलेति शब्दाभावः
४. S. मतस्यास्मिन्
५. नाऽत्र शब्दोऽयंविद्यते
६. B. शब्दस्यास्याभावः
७. T. मोक्षदर्शनम् ।
८. T. केनापि एकेन
९. S. उपदिश्यमाने
१०. T. नाऽत्र शब्दोऽयम् ।
११. जीर्ण
१२. संसारभावो
१३. तद्भेदोन्मूलनानुकूला...।
१४. S. नाऽत्र शब्दायऽमिति ।
१५. T. जर्जरत्वहेतुर्भवति ।
१६. T. आत्मा क्षाद्यस्य ।

§ १३. यो ह्यत्यन्तोपकारिणि धर्मे वृद्धिप्रकर्षवति नोत्पादयति भक्तिं स[1] क्षेमस्थाने[2] भयदर्शित्वान्[3] मूढता[4]मेवात्मनो जड:[5] प्रकटयति । तदित्थं मूढता मा भून्ममे[6]ति विद्वद्भिः स्वभावशून्यता दर्शने भक्तिरास्थेया ॥ ६ ॥

१८२

§ १४. किं पुनरिमे पदार्था अशून्या[7] एव वैराग्यार्थं शून्यवद् दृश्यन्ते अथ प्रकृत्यैव शून्या[8] इति व्यपदिश्यन्ते । उच्यते—

**नाशून्यं शून्यवद्दृष्ट्वा निर्वाणं मे भवत्विति ।**
**मिथ्यादृष्टेर्न निर्वाणं वर्णयन्ति तथागताः ॥७॥**

§ १५. अन्यथावस्थितस्य वस्तुनो यदन्यथा दर्शनं[9] तन्मिथ्यादर्शनम् । यदि च स्वभावाशून्याः[10]सन्तः पदार्थाः स्वभावशून्या इति दृश्येरंस्तदा मिथ्यादर्शनादेवनिर्वाणाधिगमः[11] स्यात् । न च मिथ्यादृष्टेः पुद्गलस्य निर्वाणाधिगमं बुद्ध्वा भगवन्तो व्यवस्थापयन्ति । सम्यग्दृष्टिपुरःसरेणैव यथा निर्वाणप्राप्तिमवस्थानात् । ततश्च मायावत् प्रतीत्यसमुत्पन्नत्वात् स्वभावशून्या एव सन्तो भावाः शून्या स्वभावेनेत्यधिगम्यन्ते ॥ ७ ॥

१८३

§ १६. ननु परमार्थत्वात्[12] स्वभावशून्यतैव केवल[13]मुपदेष्टव्येति । नैनदेवम् । नैव हि लौकिकं प्रवृत्यात्मकं परमार्थात्[14]पूर्वमनुपदिश्य[15]शक्यं स्वभाव-

---

१. T. स मूढः ।
२. T. त्यक्तस्थाने ।
३. तस्माद्भयदर्शित्वात् ।
४. T. जडताम् ।
५. T. 'जड' इति शब्दाभावः ।
६. T. ममेति शब्दाभावः
७. S. शून्या
८. प्रकृत्या शून्यैव
९. T. परिदर्शनम् ।
१०. S. शून्याः ।
११. S. शून्याः ।
१२. S. स्वभावपरमार्थत्वात् ।
१३. T. एका ।
१४. S. परमार्थं ।
१५. S. सदुपदिश्य ।

शून्यतालक्षणं[1] तत्वमादर्शयितुमिति । तस्मात्[2] तत्वावतारसोपानभूतत्वात्[3] प्रवृत्त्युपदेशोऽपि कर्तव्यः । सर्वसङ्कल्पपरित्यागेन निर्वाण[4]सुखावाप्तिहेतुः[5] स्वभावशून्यतोपदेशोऽपि कर्तव्यः । तदत्र तथागते प्रवचने—

* लौकिकी देशना यत्र प्रवृत्तिस्तत्र वर्ण्यते ।
परमार्थकथा यत्र निवृत्तिस्तत्र वर्ण्यते ॥८॥

§ १७. यत्र संसार प्रवृत्तिक्रमोऽविद्यासंस्कारादिना क्रमेणाहेत्वेकहेतुविषम-हेतुविनाशार्थं स्वसामान्यलक्षणसत्यत्व[6]कल्पनया देश्यते ज्ञातव्यं विदुषा प्रवृत्ति-क्रमस्तत्र वर्ण्यत इति । यत्र तु प्रतीत्यसमुत्पादस्य स्वभावानुत्पादेन[7] स्वभावशून्य-तोपदिश्यते[8] तत्र संसारप्रवृत्तेनिवृत्तिर्वर्ण्यते ॥८॥

१८४

§ १८. यद्येवं परमार्थकथायां न किञ्चिदस्ति शून्यत्वात् सर्वभावानां तदा सर्वाभावः प्रसज्यते । सर्वाभावाच्च न किञ्चित् कर्तव्यं स्यात् कर्तृ[8]कर्मक्रिया[9]दीनां सर्वथाभावात् । अभावाच्च क्रियादीनां[10] न स्यात् मोक्ष इति सर्वमेवायुक्तमिति । उच्यते—

* किं करिष्याम्यसत् सर्वमिति ते जायते भयम् ।
विद्यते यदि कर्तव्यं नायं धर्मो निवर्तकः ॥९॥

१९. यत एव हि सर्वमसदत एवायं परमार्थधर्मः प्रवृत्तिनिवर्तको युज्यते । तत् किमिति निवृत्यर्थी क्रियाद्यधिष्ठानसर्वाभावं[11] न समीहते । अथायऽपि[12] प्रवृत्ताविव कर्तव्यं स्यात् तदा क्रियाफलस्यापि पदार्थस्य प्रवृत्तेः सैव प्रवृत्तिरिति कथमयं धर्मो निर्वाणवाहकः स्यात् ॥९॥

---

१. S. स्वभावशून्यतालक्षणतत्वं ।
२. S. तन्मतानुसारेण शब्दस्यास्थाभावः ।
३. T. तत्त्वामृतावताराधिकारभूतत्वात् ।
४. S. निवृत्ति
५. S. निमित्तं
६. T. सत्यभाव, S. संज्ञाव
७. S. स्वभावानुत्पादेन प्रतीत्यसमुत्पादस्वभावशून्यतोपदिश्यते
८. T. कतृकर्मक्रियाकार्यादीनां
९. T. कार्यादीनां
१०. S. सर्वभावं क्रियाद्यनधिष्ठानं
११. T. तत्रापि, S. अथ हि नामात्रापि

१८५

§ २०. निवर्तके धर्मे न किञ्चित् कर्मास्ति तस्माच्छून्यपक्षः श्रेयानिति यस्तु शून्यतामार्गे रज्यति विपरीतस्वभावे च पक्षे दुष्यति तमुपालभते—

*** स्वपक्षे नियते रागः परपक्षस्तु तेऽप्रियः।**
**न गमिष्यसि निर्वाणं न शिवं द्वन्द्वचारिणः ॥ १० ॥**

§ २१. द्विविधो हि पक्षः समासतः स्वपक्षः परपक्षश्च। तत्र यदि स्वपक्षे ते रागो[1]ऽस्ति स्वभावशून्यतापक्षः[2] श्रेयानीति, परपक्षश्च ते मिथ्येति कृत्वा[3]प्रियो न गमिष्यसि निर्वाणम्। न ह्यनुनय[4]प्रतिघहतस्य द्वन्द्वचारिणो निर्वाणमस्ति। सर्वत्र हि सन्त[5] उदासीनाः सङ्गच्छेदादनपायसुखैकरसं शिवमाप्नुवन्ति ॥ १० ॥

१८६

§ २२ अत्राह। यद्यपि निर्वाणं परमसुखं सकलोपद्रवरहितत्वात् तथापि तदशक्यं प्राप्तुं तत्प्राप्तुपायाचरणस्या[6]तिदुष्करत्वात्। भवस्त्वयत्नसाध्यत्वाद् यस्मात्[7] सुखेन[8] प्राप्यते तस्मात् तत्रास्माकं[9] प्रवृत्तिरिति[10]। उच्यते विपरीत मवधारितम्। यस्मात्[11]—

*** अकुर्वाणस्य निर्वाणं कुर्वाणस्य पुनर्भवः।**
**निश्चिन्तेन सुखं प्राप्तुं निर्वाणं तेन नेतरः ॥ ११ ॥**

§ २३. सर्वासु[12] कुशलादि[13] क्रियासु निरस्तव्यापारेण निश्चिन्तेन निर्वाणम-वाप्यते[14]। तस्मात् सुखं प्राप्तुं निर्वाणम्। कुशलाकुशलादि[15]प्रवृत्ति साध्यत्वात्

---

१. T. रागोऽभिनिवेशोऽस्ति।
२. S. स्वभावशून्यपक्षः।
३. T. मिथ्येति कृत्वेति स्थाने अन्यः सम्यग् न भवतीति ज्ञात्वा।
४. S. ह्यत्र
५. S. "सन्त" शब्दस्याभावः।
६. S. तत्प्राप्त्युपायाचरणस्यापायस्यातिदुष्करत्वादिति।
७. T. यस्मात् शब्दस्याभावः
८. T. सुसिध्यति सुखेन सिध्यति वा।
९. S. अस्यामिति शब्दस्याभावः
१०. S. न प्रवृत्तिरिति।
११. T. तथाहि
१२. T. यस्मात्सर्वासु
१३. B. क्रियासु
१४. T. नायं शब्दोऽत्र विद्यते।
१५. T. कुशलाकुशलप्रवृत्तिसाध्यत्वात्।

तु निर्वाणविस्तरः पुनर्भवो न सुखेन प्राप्यते । न विदुषोऽप्यल्पलभ्यं निर्वाण-मवधूय युक्तं विविधव्यापारपरिखेदलभ्यं पुनर्भवमर्थयितुम् ॥ ११ ॥

१८७

§२४. यदि खल्वकुर्वाणस्य निर्वाणं[1] किमर्थं त्वयात्र शास्त्रे अनित्यावर्ण प्रतिपादनं क्रियत इति[2] । उच्यते[3] । संसाररक्तं[4] जगत् । संसारादुद्वेजनार्थम्[5] । तथाहि—

* उद्वेगो यस्य नास्तीह भक्तिस्तस्य कुतः शिवे ।
निर्गमश्च भवात्स्मात् स्वगृहादिव दुष्करः ॥ १२ ॥

§ २५ संसारादुद्विग्नचेतस[6]स्तन्निःसरणाय[7] निर्वाणं भजन्ते । यस्य तु नास्त्युद्वेगः स किमिति तदर्थयेत्[8] उ[9]द्वेगाभावादेव च भवान् निर्गन्तु[10]मल्प-बुद्धयो नोत्सहन्ते । इह यथा स्वगृहमल्पसारमपि व्यासङ्गपरिच्छेदस्य दुष्कर-त्वान् न त्यक्तुं पार्यते तादृशमेतत् ॥ १२ ॥

१८८

§ २६. विषयसुखसम्भोगसुलभानि[11]गृहाणि त्यक्तुमाढ्यानां मा भूत् सामर्थ्यं[12] निर्वाणं[13] च गन्तुम् । येषां तु व्याधिदारिद्र्यादीनां दुःखहेतूनां प्रतिविधानासम्भ-वस्तेषां युक्त एव संसारानन्दपरित्यागः । तथाहि—

* दुःखाभिभूता दृश्यन्ते केचिद् मरणकाङ्क्षिणः ।
ते तदा केवलं मोहान्न गच्छन्ति परं पदम् ॥१३॥

---

१. S. तन्निर्वाणं
२. S. इति' शब्दाभावः
३. S. नात्र शब्दोऽयम् ।
४. S. संसारभुक्तम् ।
५. T. उद्वेजनीयमिति।
६. T. बहुवचनम्, S. एकवचनम् ।
७. S. निःसारणाय
८. S. अर्थयते ।
९. S. तदुद्वेगाभावादेव ।
१०. T. संसारान्निःसर्तुम् ।
११. T. विषयसुखसम्भोगानुभवानि ।
१२. S. तत्सामर्थ्यम् ।
१३. T. निर्वाणं प्राप्यम् ।

§ २७. व्याधिदारिद्र्येष्टविप्रयोगदुःखातुराः[1] केचिदात्मस्नेहमपास्यातटादात्मानमुत् सृजन्ति अभ्युदकप्रवेशादीन्यपि[2] कुर्वन्ति। तथैव यदि संसारं दुःखतो निर्धा[3]र्यात्मस्नेहमत्यन्त[4]मुद्धरेयुरदूरे निर्वृतिसुखस्यवर्तेरन्। विपर्यासितदर्शनास्तु[5] महामोहात्[6] तथा न प्रवर्तन्ते येन[7] निर्वाणमासादयन्तु[8] ॥ १३ ॥

१८६

§ २८. यद्येवं सर्वभवपरित्यागेना[9]जरामरणं पदं[10]निर्वाणमेवैक[11]मर्थनीयम्। तत्प्राप्तये भावना कथैवास्तु। किमर्थं[12] भगवता दानशीलकथे अपि विहिते इति। उच्यते। त्रिविधो[13] हि सत्त्वधातुर्हीनमध्यमोत्तमभेदात्। तद्भेदाच्च[14] भगवतो [ महोपायवतो महाकारुणिकस्य आशयप्रमादशयनज्ञस्य धर्म[15] ] देशनावैचित्र्यम्। तत्र तेन भगवता[16]—

**निकृष्टस्योच्यते दानं मध्यस्य शीलमुच्यते।**
**उत्तमस्योच्यते शान्तिस्तन्नित्यमुत्तमं कुरु ॥ १४ ॥**[17]

§ २९. हीनस्य पुद्गलस्य दानमेव न शीलं भावना च। तयो र्द्वयोरभाजनत्वात्। मध्यमस्य शीलमेवोक्तं न दानं न च भावना। दानस्य निष्ठितत्वाद् भावनासामर्थ्यभावाच्च उत्तमस्य भावेनैवनोक्ते दानशीले। तयो र्निष्ठितत्वात्।

---

१. S. व्याधिविप्रयोगदुःखान्वितः।
२. S. शब्दस्यास्याभावः।
३. S. निवार्य।
४. S. अत्यन्तायम्।
५. T. असद्विपर्यासितदर्शनास्तु विपर्यस्ता
६. S. मोहात्
७. S. ये,
८. S. नासादयन्तु।
९. S. सर्वपरित्यागेन।
१०. S. निर्वाणपदम्।
११. S. निर्वाणमेवार्थम्।
१२. S. तत्किमर्थम्।
१३. T. विविधो।
१४. S. तद्भेदार्थम्।
१५. S. नाऽत्र वाक्यमिदं विद्यते।
१६. S. नाऽत्र वाक्यमिदं विद्यते।
१७. V. हीनस्य दानं निर्दिष्टं शीलं मध्यस्य चैव।
शिवमग्रयस्य कथितं तस्मादग्रयं सदा श्रुतं ॥

§ ३०. तत्र दानेन महाभोगः। शीलेन स्वर्गगतिः। भावनया क्लेशनिरोधो निरुद्धत्वान्निर्वाणमिति न सर्वस्य निर्वाणमुच्यते। तस्मात् स्वयमुत्तमो भवेति निर्वाणायाभिरतिं कुरु ॥ १४ ॥

१६०

§ ३१. उत्तमभूतत्वात् प्रथमतरमेव निर्वाणकथा न कार्या—

* वारणं प्रागपुण्यस्य मध्ये वारणमात्मनः।
सर्वस्य वारणं पश्चाद् यो जानीते स बुद्धिमान् ॥१५॥[१]

§ ३२. शासनेऽस्मिन् क्रमेण सर्वं संस्कृतं वारयितव्यम्। तत्रेह तावत् सर्वस्यापुण्यपक्षस्य वारणं प्रथमं कर्तव्यं दृष्टादृष्टनानादोषशतहेतुरिति। सुप्रहाणं प्रथमं वारयितव्यम्। पापवारणेन स्कन्धधात्वायतनेष्वात्मा पञ्चविधोऽपि[२] न सम्भाव्यत इति विंशत्यंशात्मदृष्टि[३]स्त्याज्या। पश्चादात्मस्नेहसम्यगुपदेशेन स्कन्धधात्वायतनस्नेहोऽपि परित्याज्य इति सर्वं वस्तु वारणीयम्।

§ ३३. तदेवं बुद्धिमतोऽस्यानादानात् परिनिर्वाणम्। एवं क्रमद्वारा यस्तत्सर्ववारणोपायं जानाति स बुद्धशासनविचक्षण इत्युच्यते ॥१५॥

१६१

§३४. अपि च। कथं पुनर्विनैवादानं प्राप्स्यत इति। सर्वेषां भावानां निःस्वभावत्वदर्शनात्। यदि भावाः अनन्ताः कथं स विषयी तान् द्रष्टुं शक्नुयादेकमपि धर्ममपरिजानन्नप्रजहद्। दुःखेनाप्यन्तकरणं न सम्भाव्यते। एवमेव भगवतं-कक्षणया प्रज्ञया यदीषज् ज्ञातव्यं द्रष्टव्यं प्रत्यक्षीकर्तव्यं च तत् सर्वं प्रत्यक्षमुक्तमित्यभ्यस्यते। तस्मादेवं द्रष्टव्यमिति। उच्यते —

---

१. इयं कारिका माध्यमिक वृत्तावपि ( पृ० ३५६ ) द्रष्टव्या।
२. रूप वेदनासंज्ञासंस्कार विज्ञानस्वरूपः
३. १- रूपमात्मा स्वामिवत्, २- रूपवान् आत्मा अलंकारवत्, ३- आत्मीयं रूपं भृत्यवत्, ४- रूपात्मा भाजनवत्, ५- वेदनात्मा, ६- वेदनावान् आत्मा, ७- आत्मीया वेदना, ८- वेदनायामात्मा, ९- संज्ञात्मा, १०- संज्ञावान् आत्मा ११- आत्मीया संज्ञा, १२- संज्ञायामात्मा, १३- संस्कारात्मा, १४- संस्कारवान् आत्मा, १५- आत्मीयाः संस्काराः, १६- संस्कारेष्वात्मा, १७- विज्ञानमात्मा, १८- आत्मीयं विज्ञानम्, १९- विज्ञानात्मा। —महाव्युत्पत्ति, २०८

* भावस्यैकस्य यो द्रष्टा द्रष्टा सर्वस्य स स्मृतः ।
एकस्य शून्यता यैव सैव सर्वस्य शून्यता ॥१६॥[1]

§ ३५. रूपस्य या स्वभावशून्यता सैव वेदनादिस्कन्धानां स्वभावशून्यता एवं चक्षुरायतनस्य या स्वभावशून्यता सैवाष्टादशानां धातूनामपि । एवं भावविषय कालाधाराणां (?) नानाविधेस्वनन्तप्रकारेषु प्रथर्मस्यैकस्य या स्वभावशून्यता सैव सर्वेषां भावानां स्वभावशून्यता ॥१६॥

§ ३६. अत्राह । यदि सर्वे धर्मा शून्या इति हेया । एवं भिक्षव आदरः क्रियते । कृत्वा चादरं कृतस्य पुण्यस्य विपाककामेन दुःखं व्यसनमिष्टं च पृथगनुभूयत इति किमित्युक्तम् । नेदं विरुद्धम् । कुतः—

उच्यते स्वर्गकामेभ्यो धर्मे रागस्तथागतैः ।
तस्यैव मोक्षकामेभ्यो निन्दान्या तु किमुच्यते ॥ १७ ॥[2]

§ ३७. धर्मे रागो हि तदुपायस्वरूप इत्यवश्यं कर्तव्यः । पुण्यानि कर्तुं योग्यानि । अकृतपुण्यस्य दुःखम् । कृतपुण्यस्यास्मिंल्लोके परत्र चानन्दः । इति बुद्धेन भगवता कामिनो दुर्गतिगमनेन भयं भयभावनाऽसमर्थेभ्य उक्तम् । न मोक्षकामेभ्यः ! तेषां धर्मकामः संसारकाराबन्धनमेव । यतो धर्मपर्यायो नौवत् ।

§ ३८. सर्वेऽपि धर्मेषु हेयेषु किं पुनरधर्माणां कथनेन । उक्तत्वात् । विमुक्तिसुखकामस्य कश्चिदपि रागो न ज्ञायते । तद्धि निरवशेषरागच्छेदनेन प्राप्यमिति । अजितसूत्रवत् । यदा भगवाञ्छाक्यमुनिर्वाराणस्यां [तदा] त्वमनागते काले तथागतोऽर्हन् सम्यक्सम्बुद्धो मैत्रेयो भविष्यसि । अपि च तदा चक्रवर्ती राजा शङ्खो

---

१. V. भावस्यैकस्य या दृष्टिः सैव सर्वस्य कथ्यते ।
एकस्य शून्यता यस्ति सैव सर्वस्य शून्यता ॥

तुलनार्थम् द्रष्टाव्या—

जे एगं जाणइ से सव्वं जाणइ । जे सव्वं जाणइ से एगं जाणइ ॥
—अचाराङ्गसूत्र, १.३.४.१(PTS.p.11)

एको भावः सर्वथा येन दृष्टः सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा एको भावः सर्वथा तेन दृष्टः ॥

—स्याद्वादमञ्जरी, पृ.४, ११२; षड्दर्शनसमुच्चय, पृ.२२२

२. V. उक्तस्तथागतैर्धर्मानुरागः स्वर्गकाङ्क्षिणाम् ।
मुमुक्षूणां तथान्यत्र तत्त्वमेवोपदिश्यते ॥१७॥

नाम भविष्यति । तस्मिन्नेव कुमारे परिनिर्वाणे महान्तमादरं कृत्वा प्रव्रज्याहत्त्वेन परिनिवृतो भविष्यसि । बोधिसत्त्वोऽजितो नाम देशनां करिष्यति । ततस्तत्परिवार मध्येऽजितो नाम भिक्षुर्भविष्यति । स हन्ताहं चतुर्द्वीपेश्वरश्चक्रवर्ती शङ्खो भवेयमिति प्रणिधानं विधाय भगवतैवं दुःखं धारयितव्यमिति प्रव्रज्य त्वं दुःखमेव कामयसे जड़ः पुरुषोऽसीति निन्दितः । तद् देशयित्वा भगवांस्तस्य क्षणमात्रस्यापि भवस्याभिसिद्धिं न प्राशंसत् । तत् किमिति । भिक्षूणां भवाभिसिद्धिर्दुःखम् । सैवं निन्दता ॥१७॥

१९३

§ ३९. अत्राह । यदि शून्यतया निरस्तेन रागेण दुःखोल्लासो निवर्तते तदा समस्तदुःखसमुपच्छेदहेतुत्वेनैकं तत्त्वमुपदेष्टव्यम् । तन्नैवम् । भाजनविशेषस्यापेक्षणात् । तथाहि । अभाजनस्य शासनाच्छून्यता ह्याहारदोषस्य पानभोजनादिवदनर्थहेतुर्भवति । सोऽनधिकाधिमोक्षेण भगवतः शून्यतां त्यजेद् । शून्यतार्थं सर्वाभावार्थं विपर्यासेन परीक्ष्य विपर्यस्तदर्शनेन दुर्गतिं वा गच्छेत् । तस्मात्—

शून्यता पुण्यकामेन वक्तव्या नैव सर्वदा ।
ननुप्रयुक्तमस्थाने गरलं ननु जायते ॥[1]१८ ॥

§ ४०. इह कृपालुना पुण्यकामानां सत्त्वानामनुग्रहेच्छया प्रथमं सत्त्वानपरिपाच्यापक्वकुशलमूलेभ्यः शून्यता न वक्तव्या । निरर्थकत्वात्

१९४

§ ४१. तस्मात् सत्त्वानां चित्तसन्तानकर्म कुर्तुमुचितमिति प्रथमतरमेव लौकिका भाषा यथावस्थिता वक्तव्याः । तत्र ते विचक्षणाः शून्यतायां सुखेन प्रवर्तन्त इति । तत एव ।

---

१. V. सर्वदा नैव वक्तव्या पुण्यकामेन शून्यता ।
अयोगयुक्तं भैषज्यं गरलं किं न जायते ॥ १८ ॥

मूलकारिका सुभाषितसंग्रहे (पृ० ११ ) प्राप्ता—

शून्यता पुण्यकामेन वक्तव्या नैव सर्वदा ।
ननु प्रयुक्तमस्थाने जायते विषमौषधम् ॥

यथोक्तम्—

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम्[2] ॥

पञ्चतंत्र, १, ३८९

**आदौ दानादिकथया चिरास्योत्पाद्य साधुताम् ।**
**धर्मस्य भावनाऽगन्धवस्त्रवज्जनवत् कृता ।।**

इत्युक्तं । एतदर्थप्रतिपादनायोपमामाह—

*** नान्यया भाषया म्लेच्छः शक्यो ग्राहयितुं यथा ।**
**न लौकिकमृते लोकः शक्यो ग्राहयितुं तथा ।। [1]१६ ।।**

§ ४२. यथा म्लेच्छोन्यां भाषां न जानातीति स्वभावयैवोपदेष्टव्य एवं लोकोऽपि लौकिक भावव्यवस्था द्वारा तत्त्वं प्रवेष्टुं शक्नोति ।[2]

बालदारकवत् । यथा बालदारको नान्यया भाषया शक्यते बोधयितुं तथा पृथग्जनो लोकः ।। १६ ।।

१६५

§ ४३. अतएव लोकावतारोपायत्वात्[3] सदसदादिदेशनानां भगवता—

*** सदसत् सदसच्चेति नोभयं चेति कथ्यते ।**
**ननु व्याधिवशात् सर्वमौषधं नाम जायते ।। २०[7] ।।**

§ ४४. सर्वाभावदर्शनमलक्षालनाय भगवता विनयेभ्यः सदिति कथितम्[4] । सर्वभावाभिनिवेशप्रहाणाया[5]सदिति[6] कथितम् । उभयाकारदर्शनत्यागाय सदसदित्यावेदितम् । सर्वाकारप्रपञ्चोच्छेदाय नोभयमिति प्रकाशितम् । अपि च त्वमेव तावद् विचारय ।

---

१. माध्यमिकवृत्ति पृ०३७०, JA, १६०२, ११. पृ०२५७
माध्यमिककारिका, पृ० १२०

२. यथोक्तं—
जह ण वि सक्कमणज्जो अणज्जभासं विणा दु गाहेदुं ।
तह वोहारेण विणा परमत्थुवदेसणमसक्कं ।।[1]
१. माध्यमिकवृत्ति पृ० ३७०, माध्यमिकावतार, Tib पृ० १२०, cf.
माध्यमिक वृत्ति पृ०३७०, माध्यमिकावतार, पृ०१२० समयप्राभृत, १, ८.

३. T. लोकग्रहणोपायत्वात्
४. S. सर्वभावदर्शनमलक्षालनाय सदिति कथितम् ।
५. S. भावाभिनिवेशप्रहाणाय ।
६. T. किञ्चन्नास्तीति ।
७. माध्यमिकवृत्ति, पृ० ३७२

§ ४५. ननु व्याधिवशात् सर्वमौषधं नाम जायते । व्याधयः प्रतिविधातव्याः । तेषां च निदानभेदादनेकमौषधम् । नैकमेव सर्वत्रोपयुज्यते । तादृशमेतत् ॥ २० ॥

१९६

§ ४६. आसां च सदसदादिदेशनानामध्यात्मचिन्ता प्रवृत्तत्वाद्[1] यैषा नोभयदेशना सा[2] परमार्थदेशना । तस्मिंश्च परमार्थे[3]—

* सम्यग् दृष्टे परं स्थानं किञ्चिद्दृष्टे शुभा गतिः ।
तस्मादध्यात्मचिन्तायां कार्या नित्यं मतिर्बुधैः ॥ २१ ॥

§ ४७. परमार्थज्ञानेन खलु सम्यग्दृष्टे परमार्थे[4] प्राप्यते परं स्थानं निर्वाणम् । किञ्चिद् ईषद्[5] दृष्टे शुभा देवमनुष्यगतिर्भवति । यस्माच्च सम्पूर्णे[7] ज्ञानदर्शने निर्वाणं प्राप्यते असमाप्ते च शुभा गतिस्तस्यादध्यात्मचिन्तायां विदुषा नित्यमेव बुद्धिः कर्तव्येति ॥ २१ ॥

१९७

§ ४८. एवमस्याध्यात्मचिन्तायां नियतं फलं निर्वाणं प्राप्यते । अथ कुतश्चित् प्रत्ययवैकल्यात्—

* इह यद्यपि तत्त्वज्ञो निर्वाणं नाधिगच्छति ।
प्राप्नोत्ययत्नतोऽवश्यं पुनर्जन्मनि कर्मवत् ॥ २२ ॥

§ ४९. यद्यपीह जन्मनि तत्वदर्शनाभियुक्तो विरागावसान[10] न लभते परमार्थज्ञाननिस्यन्दा[11]दप्रयत्नादवश्यमेव पुनर्जन्मनि स निर्वाणं प्राप्नोति कर्मवत् ।

---

१. S. चिन्ताप्रवृत्तत्वात् ।
२. S. ऐषा
३. T. तस्यां च परमार्थदेशनायाम् ।
४. T. तस्मिन् परमार्थे
५. S. ईषत् किञ्चित्
७. T. सम्पूर्ण
८. T. पर जन्मनि अनुजन्मनि वा, तुलनार्थम्-माध्यमिकावतार पृ० २ ।
९. माध्यमिकवृत्ति, पृ० ३७८
१०. तुलनार्थम् महाव्युत्पत्ति, २६७. २
११. परमार्थज्ञानसिद्धे

यथा नामेह[1] कृतस्य नियतं[2] कर्मणः फलं यद्यप्यस्मिन् जन्मनि नास्ति[3] तस्य त्ववश्यमेवान्यजन्मनि फलं भवति ॥ २२ ॥

§ ५०. यद्येवं तत्वज्ञानमस्ति किमर्थं[4] मुक्ता न दृश्यन्ते । दृश्यन्त एव[5] च केचित् । अपि खलु—

* सर्व कार्येषु निष्पत्तिश्चिन्त्यमाना सुदुर्लभा ।
न च नास्तीह निर्वाणं युक्ता मुक्ताश्च दुर्लभा ॥ २३ ॥

§ ५१. न च केवलं निर्वाणमेव दुर्लभम्[6] । अपि खलु सर्वारम्भा दुखसेय-फलारम्भाः । न च चिन्तैव फलसाधिका । किं तर्हि । हेतुप्रत्ययसामग्रीसमोहित-फलसाधिका । सा[7]प्यतिदुर्लभा । तस्मादिह चिन्तया[8] सर्वकार्येषु सुदुर्लभा निष्पत्तिः । तस्मादिह सुगतशासने[9] यद्यपि निर्वाणं समोहितमस्ति[10] तथापि कल्याणमित्रविरहाद्[11] योनिशो मनस्काराभावाच्च[12] युक्ताः सुदुर्लभाः । ततो[13] मुक्ता अपि दुर्लभा भवन्ति । अस्मान्नशक्यं मुक्तादर्शनात् तत्वदर्शना-भावः[14] प्रतिपत्तुम् ॥२३॥

१६६

§ ५२. केचिद् बाला हीनमात्मानं मन्यमाना नोत्सहन्ते बुद्धत्वं[15] घटयितुम् । यदि पुनर्न्यायेन घटेरन् लभेरन् बुद्धत्वमवश्यम् । कथं पुनरेतदवसातुं शक्यं यदेवं चिरकालप्रवृत्तस्य क्लेशगणस्य क्षयोऽस्तीति । उच्यते—

---

१. T. मोह
२. S. नियतस्य
३. T. नास्ति निरुद्धाद्बीजादनन्तरमङ्कुरपत्रपुष्पफलादिवत्
४. T. किम्
५. T. शब्दाभावः
६. S. केवलं विराग एव दुर्लभदर्शनः
७. S. हेतुप्रत्ययसामग्री
८. T. चिन्तायां
९. S. शासने
१०. S. निर्वाणमस्ति
११. S. वैकल्याद्
१२. S. विकल्पाभावाच्च
१३. S. यस्मात् ततो
१४. S. दर्शनादत्तभावः
१५. S. बुद्धत्वाय

* भुत्वा शरीरनैर्गुण्यं क्षणं रागो न तिष्ठति ।
प्राप्तस्तेनैव मार्गेण सर्वस्यापि ननु क्षयः ॥२४॥

§ ५३. यथेह चिरकालं ममत्वाभिरक्षितस्य शरीरस्य विचित्रैर्भोगैरूप-लालितस्यापि विनाशधर्मिणोऽकृतज्ञस्य नैर्गुण्यं श्रुत्वा पण्डितस्य तत्क्षणं रागो न जायते तथा तेनैव मार्गेण वैराग्यजनकेन[3] सुभावितेन चिरप्रवृत्तस्यापि रागस्य सर्वस्यैवा[4]त्यन्ततो ननु क्षयः प्राप्तः । ततश्च सर्वस्यैव बाह्यास्याध्यात्मिकस्य च वस्तुनः स्वभावशून्यतासारत्वदर्शनात् निरवशेषरा[5]गादिक्लेशबन्धनच्छेदात् मुक्तिः ॥२४॥

§ ५४. अत्राह । अनादिकालप्रवृत्तस्यास्य जन्मसन्तानस्य कथमन्तो भविष्यतीति । उच्यते —

* यथा बीजस्य दृष्टोऽन्तो न चादिस्तस्य विद्यते ।
तथा कारणवैकल्याज्जन्मनोऽपि न सम्भवः ॥ २५ ॥

§ ५५. यथा नाम चिरकालप्रवृत्तस्य[6] हेतुपरम्परया प्रवर्तमानस्य बीज-सन्तानस्यानादिमतोऽन्तो दृष्टोऽग्निदाहात् तथानादिकालप्रवृत्तस्य जन्मपरम्परया[7] हेतुतः प्रवर्तमान[8]स्यानादिमतोऽपि विज्ञानबीजस्य जन्मनः[9] कारणवैकल्यात्

---

१. T. आत्मना भोगैः
२. S. विरागधर्मेण
३. S. वैराग्यजनने
४. T. सर्वस्याऽपि
५. T. निवशेषादिक्लेश.........
   S. निरववशेषरागबन्धनादि......
६. S. चिरकालप्रवृत्तस्यास्य
७. S. परम्परया ।
८. T. शब्दस्यास्याभावः ।
९. S. विज्ञानबीजजन्मनः ।

पुनः सम्भवो[१] नास्ति । क्लेशापेक्षं हि कर्म जन्माक्षेप्तुं पर्याप्तुम् । क्लेशाश्च[२] ज्ञानाग्निदहनेऽभावमुपगच्छन्ति[३] । तदसमर्थं[४] कर्म सहायाभावाज्जन्माक्षेप्तुम् ।

## योगाचारे चतुःशतके शिष्यचर्याप्रकरणमष्टमम्[५]

---

१. T. चित्तसम्भवो

२. S. ते च क्लेशाः

३. S. ज्ञानतेजःस्पर्शादभावं गताः

४. S. तदयमसमर्थः कर्मस्यासमर्थम् ।

५. T. शिष्यचर्या, तिब्बती वृत्तौ शिस्यपरिचर्या तत्संस्कृतानुवादे च आचार्यदिवीये बोधिसत्वयोगाचारे चतुःशतके पारिकर्मिक प्रकरणम्ष्टमम् ।
   T. दृष्टान्त
   माध्यमिकवृत्ति, पृ० २२०

# नवमं प्रकरणम्

## नित्यार्थप्रतिषेधभावनासन्दर्शनम्

### २०१

§ १. समतिक्रान्त[1]प्रकरणजलधिजलक्षोभक्षालित[2]चित्तसन्तानस्य तत्त्वामृत-देशनापात्रस्य शिष्यस्याचार्योऽत: परमवशिष्टै: प्रकरणैर्यथावस्थितपदार्थतत्वाधिगमाय[3] तत्वविनिश्चयमारब्धुकाम: संस्कृतस्योदयव्ययवत्त्वेना[4]सारतामुद्भावयन्नाह—

> * **सर्वं कार्यार्थमुत्पन्नं तेन नित्यं न विद्यते ।**
> **तस्मान् मुनिमृते नास्ति यथा भावस्तथा गतः ॥१॥**

§ २. कार्यार्था हि प्रवृत्तिर्लोके न स्वाभाविकी । संस्कृतस्य च भूतभौतिकचित्तचैत्तलक्ष्यलक्षणादेरेकस्यैकस्योदयाभावाद् यथासम्भवं[5] कलापरूपस्यैवोत्पाद: । तस्य कलापस्य मिथ: कार्यकारणावस्थानाद् यस्मिन् सति यद्भवति यदभावे च यन्न भवति तत् तस्य कारणमितरत् कार्यमिति । पृथिवीमन्तरेण भूतत्रयस्याभावात् सत्या: च भावाद् भवति कार्यप्रयोजना पृथिव्या उत्पत्ति[6]रित्येवं सर्वमेव संस्कृतं यथावत्[7] कार्यार्थमुत्पन्नम् । यच्च कार्यार्थमुत्पन्नं[8] न तन्नित्यम् । नित्यशब्दस्य स्वभावसत्यसारवस्तुद्रव्यपर्यायित्वात् तदभावेन नि:स्वभावमसत्यमसार-

---

१. T. अनन्तरातिक्रान्त; S. समनुक्रान्त
२. S. प्रकरणजलप्रक्षालित
३. T. समस्तपदार्थतत्वयथावदधिगमाय
४. S. व्ययत्वेना
५. T. यद्योग्यं
६. S. समुत्पत्ति
७. S. यथास्वं
८. T. तस्मात्

मवस्त्वद्रव्यं[1] संस्कृत[2]मिति गम्यते[3]। अतएव तन्मृषा मोषधर्मकं यदेतद् संस्कृत-मित्युवाच शास्ता[4]। एतच्च[5] वक्ष्यमाणयुक्त्युपेतम्। तन्निश्चित्याचार्य आह—तस्मान् "मुनिमृते नास्ति यथा भावस्तथा गतः।"

§ ३. अशैक्ष्यकायवाङ्मनोमौनयोगान् मुनिर्बुद्धो भगवान्। स एवानित्य-शून्यतोपदेशेन यथा भावानां स्वाभावस्तथा गतो बुद्धस्तथागत इत्युच्यते नान्यो विपरीततत्त्वोपदेशेन यथास्थिततत्त्वार्थानभिसम्बोधात्। यथा चोक्तम्—

**अतीता तथता यद्वत् प्रत्युत्पन्नाप्यनागता।**
**सर्वधर्मास्तथा दृष्टास्तेनोक्तः स तथागतः ॥१॥**

२०२

§ ४. अत्राहुरेके। सत्यं यत् कार्यार्थमुत्पन्नं न तन्नित्यं भवतीति। ये तूभयाङ्गविकलाः पदार्थास्तद् यथाकाशादयो मनःपर्यन्ताः। येऽपि चैकाङ्गविकला पदार्थास्तद् यथा पृथिव्यादि परमाणवस्ते नित्या भविष्यन्ति। तेषाञ्चास्ति-त्वनास्तित्वानवगमान् नाविपरीतदर्शी तथागत इति। तेषां मतस्यायुक्ततामुद्-भावयन्नाह आचार्यः—

*** अप्रतीतयास्तिता नास्ति कदाचित् कस्यचित् क्वचित्।**
**न कदाचित् क्वचित् कश्चिद् विद्यते तेन शाश्वतः ॥२॥**

§ ५. यथास्वं[7] हेतुप्रत्ययोत्पन्नानां सुखादीनामस्तित्वमुपलभ्य कथमयमर्था-पत्त्याऽप्रतीत्यसमुत्पन्नाना नास्तित्वं न प्रतिपद्येत[8]। अर्हत्येवायं स्फुटतरं गगनो-त्पलादीनामिवासत्वं प्रतिपत्तुम्। तच्चेन्न प्रतिपद्यते नियतमस्य तैमिरिकस्येव समा-रोपकृतं दर्शनवैकृतमभिलक्ष्यत[9] इत्यतः "अप्रतीत्यास्तिता नास्ति"।

---

१. T. वञ्चनात्मकं बाललोकमोहनमवस्त्वद्रव्यं।
२. T. संस्कृतशब्दस्य स्थानपरिवर्तनमत्र विद्यते—संस्कृत—निःस्वभावादि। S. असंस्कृतं।
३. S. गण्यते
४. दृष्टव्या-माध्यमिकवृत्ति, पृ०४२,
५. S. एतच्च वचनं
६. T. नात्र शब्दोऽयं विद्यते
७. T. यथा
८. S. प्रतिपाद्येत
९. S. उपलक्ष्यत्

§ ६. सर्वेऽन्याय: कालवस्तुदेशभेदभिन्ने पदार्थे सर्वत्राव्यभिचारीत्याह"[१] कदाचित् कस्यचित् क्वचित्[२] "

इति यतश्चैवं "न कदाचित् क्वचित् कश्चिद् विद्यते तेन शाश्वत:" । पूर्वार्द्धेन सिद्धस्यैतन्निगमनम् ॥२॥

२०२

§ ७. अथ स्यात् । सुखादयस्तावत् प्रतीत्यसमुत्पन्ना: सन्ति । तेषां च समवायिकारणमात्मा । न चासत: समवायिकारणत्वं न्याय्यमित्यतस्तत् कार्योपलम्भादस्ति तावदात्मा । स चैष नित्य: । सदकारणत्वात्[३] । यदस्ति न चास्य कारणमुपलभ्यते तन्नित्यम् सति चात्मनि तज्जातीया अपि पदार्था भविष्यन्तीति । अत्रोच्यते । स्यादेवं[४] यद्यात्मैव स्यात् । न त्वस्ति[५] । कथं कृत्वा । एवम्[६]—

* न विना हेतुना भावो हेतुमान् नास्ति शाश्वत: ।
तेनाकारणत: सिद्धि: सिद्धिर्नेत्याह तत्त्ववित् ॥३॥

§ ८. भाव: स्वभाव आत्मेति[७] पर्याया: । सविना हेतुना न सम्भवति । तथाहि—परेणैवास्याकारणत्वमभ्युपेताम्[८] । यन्निर्हेतुकं तत्[९] खरविषाणवन्नास्तीति सिद्धम् । आकाशादिभिरनैकान्तिकतेति चेत् न[१०] । तेषामपि तद्वदेवास्तित्वस्य निषिध्यमानत्वात् ।

§ ९. अथैवं[११] दोषपरिजिहीर्षयाभ्युपेतविरुद्धमपि हेतुमत्त्वमङ्गीक्रियते एवमप्यस्य हीयते नित्यत्वम् । यस्मात् "हेतुमान् नास्ति शाश्वत:" ।—हेतुमत्त्वात् सुखादिवदनित्य[१२] इत्यभिप्राय: । यत एतदेवं "तेनाकारणत: सिद्धि: सिद्धिर्नेत्याह तत्त्व-

---

१. S. नात्र 'इति' शब्द:
२. S. नात्र 'क्वचित्' शब्द:
* माध्यमिकवृत्ति, पृ. ९३७.५०५
३. S. सदाकारणत्वात् ।
४. S. स्युस्तज्जातिया: पदार्था:
५. T. "न त्वस्ति, कथं कृत्वा।"
६. S. यस्मात्
७. T. नित्यो ध्रुव आत्मा ।
८. T. स्याकारणवन्वेऽभ्युपेतेऽकार······।
९. S. तच्चनिर्हेतुकं
१०. S. नात्र शब्दोऽयं विद्यते ।
११. T. अन्य
१२ S. नित्यवद्

वित्"। —अस्या देशनाया यथोपवर्णितोपपत्त्यनुक्रमादविपरीतार्थवित् तथागत एवेति सिद्धम् ॥३॥

२०४

§ १० अथ स्याद् घटसुखादेः कृतकस्यार्थस्यानित्यत्वमुपलभ्यार्थापत्त्याऽकृतव स्यात्मादेर्नित्यत्वं भविष्यतीति। एतदप्ययुक्तम्। यस्मात्[1] कृतकस्य घटसुखादेरस्तित्वमुपलभ्य तद्विपर्यत्येणार्थापत्त्याऽ[2]कृतकस्यात्मादेर्नास्तित्वमापन्नमिति। तदेव प्रतिपादयन्नाह—

* अनित्यं कृतकं दृष्ट्वा शाश्वतो कृतको यदि।
कृतकस्यास्तितां दृष्ट्वा नास्ति तेनास्तु[3] शाश्वतः ॥४॥

§ ११. न चाविद्यमानस्य नित्यत्वं युज्यत इति नास्त्येव नित्यस्य वस्तुनोऽस्तित्वम्। आकाशकुसुमवत्[4] ॥४॥

२०५

§ १२. अथ स्यादाकाशप्रतिसंख्यानिरोधाप्रतिसंख्यानिरोधा[5]नामभिधर्मशास्त्रपरिपठिता[6]नामकृतकानां[7] नित्यत्वास्तित्वेना[8]भ्युपगमादकृतकस्यासत्त्वप्रतिपानमभ्युपेतेन बाध्यत इति। एतदपि नास्ति। यस्मात्—

* आकाशादीनि कल्प्यन्ते नित्यानीति पृथग्जनैः।
लौकिकेनापि तेष्वर्थान्, न पश्यन्ति विचक्षणाः ॥५॥

§ १३. रूपाभावामात्र एवाकाश व्यवहारान् न किञ्चनाकाशं नाम वस्तुरूपमस्ति। रूपान्तराभावे[9] तु रूपिणामुत्पत्तिप्रतिबन्धाभावात् त एव रूपान्तराभावो भृशमस्यान्तः काशन्ते भावा इत्याकाशमित्याख्यातः[10]। तदस्यावस्तुसतोऽकिञ्चनस्य

१. S. यस्मादेवमिष्यमाणे।
२. T. विपर्ययेण।
३. V. तेवास्तु।
४. S. न चाविद्यमानस्य नित्यत्वं नापि सदेवानित्यं वस्तु।
५. S. अप्रतिसंख्या निरोध प्रतिसंख्या निरोध····· ।
६. T. शास्त्रपठिता······।
७. S. सतामकृतकानां
८. T. नित्यत्वेनानास्तित्वेन च
९. T. रूपान्तराभावेन
१०. तुलनार्थम्—अभिधर्मकोषव्याख्या, १,५, पृ० १५. ११, १६, २०

नामधेयमात्रोपदेशविमूढै[१] र्यद्वस्तुत्वमारोपितं न तत्प्रमाणमिति च तेनास्माक-मभ्युगमबाधाचोदनं न्याय्यम्[२] ।

§ १४. तथाहि । पदार्थस्वभावापण्डिता[३] आकाशाभिधाने प्रयुज्यमाने लौकिकेनापि ज्ञानेनाभिधेयं नाम न किञ्चित् स्वरूपमुपलभन्ते[४] यथा पृथिव्याद्यभिधानेषु काठिन्यादिकम् । किमुत पदार्थस्वभावज्ञानावस्थिता:[५] सर्वं बाह्यं चाध्यात्मिकं च वस्त्वनुपलभमानास्तस्य स्वरूपमुपलप्स्यन्त इति । एवमप्रतिसंख्या निरोधप्रतिसंख्यानिरोधयोरपि[६] वक्तव्यम् ॥५॥

२०६

§ १५. अत्राह । नित्यमेवाकाशं विभुत्वात् । यदनित्यं न तद् विभु । तद्यथा घट इति । अत्रोच्यते । यद्यजातस्यासत्त्वप्रतिपादनेन[७] तदधिकारणसर्वार्थेयासम्भवोऽप्यर्थादुपपादितस्तथापि परमतप्रसिद्धपदार्थस्वरूपविशेषापाकरणमुखेन तन्मतस्यायुक्ततामुद्भिभावयिषुराकाशस्य विभुत्वप्रतिषेधेन नित्यतामपाकर्तुकाम आह—

* प्रदेशिनि न सर्वस्मिन् प्रदेशो नाम वर्तते ।<br>
तस्मात् सुव्यक्तमन्योऽपि प्रदेशोऽस्ति प्रदेशिनो ॥ ६ ॥

§ १६. आकाशस्य येऽवयवास्तेऽस्य प्रदेशाः । तैःप्रदेशै[८]र्याकाशम्[९] तस्मिन् योऽन्य[१०]संयोगीप्रदेशः स तदितरसंयोगिनि प्रदेशे वर्तते । यदि हि वर्तते तदा[११] तेनाभिन्नदेशस्यापि[१२] घटस्य[१३] सर्वगतत्वं स्यात् । न चैतदस्तीत्ययुक्तमेतत् । अपि च यदि सर्वोऽपि[१४] प्रदेशः सर्वत्र वर्तते सोऽपि व्यापित्वात्[१५] प्रदेशिवत् प्रदेशाभिधानभाग् न स्यात् । प्रदेशाभावाच्च प्रदेशिनोऽप्यभावः स्यात् ।

§ १७. अथैतद्दोषपरिजीहीर्षया प्रदेशिनि सर्वस्मिन् प्रदेशो नाम न वर्तत इत्यभिमतं तदावश्यं सुव्यक्तमन्योऽपि प्रदेशोऽस्ति प्रदेशिनीत्यभ्युपेयम् । ततश्च सर्वगतप्रदेशवत् आकाशस्य प्रदेशिनो घटादिवद् विभुत्वमवहीयेत । न च परस्पर-

---

१. S. विमूढैरभिधर्मशास्त्रे वैभाषिकैः ।
२. T. तत्प्रमाणमिति अस्माक… ।
३. T. S. स्वभावपण्डिताः ।
४. T. किञ्चिदुपलभन्ते ।
५. T. ज्ञानावस्थाः ।
६. T. एवमन्यस्य निरोधद्वयास्यपि ।
७. T. प्रतिपादनार्थं
८. T. अवयविः, S. प्रदेशस्य
९. T. आकाशं ह्याकाशस्य येऽवयवास्तैरवयविरवयविराकाशम् ।
१०. T. घटसंयोगीप्रदेशः ।
११. T. तन्निमित्तम् ।
१२. T. आभिन्नदेशाद् ।
१३. T. घटस्यापि ।
१४. S. यदि प्रदेशोऽपि सर्वत्र ।
१५. T. व्यापिप्रदेशैवत् ।

व्यतिभिन्न[1]प्रदेशमात्रव्यतिरेकेण प्रदेशी नाम कश्चिदुपलभ्यत इति कुतोऽस्या-सिद्धसत्ताकस्य[2] नित्यत्वमिति न नित्यमाकाशम् ॥ ६ ॥

२०७

§ १८. कालवादी तु मन्यते । कालकृतौ जगत्प्रवृत्त्युपसंहारावुपलभ्य काल-सद्भावो[3]ऽनुमीयते । तथाहि । सत्स्वपि बीजादिषु[4] प्रत्ययेषु न सर्वदाङ्कुरादे-रुदय उपलभ्यते । अथ कदाचिदेवोपलभ्यते । तदवस्थानविरोधिकालसन्निधाने च निवर्तते । तदेवम्—

* **यस्मिन् भावे प्रवृत्तिश्च निवृत्तिश्चोपलभ्यते ।**
**अन्यायत्तो भवत्येष कार्यस्तेन च जायते[5] ॥ ७ ॥**

§ १९. स तथानुमितः कालो नामास्ति । तस्य च सतोऽपि कारणानुपल-म्भान्नित्यत्वमिति । ननु चैवं सति नित्यत्वात् कालस्य तदायत्तोदयानामङ्कुरा-दीनां सदैवोत्पादः प्राप्नोति । अथ सतोऽपि[6] कदाचित् कार्यक्रियासूपरत[7]व्यापा-रतास्येति कल्प्येत । एवमपि सैवास्यासत्वमापादयिष्यति । अथ सतोऽपि बीजा-दिवत् कार्यप्रवृत्तियोग्यात्मातिशयासम्मुखी—भावान् नास्ति सर्वदा कार्यमिति ।

§ २०. एवमपि बीजादिवद् तद्योग्यात्मातिशयः स कदाचिदेव भवतीति न नित्यः । सोऽपि कुतः सर्वदा नेष्यते । अथ प्रत्ययान्तरायत्तस्य तस्यासन्निधाने सर्वदा न भवतीति । एवमपि प्रत्ययस्य भावे भावादभावे चाभावाद् भूत्वा पुन र्न भवतीति नूनं "अन्यायत्तो भवत्येषः ।" तस्य प्रवृत्तिर्निवृत्तिश्च यदायत्ता तदायत्तत्वात् सोऽन्यायत्तो भवति । तस्मादङ्कुरादिवत् कार्यत्वं नातिक्रामतीति प्रतिपादयन् "तेन कार्यश्च जायते" इत्याह । कार्यभूतश्चाङ्कुरादिवदनित्य एव ॥ ७ ॥

२०८

§ २१ अन्यच्च । कालहेतुवादिना जगत्प्रवृत्तौ कालस्य हेतुभावकल्पनायां पश्चात् तस्य फलत्वमेवाभ्युपगम्येत । कथं कृत्वेति । यस्मात्

---

१. T. परस्पराव्यतिभिन्न ।
२. T. सिद्धसत्ताकस्य ।
३. T. कालसम्भवः ।
४. S. बीजक्षितिसलिलज्वलनपवनाख्येषु ।
५. V. अन्यायत्ताश्च सोऽप्यस्ति कार्यं तेनैव विद्यते ।
६. S. न सतोऽपि ।
७. S. उपनत ।

**विना फलेन यद्धेतोर्हेतुभावो न विद्यते ।**
**हेतूनां तेन सर्वेषां फलभावः प्रसज्यते ॥ ८ ॥**[1]

§ २२. किञ्च । अक्रियस्य हेतुत्वं न सम्भवतीतीह हेतुर्नाम न कश्चित् पदार्थः स्वेतरोऽस्तीति फलार्थोदयस्य हेतुत्वे न कथं स्वस्यैव फलत्वम् । फलत्वे चाङ्कुरादिवदस्य नित्यत्वदृष्टिः कुतो भवेत् । तस्मादेवं हेतुफलव्यवस्थाभावाद् द्वयमपि स्वरूपेण न सिध्यति ।

§ २३. अथ फलं नाम हेतुर्भूत्वा भावः । तथा हि । बीजसद्भावेऽङ्कुरो भवति । न त्वङ्कुरसद्भावे बीजम् । तस्मान्न हेतोः फलत्वमिति । एतदपि न भवति । यस्माद्यो बीजाख्यो भावस्तस्याङ्कुरोत्पत्तेर्न युज्यते । हेतुरेव च फलं जायत इति प्रदर्श्यते । तेन फलं प्रागुत्पत्ते र्न सम्भवति । अथोत्पत्स्यमानस्य फलस्य विनाप्यन्वयं किञ्चित् फलत्वप्रतीतिः । तदा सर्वं सर्वस्य फलं भवेदित्येवमपीदं न भवति । तस्मादहेतुत्वप्राप्तेः हेतुः फलोत्पादे न स्थाप्यते न च कर्मसिद्धिर्भवति । तस्माद्धेतूनां सर्वेषां "फलभावः प्रसज्यते" इति न खलु न लभ्यते ॥ ८ ॥

२०६

§ २४. यदि कालवादिनां...कालोऽस्य विचित्रस्य जगतः कारणं तदा तेन नियतं पूर्वावस्थातो नानारूपेण विकारेण कार्यस्योत्पत्तावुपकारः कर्तव्यः । तथा हि लोके—

* **कारणं विकृतिं गच्छञ्जायतेऽन्यस्य कारणम् ।**
**विकृतिर्जायते यस्य शाश्वतमिति तन्न हि ॥**[2] **९ ॥**

§ २५. बीजमिति यत् मूलकारणं तत् स्वयं विकृतिं गच्छदङ्कुरस्य कारणं भवति न पूर्वावस्थाया अपरित्यागे । तथा हि । यदि विचित्रं जगत् कालकृतं स्यात्, तदा कालोऽपि नियतं कार्योत्पादने पूर्व्वां दूरस्था (?) मवस्थां त्यजन् विकृतावस्थः कार्योत्पादानुरूपो भवेत् । तस्माद्बीजवदनित्य एवेत्युच्यते— "विकृतिर्जायते यस्य शाश्वतमिति तन्न हि" ॥ ९ ॥

§ २६. अथ न भवेत् तदास्य हेतुभावपरिकल्पना केवलं निरर्थकमेव क्रियते । तद्धेतुमत्त्वेनेष्टं फलमप्य हेतुकं जायत इत्युच्यते—

---

१. V. न कार्येण विना हेतोर्हेतुत्वं येन विद्यते ।
हेतूनामेव सर्वेषां कार्यता तत्प्रसज्यते ॥ ८ ॥

२. V. हेतुश्चेद्विकृतोऽन्यस्य कारणं जायते ननु ।
विकारो यस्य भवति शाश्वतः स न युज्यते ॥ ९ ॥

२१०

**शाश्वतं कारणं यस्य भावो भूत्वा स जायते ।**
**स्वयमेवोद्भवस्तस्य कारणं विनिवर्तते ॥ १० ॥**[1]

§ २७. विकृताद् बीजाज्जातोऽङ्कुरो बीजान्यत्वासम्भवाद् बीजानुविधायित्वात् सहानवस्थानाच्चान्य एव जात इति न मन्तव्यम् । असदृशानां च सहावस्थितानां हेतुत्वासम्भवात् कालस्य नित्यत्वाच्च हेतोः फलादन्यत्वम् । तस्मादेवासदृशेन सहावस्थानमपि भवति । जातेऽपि फले कालस्याविकारात् । तस्माद् यत् फलं कालाज्जातं तदभूत्वा जायते । हेतुप्रत्ययावनपेक्षमाणं स्वयमेवोद्भवतीत्यर्थः ।

§ २८. हेतुप्रत्ययापत्त उद्भवे वा फलमभूत्वोद्भवतीति नेदं युज्यते । तत्र न सर्वात्मना भूत्वा भावोऽभावात् । यस्य सर्वात्मना भावो न सम्भवति तत् खरविषाणवद् हेतुप्रत्ययाभ्यां जनयितुं न शक्यते । तस्माद्धेतुश्शर्तितो नित्यो भावो यस्य हेतुरिष्टः स भावोऽभूत्वा जायते । एष निर्हेतुको जायते । स्वयमेवोद्भवतीत्यर्थः । एवं चास्य किं निरर्थया हेतुत्वकल्पनयेत्युच्यते—"स्वयमेवोद्भवस्तस्य कारणं विनिवर्तते ।" स्वयमेव सिद्धस्य जगतो हेतुः काल इति निष्प्रयोजनम् । अतो हेतोर्हेतुत्वमयुक्तम् ॥ १० ॥

२११

§ २९. इतश्चायुक्तम् । तथा हि— ।

**उत्पन्नः शाश्वताद् भावात् कथमशाश्वतो भवेत् ।**
**वैलक्षण्यं द्वयो र्हेतुफलयो र्जातु नेष्यते ॥ ११ ॥**

§ ३०. लोके ह्यनित्यस्यैव बीजस्य फलमङ्कुरो नामानित्यो जायत इति प्रसिद्धम् । कुतश्चिन्नित्यात् किञ्चिदनित्यं भवतीति न भवति चेत्तस्य नित्यस्य कालस्य फलमनित्यमिति तत्कथं सिद्धयेत् यथा लोके—वैलक्षण्यंद्वयोर्हेतुफलयोर्जातु नेष्यते ॥ १ ॥

२१२

§ ३१. तस्मादेवं कालवादी निषिद्धः । परमाणुवादी तु मन्यते नित्यानां

---

1. V. शाश्वतं कारणं यस्याभावोऽभावाद् भविष्यति ।
स्वत एवोद्भवस्तस्य हेतुश्चैवं निरर्थकः ॥ १० ॥

पृथिव्यादिपरमाणूनामदर्शनेनोपदिष्टगुणवत्संसर्गिद्व्यणुकादिक्रमेणावयविद्रव्यारम्भ क्रियाभिर्विचित्रं जगज्जायत इति। तन्मतमपि न युज्यत एवेत्युद्भावयन्नाह—

**हेतुः कश्चन देशः स्याद्यस्याहेतुश्च कश्चन।**
**स तेन जायते नाना नाना नित्यो न जायते ॥१२॥**[1]

§ ३२. सर्वस्यावयविनः परमाणुमात्रत्वप्राप्तिपरिजिहीर्षया हेतुवृत्ति यत् पारिमाण्डल्यं तत् फलवृत्ति न भवतीत्यवश्यं ग्राह्यम्। यस्मादेतदेवं तस्मात् परमाणुषु सर्वात्मतो योगो नोपपद्यते। यदा परमाणुषु सर्वात्मना योगो न भवति तदा तस्य येनांशेन परमाणोः परमाण्वन्तरेण योगः सोऽशो हेतुः। तथा सति यस्य कश्चिद्देशो हेतुः कश्चिद्देशो न हेतुः स नानास्वरूपत्वान्नाना। तस्माच्चित्रवदनित्य इति प्रतिपादयन्नाह—"नाना नित्यो न युज्यते ॥१२॥

२१३

§ ३३. अथ परमाणुष्ववयवकारणात् प्रदेशस्य प्रदेशेनायोग एव। सर्वात्मना तु सर्वस्य योगः स्यात्। तस्मात् संयोगलक्षणवत्त्वमस्ति। प्रदेशवत्त्वं तु नास्तीति। अथोच्यते—

**हेतोर्यत् पारिमाण्डल्यं फले तन्नैव विद्यते।**
**योगः सर्वात्मना तस्मादणूनां नोपपद्यते ॥१३॥**

§ ३४. हेतुत्वं पारिमाण्डल्यमप्रदेशत्वं चेति परमाणुद्रव्यस्य लक्षणम्। यदि परमाणुः सर्वात्मना परमाण्वन्तरेण युज्यते न प्रदेशेन तदा हेतुः। परमाणुवृत्ति यत् पारिमाण्डल्यं तत्फले द्व्यणुकादावपि प्रसज्यते। तेन सर्वेषामवयविनां परमाणुमात्रत्वादतीन्द्रियत्वं भवति। न तु तेषां परमाणुमात्रत्वं। तेन परमाणूनां सर्वात्मना योगो नोपपद्यते ॥१३॥[2]

---

१. V. प्रदेशो यस्य हेतुः स्यादहेतुरपि कश्चन।
भिन्नत्वाद्भिन्नदेशत्वं नित्यता युज्यते कथम् ॥१२॥

२. V. वृत्तो यो विद्यते हेतुः स फलाय न कल्प्यते।
अणूनां तेन संयोगः स्वात्मिन्नैवोपपद्यते ॥१३॥

३. तुलनार्थं दृष्टव्यम्— वेदान्तसूत्रे—
संयोगश्चाणोरण्वन्तरेण सर्वात्मना वा स्यादेकदेशेन वा। सर्वात्मना चेदुपचयानुपपत्तेरणुमात्रत्वप्रसङ्गो दृष्टविपर्ययश्च। तथैव वसुबन्धुः कथयति—
षट्केन युगपद्योगात् परमाणोः षडंशता।
षण्णामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः ॥

२१४

§ ३५. अपि च यदा परमाण्वन्तरेण सर्वात्मना न योगस्तदा—

**अणोरेकस्य यत् स्थानं तदन्यस्यापि नेष्यते।**
**तद् द्वयोर्हेतफलयोः संस्थानं नेष्यते समम् ॥१४॥**[१]

§ ३६. तस्मादेवं परमाणूनां परमाण्वन्तरेण सर्वात्मनाऽसंयुक्तानामवयविनां-द्रव्याणां नातीन्द्रियत्वं। अक्षोभ्यश्च प्रदेशवत्त्वं परमाणोः। प्रदेशवत्त्वाच्चास्य नाना त्वम्। तस्मान्न नित्य इति स्थितम् ॥१४॥

२१५

§ ३७. इह फलद्रव्यारम्भकाले दोष इष्टः। फलारम्भपूर्वावस्थायां तु परमाणूनां निरवयवत्वाद् यथोक्तदोषप्राप्त्यभाव इति। तस्यामप्यवस्थायां पूर्वादिप्रदेशांशोऽयं कार्यः। तदा नूनम्—

**यस्य पूर्वः प्रदेशोऽस्ति पूर्वांऽशस्तस्य विद्यते।**
**अणोर्येन प्रदेशोऽस्ति तेनाणुर्नाणुरुच्यते ॥१५॥**[२]

§ ३८. तस्मादस्य प्रदेश वत्त्वेन घटादिवत् परमाणुत्वं न भवतीत्युच्यते— अणोर्येन प्रदेशोऽस्ति तेनाणुर्नाणुरुच्यते" ॥१५॥

२१६

§ ३९. परमाणुश्चेन्निरवयवः स्यात् तस्य गत्यभावेन परमाण्वन्तरेण संयोगो न स्यात्। न च स्यादवयविद्रव्यारम्भ एव तथाहि। गमनकाले देह्यर्थम्—

**ग्रहणं पूर्वभागेण पश्चाद्भागेन वर्जनम्।**
**तद्द्वयं नैव यस्यास्ति स गन्ताऽपि न जायते ॥ १६ ॥**

§ ४०. गमनाभिमुखदेह्यर्थं देशस्य पूर्वः प्रदेशः पीड्यते पश्चाद्देशस्य पश्चात्प्रदेशश्च त्यज्यते। तेन गन्तुर्गन्तृत्वमुपप्रेक्ष्यते। अनंशत्वाद्यस्य परमाणोरग्रिमेण पश्चिमेन चावयवेन ग्रहणं वर्जनं च नास्ति स न गन्ता। तदभावात् कार्यारम्भ एव न भवतीति परमाणुवस्त्वस्तीति वक्तुं न युज्यते ॥ १६ ॥

---

१. V. अणोरेकस्य यत्स्थानं तदेवान्यस्य नेष्यते।
उभयोर्हेतुफलयो र्यौगपद्यं न चेष्यते ॥१४॥

२. V. पूर्वो यस्य प्रदेशः स्यात् पूर्वांशस्तस्य विद्यते।
अणोर्येन प्रदेशःस्यात्तेनाणुरनणुर्भवेत् ॥१५॥

२१७

§ ४१. अत्राह। यदि परमाणोरभावो नायं योगिभिरुपलभ्येत। उपलभ्यते त्वयं योगिभिर्दर्शनेन। तस्मात् परमाणुर्नित्यः। उच्यते—

**आदिर्न विद्यते यस्य यस्य मध्यं न विद्यते।**
**विद्यते न च यस्यान्तः सोऽव्यक्तः केन दृश्यते॥ १७[1]॥**

§ ४२. अनवयवस्य परमाणोर्नयांशोः न च पश्चाद्देशः। तस्मादव्यक्तः। व्यक्तः स्पष्टो ग्राह्यो दृश्य इत्यर्थः। स न भवतीत्यव्यक्तः। दृश्यो न भवति केनापि द्रष्टुं न शक्यते। योगिभिरप्युपलब्धुमयमयोग्यः। तस्मात् परमाणुर्न नित्यः॥ १७[2]॥

२१८

§ ४३. अत्राह परमाणवो नित्या एव। स्थूलानामुद्भवस्य बीजस्वभावानुगमात्। यदि ते न स्यु बीजमन्तरेण स्थूलानामुद्भवो भवेत्। तथा हि। कुतः प्रथमे कल्पे स्थूलानामुद्भवः। प्रलयकाले हि सर्वाण्यवयविद्रव्याणि विशीर्यमाणशरीराणि। न स्थूलानां सम्भवः। यदि तस्यामवस्थायां स्थूलवत् परमाणवोऽपि न स्युस्तदा हेतुमन्तरेण स्थूलानामुद्भवः स्यात्। तस्मादवयविद्रव्यस्य हेतुभूताः परमाणवः सन्त्येव। ते च नित्याः। सतोऽहेतुमत्त्वात्। तदपि न युज्यते। कुतः—

**नष्टः फलेन यद्धेतुस्तेन हेतुर्न शाश्वतः।**
**यस्मिंश्च विद्यते हेतुः फलं तस्मिन्न विद्यते॥ १८[3]॥**

§ ४४. परमाणवश्चेद् हेतुरेव स्युरङ्कुरेण बीजवत्[4] ते द्व्यणुकादिभिरवयविद्रव्यैर्विनश्येयुः। तस्मात् तस्मिन् फले सहानवस्थानात् परमाणवो बीजवन्न नित्याः। यदैवं हेतुत्वं न सम्भवति तदा परमाणूनां नित्यत्वपरीक्षा निरर्थेति किं [ तैः ] प्रयोजनम्। तस्मात् परमाणवो न नित्याः॥ १८॥

---

१. V. यस्यादिर्नैव भवति मध्यं यस्य न विद्यते।
विद्यते न च यस्यान्तः सोऽव्यक्तः केन दृश्यते॥ १७॥

२. तुलनार्थं दृष्टव्या मूलमाध्यमिककारिका, ११. २
माण्डूक्यकारिका, ४, ३१, भागवतपुराण, ११, २८, २
योगवासिष्ठ, ३, २, १३ आचाराङ्गसूत्र, १. ४. ४(pTS पृ० २०)।

३. V. हेतो विनाशः कार्येण तेन हेतुर्न शाश्वतः।
अथ हेतुर्भवति यः स कार्यं नैव जायते॥ १८॥

४. T. बीजेनाङ्कुरवत्।

२१६

§ ४५. इतोऽपि परमाणवो न नित्याः । कुतः—

**संश्लेषो शाश्वतो भावो न कस्मिन्नपि दृश्यते ।**
**शाश्वतत्वमणोस्तेन जातु बुद्धैर्न वर्ण्यते ॥ १६[1] ॥**

§ ४६. इह परमाणौ परमाण्वन्तरं सर्वात्मना न वर्तेत इति परमाणोः संश्लेषित्वे संश्लेषिणां घटानामिव नित्यत्वमपि न युज्यते । तस्मात् परमाणो र्न नित्यत्वम् । येन न नित्यत्वं "शाश्वतत्वमणोस्तेन जातु बुद्धैर्न वर्ण्यते" ।

तस्माद्वैशेषिकाणामिव सौगतानां दर्शने परमाणुद्रव्यमिति नास्ति । तस्मात् तथागतैरपि परमाणो नित्यत्वप्रतिपादनं न कृतम् । स्वमेव तथाऽदर्शनात् ।

§ ४७. एवं तस्योत्पत्तिस्थितिनिरोधा· क्रमेण यौगपद्येन च न भवन्तीति न वर्तन्ते । उत्पत्यादिविरहे च सत्त्वमपि न युज्यते ।

§ ४८. यस्माल्लौकिका भावा लोकोत्तरपरिदर्शनविचाराप्रविष्टा लोके यथा भवन्ति तथाभ्युपगन्तव्याः । यथा विज्ञानं लौकिकं तथा परमाणुरपीति न्याया-वतारेऽपि परमाणुः प्रकाशयितुं न शक्यते । तज्ज्ञा भूतस्य लोकागमविरोधेन विरुद्धत्वात् । एवं निषिद्ध परमाणुवादः ।। १६ ।।

२२०

§ ४६. [अत्र] केचित् । बुद्धैः परमाणूनां नित्यत्वं नोक्तम् । इदं सत्यमेव । यस्य तु नित्यत्वमुक्तं तन्नित्यमेव । यथा भगवता अस्ति भिक्षवस्तदजातमभूतम-संस्कृतम्[2]—इत्युक्तेऽसंस्कृतधर्मा नित्या इत्यप्युक्तम् । तस्मान्निर्वाणं नाम तन्नित्यम् । न चेद् दुःखसत्यस्य समुदयसत्यस्य च प्रवृत्तिक्षेपे तृतीयार्यसत्यस्य शमनमपि न भवतीनि भवत्युपदेशः । तस्मात् तदस्ति । अत्रोच्यते—

**उपायाद् बन्धनाद् बन्ध्यादन्यो मोक्षो भवेद्यदि ।**
**न तस्माज्जायते किञ्चिन्मोक्षः स इति नोच्यते ।। २० ।।[3]**

---

१. V. संयोगि शाश्वतो भावो येन दृष्टो न विद्यते ।
शाश्वतत्त्वमणोस्तेन जातु बुद्धैर्न कथ्यते ॥ १६ ॥

२. तुलनार्थम्—उदान, ८.३—अत्थिभिक्खवे अजातं अभूतं असंखतं ।

३. V. बद्धस्य बन्धनोपायाद् निर्वाणं यदि भिद्यते ।
अजातं तदतस्तेन निर्वाणं इति नोच्यते ॥

§ ५०. तत्र बन्धनं समुदयसत्यम् । बन्धस्यास्वतन्त्रीकरणेन बन्धनं भवतीति । बन्ध्यं दुःखसत्यम् । क्लेशस्य परतन्त्रत्वात् । तन्निवर्तक उपायो मार्गसत्यम् । क्लेशनिवर्तकत्वात् । बन्धनं बन्ध्यं च विना बन्धनकार्यं न सम्भाव्यत इति बन्ध्य-बन्धनयोरस्तित्वं तदस्तित्वस्य हेतुः तथा निवर्त्यं निवर्तकं च विना निवृत्तिर्न भवति । तत् सत्वान् निवर्त्यनिवर्तकयोः सत्वम् । तत्र निवर्त्यः सङ्क्लेशः । निवर्तको मार्गः । तमसि दीपवत् । यथा सत्यत्रयमिद सङ्क्लेशतन्निवर्तकमार्गानुमित-(?) सत्वमस्ति तथा क्लेशक्षयलक्षणो मोक्षो नास्ति । यतस्तस्मात् किञ्चिन्मात्र-मपि न जायते । बन्धमोक्षयोरप्यवयवस्वभावानुपगतत्वात् । स्याच्चेदस्य कुत्रचिदु-पयोगस्तदा तेन फलेनानुमित (?) मस्य सत्वं स्यात् । न चेदमेव मस्ति । तस्मा-न्नास्य सत्वम् ।

§ ५१. अथ मोक्षो मुक्तिरिति मन्यते । तथाप्येष मुक्तिभूतत्वेन नार्थान्तरं भवति । एवमसति तस्मिन्नैव तेन सम्बन्धः । न च किञ्चित् क्रियते । तस्मादयं मोक्षो वक्तुं न युज्यते । तेन "मोक्षः स इति नोच्यते ।"

§ ५२. तस्माज्जातिक्लेशयोरनुद्भवस्तत्कृत इति न तत् परीक्षितुं युक्तम् । हेतुप्रत्ययसामग्र्युद्भवानां भावानामभावाद् बीजास्थितोऽङ्कुरादिवत् कदापि जातिर्न भवति । तस्मात् तदर्थमर्थान्तरपरीक्षाधर्मो न श्रेयान् ।

§ ५३. तृतीयसत्य[१]वाच्यत्वमपि न विरुद्धम् । जातिक्लेशयोः पुनरनुद्भव-मात्रस्य तृतीयशब्दवाच्यत्वात् । न चाभावभूतस्य संख्यया न परिसङ्ख्यानं भवति । उक्तं हि भगवता—"पञ्चेमानि भिक्षवो नाममात्रं प्रतिज्ञामात्रं व्यवहारमात्रं संवृतिमात्रम् । तद्यथातीतोऽध्वानागतोऽध्वाकाशो निर्वाणं पुद्गलश्चेत्यादि ।"[२]

**२२१**

**§ ५४. स्कन्धाः सन्ति न निर्वाणे पुद्गलस्य न संभवः ।**
**यत्र दृष्टं न निर्वाणं निर्वाणं तत्र किं भवेत् ॥२१[३]॥**

§ ५५. अन्यच्च । उक्तमेवं भगवता—यद् दुःखं निरवशेषमिदं प्रहीणम् । क्षयो विरागो[४] निरोध उपशमोऽस्तदुःखमयुक्तान्यसन्धिकं निरुपादानमिदं शान्तं

---

१. दुःखनिरोधसत्यम्

२. गद्यांशोऽयं गुणरत्नेन षड्दर्शनसमुच्चय उद्धृतः ।

३. V. स्कन्धा न सन्ति निर्वाणे पुद्गलस्य न संभवः ।
यत्र दृष्टं न निर्वाणं निर्वाणं तत्र किं भवेत् ॥

४. सुत्तनिपात, २२५ : खयं विरागं ।

प्रणीतमिति[1]। एवं सर्वस्कन्धप्रहाणं भवक्षयो विरागो निरोधो निर्वाणमिति[2]। अस्मादागमात् सर्वथा निर्वाणे स्कन्धा न भवन्ति। न च सम्भवति पुद्गलः। यदि निर्वाणे स्कन्धाः स्युः पुद्गलोऽपिस्यात्। तदा तेषां सत्वानां निर्वाणोपलम्भे सूत्रविरोधो निर्वाणं च संसारानतीतं स्यात्। तस्मात् तस्मिन् निर्वाणे निर्वाणभूतं किञ्चदपि नोपलभ्यते। तस्माद्—"यत्र दृष्टं न निर्वाणं निर्वाणं तत्र किं भवेत्।"

§ ५६. निर्वाणं हि निर्वृतिः। तच्च भावरूपत्वादाधारायत्तम्। आधारश्चास्य निर्वाणभूतः। स च स्कन्धा वा पुद्गलो वा। तदभावे चाधाराभावः। तत्पक्षे निर्वाणं किं भवेत्। एकरूपेण च निर्वाणपदार्थस्य सत्यत्ववादिना परिकल्प्यमानं निर्वाणमाधारभूतमाधेयभूतं वा परिकल्प्यते। तत्र तावदाधारभूतं न युक्तम् तथाहि—स्कन्धा सन्ति न निर्वाणे पुद्गलस्य न सम्भवः।

§ ५७. तयोरभावेन यत्र निर्वाणं जायते न तु किञ्चिदुपलभ्यते किं तत्र निर्वाण भवेत्। तथा च निर्वाणं तावन्नाधारभूतं सम्भवति। यत्र पुनराधेयभूतं तत्रापि स एव दोषः। यतः—

**स्कन्धाः सन्ति न निर्वाणे पुद्गलस्य न सम्भवः।**
**यत्र दृष्टं न निर्वाणं निर्वाण तत्र किं भवेत्॥**

निराधारस्याभावान् निर्वाणं किं भवेत्। असति च न ज्ञायते नित्यत्वमिति न सन्ति नित्या भावाः ॥२१॥

**२२२**

§ ५८. साङ्ख्या हि गुणपुरुषभेदज्ञानान् महदादिप्रवृत्तिविपरीतक्रमेण विकृतिसमूहानां सर्वथा शान्त्या मोक्षावस्थायां पुरुषस्य ज्ञातावस्थानादात्मनो मुक्तिर्यथोक्तदोषप्रहाणेन च मोक्षो भवतीति कल्पयन्ति तेषां तत्रापि—

**ज्ञानेन मोक्षकाले स्याद् भवहीनस्य को गुणः।**
**सत्त्वेऽज्ञानस्य च व्यक्तं स्यात् सत्त्वं नास्तितासमम् ॥२२॥[3]**

५९. "ज्ञानेन मोक्षकालेस्याद् भवहीनस्य को गुणः।" मुक्तभूतस्य पुरुषस्य मोक्षावस्थायां ज्ञानास्तित्व कल्पयितुं न युक्तम्। तेषा हि दर्शने पुरुषो बुद्धयाध्यवसायार्थं जानाति। ज्ञान[4]मप्यग्नेरुष्णत्ववत् तत्स्वरूपमित्यभीष्टम्। तदपि यथोप

१. संयुक्तनिकाय, १.१३६

२. तदेव।

३. ज्ञानसत्वमपि

४. \. निर्वाणं यद्भवाभावे तदा ज्ञानेन को गुणः।
अज्ञानस्य हि यो भावः स व्यक्तं नास्तितासमः ॥२३॥

दर्शितविषयपरिच्छेदस्वभावकम् । प्रकृति हि विषयसम्भोगकामाज्ज्ञातपुरुषादभेदेन प्रतीते: क्रमेणेन्द्रियसमूहोद्भवे पुरुषस्य विषयोपसंभोगहेतुर्भवति यदा विषयोपसम्भोगकामः पुरुषस्य निवर्तते । तदाभवोनिवर्तते भव इष्टे (?) तस्य भवहीनस्य ज्ञानसद्भावेन न कश्चिदपि गुणः । तेन तदा न कोप्यर्थः सम्यगनुभूयते । हेतुफलात्मकस्य विकारसमूहस्य सर्वतः प्रशान्तत्वात् । तस्मान्न मुक्तस्यात्मनो मोक्षज्ञानं युज्यते ।

§ ६०. अथ तदा पुरुषस्य ज्ञानं नास्तीति ज्ञायते । एवमपि" सत्वेऽज्ञानस्य च व्यक्तं स्यात् सत्वं नास्तितासमम्" इतीदं किं न स्यात् । ज्ञानभावादभिन्नस्वभावस्य पुरुषस्य ज्ञाननास्तित्वेऽज्ञानस्य यत् सत्वं[१] कल्प्यते तद् व्यक्ततरं बन्ध्यापुत्रादिवन्नास्ति ॥ २२ ॥

२२३

§ ६१. अथ मोक्षावस्थायां ज्ञानास्तित्वशक्तिसत्वादात्मा विद्यत इति मन्यते इदमप्यसारम् । कुतः

**आत्मा यदि भवेन् मोक्षे ज्ञानबीजस्य सम्भवः ।**
**तदभावो यदि भवभावनापि न विद्यते ॥२३॥[२]**

§ ६२. यदि मुक्त्यवस्थायामात्मा प्रत्येतु शक्येत तदात्मनः सत्वेन तदाश्रितज्ञानसत्वेन च शक्तिर्भवेत् । सा च ज्ञानास्तित्वरूपेति तदभावे न भवतीति निराश्रया शक्ति र्न सम्भवति ।

यदाश्रयाभावेन ते[३] सर्वथा न विद्येते तदा "तदभावो यदि भवभावनापि न विद्यते ॥ २३ ॥

२२४

§ ६३. अङ्कुरादिशक्त्याश्रये बीजे दग्धभूतेऽङ्कुरादिसन्तानाप्रवृत्तिवदात्मनोऽपि सन्तानमात्रस्य सर्वथाप्रवृत्त्या मोक्षो युक्तः । यस्मादेतदेवं तस्मात्—

**नृषु दुःखाद् विमुक्तेषु नूनमन्यत्र विद्यते ।**
**श्रेयानात्मलयस्तस्मात् सर्वथामीति कथ्यते ॥ २४ ॥[४]**

---

१. T. सत्यं

२. ज्ञानास्तित्वं तच्छक्तिश्च

३. V. आत्मैव यदि निर्वाणं ज्ञानं पूर्णं भवो भवेत् ।
तदभावे हि संसारे भावनापि न विद्यते ॥ २३ ॥

४. V. नरेषु दुःखमुक्तेषु परो नाम न विद्यते ।
सर्वथात्माक्षयस्तेन श्रेयानित्यभिधीयते ॥ २४ ॥

§ ६४. दुःखान्मुक्तस्य दुःखं नोद्भवति। दुःखानि चोत्पादनिरोधधर्मकस्य संस्कारकर्मणा क्लेशेन चोत्पाद्यन्ते। तानि च प्रतीत्य पुद्गलो बध्यते। स चात्मा। दुःखे च निरुद्धे तेन सह सिद्धिसुखैकोगादातुरात्मनः सर्वथा पश्चाद-मूलात्मकत्वेन यः क्षयः स एव श्रेयानिति नास्ति मुक्त आत्मा। स तावद-कारणत्वेन न स्वयं विद्यते। बन्ध्यापुत्रवत्। तस्य स्वरूप सद्भावे च नित्यत्वेना-विकाराद् बन्धमोक्षोभयविशेषाभावेन पूर्वमिव संसारनिवृत्ति र्न स्यात्। विशेषा-भ्युपगमे च[1] विकारसद्भावादनित्यः स्यात्। अनित्यस्य[2] च सकारणत्वं स्यात्। ततश्च दुःखसन्तानः सदृश एव स्यात् स्ववादत्पागश्च[3]। तस्मान्न युक्तम्— स्यात्मानमभ्युपेतुम्। अभ्युपेत्यापि हि यत्परं प्रति प्रतिपादनासामर्थ्यादुक्तदोषाच्च परित्याज्यं किं तेनाभ्युपगतेन प्रयोजनमिति त्यज्यतामात्मवादः ॥ २४ ॥

२२५

§ ६५. यद्येवं मुक्तावस्थायां मुक्तात्मनोऽप्यमद्भावः संस्काराणां चापुन-रुत्पाया सर्वथा[4] परिक्षयरूपं परमार्थसंज्ञकं निर्वाणं वर्ण्यते तदलमेतेनेदृशेन परमार्थेनार्थितेनेत्यत्र आत्मकामस्य[5]—

* वरं लौकिकमेवेदं परमार्थो न सर्वथा।
लौकिके विद्यते किञ्चित्परमार्थे न विद्यते ॥ २५ ॥

**यागाचारे[6] चतुःशतके नित्यार्थप्रतिषेधभावना[7]सन्दर्शनं नवमं प्रकरणम् ॥२५॥**

§ ६६. नैव ह्यात्मकामो[8] लोचनामयसम्पाताशङ्कयाक्ष्णोरुत्पादनमनुतिष्ठति करोति त्वामयोपघातमेव। तथा संसारदुःखोद्विग्नस्य दुःखत्याग एव ज्यायान् न तु सर्वाभावः। सर्वाभावे हि सति सर्वस्य सुखस्याप्युच्छित्या न किञ्चिदनेनात्मन न उपकृतं भवति। ततश्च वरं लौकिकमेवेदम्।

---

१. S. विशेषाभ्युपगमेन
२. T. ततः
३. S. एवं च सति स्वभावत्यागः स्यात्।
४. T. अत्यतं
५. T. आत्मश्रेयत्कामस्य
६. चन्द्रकीर्तिना - बोधिसत्वयोगाचारे
७. T. समापत्तिसन्दर्शनं
८. T. ह्यात्मश्रेयकामे

§ ६७. लौकिके हि[1] त्वया किञ्चदङ्गीक्रियते यत् प्रतीत्यसमुत्पन्नमुपदाय च प्रशमम्[2] । किञ्चन्नाङ्गीक्रियते यत् तीर्थकैरभूतमारोपितं सत्वाभाव्यं च भावानाम् । अथवा यददत्तफलम[3]तीतं कर्म तत्फल[4]श्चा[5]नागतं प्रत्युत्पन्नाश्च संस्कारा इत्येतत् तव लौकिके[6]ऽस्ति । तदवशिष्टं नास्तीति वरमेतल्लौकिकं यत्र न: सर्वाभाव: । परमार्थस्तु न श्रेयान्[7] सर्वथाप्यात्मनोऽप्यसद्भावात्[8] ॥२५॥

---

१. T. अस्मिन्

२. T. यच्चक्षुराद्यङ्कुरादि वा प्रतीत्यारोपितं घटपटगृह... वनसेनाराम याननौकादि

३. T. यत्कुशलाकुशलाद्यनुद्भूतफलम् ।

४. T. शुभाफलं ।

५. T. वा

६. S. लौकिकेन

७. S. परमार्थस्तु सर्वथा न श्रेयान् ।

८. T. सर्वथात्मनो सद्भावात् ॥

## दशमं प्रकरणम्

## आत्मप्रतिषेधभावनासंदर्शनम्

### २२६

§ १. अत्राह। यद्यात्मा नाम कश्चिद् स्वरूपतः स्यात्तस्य निर्वाणे सर्वथोच्छेददर्शनात् "नास्म्यहं[1] न भविष्यामि न मेऽस्ति न भविष्यति" इति परिशङ्कितस्य स्यादेवं

**वरं लौकिकमेवेदं परमार्थो न सर्वथा।**
**लौकिके विद्यते किञ्चित्परमार्थे न विद्यते॥**

§ २. न चात्मा नाम कश्चित्स्वरूपतः सम्भवति। यदि हि स्यात् स नियतं स्त्रीत्वेन वा स्यात् पुरुषत्वेन वा नपुंसकत्वेन वा। ततोऽन्यस्य कल्पनान्तरस्याभावात्। द्विविधं ह्यात्मानं वर्णयन्ति तीर्थिका यदुतान्तरात्मानं बहिरात्मानं च। तत्रान्तरात्मा नाम यः शरीरागारान्तर्व्यवस्थितः[2] शरीरेन्द्रिय[3]सङ्घातस्तत्र[4] तत्र प्रवर्तयितान्तर्व्यापारपुरुषो जगदहङ्कारनिबन्धनः कुशलादिकर्मफलोपभोक्ता[5] प्रतितन्त्रमनेकविकल्पभेदभिन्नः बहिरात्मा तु देहेन्द्रियसङ्घातरूपोन्तरात्मन उपकारी[6]। तत्र यस्तावदयमन्तरात्मा[7] स यदि स्त्रीत्वेन परिकल्प्येत[8] तदा तस्याजहद्रूपत्वाज्जन्मान्तरपरिवर्तेऽपि[9] लिङ्गान्तराप्रतिपत्त्या नित्यमेव स्त्रीत्वं स्यात्। न चैवं भवति[10]। व्यत्ययोपलब्धेः स्त्रीत्वादीनामात्मगुणत्वाभावाच्च। एवं स्त्रीत्वे नपुंसकत्वे च वाच्यम्। तदेवम्—

**अन्तरात्मा यदा न स्त्री न पुमांश्च नपुंसकम्।**
**तदा केवलमज्ञानाद् भावस्तेहं पुमानिति॥ १॥**

§ ३. पुमानित्युपलक्षणत्वादहं स्त्री नपुंसकमिति। सर्वमेवाज्ञानाद् भवति विचार्यमाणस्य वस्तुसत्त्वस्य तथासिद्ध्यवादज्ञानं मुक्त्वा नान्यत्तथापरिकल्पकारणं[11] युक्तम्। रज्जुस्वरूपापरिज्ञाने सर्पाध्यारोपवदित्यभिप्रायः॥ १॥

---

१. S. नास्म्यहं।
२. T. शरीरागारव्यवस्थितः।
३. T. शरीरतदिन्द्रिय।
४. S. सङ्घातस्य तत्र।
५. S. कुशलाकुशलनानागमोपदिष्टकर्मफलोपभोक्ता।
६. S. अपकारिव।
७. T. यस्तावदन्तरा मा।
८. T. कल्प्यते।
९. T. परिवर्त्तयिुरन्तरानु.....
१०. S. दृश्यते
११. T. तथापरिकल्पनादप्रतीतिकारणं।

२२७

§ ४. एवं तावदन्तरात्मनोऽयः स्त्रीत्वादिपरिकल्पो नासौ वस्त्वनुविधायीति स्थितम् । अथमन्यसे बहिरात्मनो लिङ्गान्येतानि स्त्रीपुंनपुंसकत्वानि तत्सम्बन्धाद-न्तरात्मन्यपि परिकल्प्यन्त[1] इति । स्यादेतदेवं[2] यदि बहिरात्मनोऽप्येतानि युज्यन्ते । कथं कृत्वा । इहाकाशस्य तावन्महाभूतत्वायोगाच्चत्वार्येव महाभूतानि । यस्यापि[3] पञ्चमहाभूतानि तस्याप्याकाशस्य शरीरारम्भकत्वायोगाच्चत्वार्येव महाभूतानि कारणभावं प्रतिपद्यन्ते । तेषु च स्त्रीपुंनपुंसकत्वानि स्वरूपतो न विद्यन्ते । यदि स्युस्तदा तत्स्वभावानुरोधात् सर्वदेहानां नियतलिङ्गता स्यात् । कललादपि च लिङ्गोपलब्धिः स्यान्न चैतदस्तीत्यतः—

**यदा सर्वेषु भूतेषु नास्ति स्त्रीपुंनपुंसकम् ।**
**तदा किं नाम तान्येव प्राप्य स्त्रीपुंनपुंसकम् ॥ २ ॥**

§ ५. किं नामात्र कारणं यत् स्वरूपतो लिङ्गरहितानि महाभूतानि प्राप्य स्त्रीपुनपुंसकानि देहानां सम्भविष्यन्ति । तदेवं बहिरात्मनोऽपि स्त्रीपुंनपुंसकत्वा-नामयोगात् केवलमज्ञानात् तवायमभिप्रायः पुमानहं स्त्र्यहं[4] नपुंसकमहमिति ॥२॥

२२८

§ ६. इतश्चात्मा स्वरूपतो नास्ति ।[5] यदि ह्यात्मा स्वरूपतः स्यात् स यथैकस्याहङ्कारस्यालम्बनं तथा सर्वेषामप्यहङ्कारस्यालम्बनं स्यात्[6] । न हि लोकेऽग्नेरौष्ण्यं स्वभावः कस्यचिदनौष्ण्यं[7] भवति । एवमात्मा यदि स्वरूपतः स्यात् सर्वेषामात्मेति स्यादहङ्कारविषयश्च । न चैतदेवम् तथाहि—

**यस्तवात्मा ममानात्मा तेनात्मा नियमान्न[8] सः ।**
**नन्वनित्येषु भावेषु[9] कल्पना नाम जायते[10] ॥**

§ ७. यो हि तवात्मा त्वदहङ्कारविषय आत्मस्नेहविषयश्च स एव ममा-नात्मा भवत्यस्मदहङ्कारा विषयत्वादात्मस्नेहाविषयत्वाच्च । यत एतदेवं तेन नियमान्न सः । यश्च नियमादात्मा न भवति स स्वभावतो नास्तीति त्यज्यता-मसदर्थ आत्माध्यारोपः ।

---

१. T. कल्प्यन्त
२. T. नैवं
३. T. यस्यापि दर्शने
४. S. स्त्रीनपुंसक...।
५. T. तथाहि यदि ।
६. S. नात्र शब्दोऽयं वर्त्तते ।
७. T. कस्यचिदग्नेरनौष्ण्यं ।
८. T. R. अनियमान्न ।
९. S. अभावेषु
१०. T. कल्पनेत्युपजायते ।
V. कल्पना ननु जायते ।

§ ८. यद्यात्मा नास्ति क्व ताविमावहङ्कारात्मस्नेहाविल्याह नत्वनित्येषु भावेषु कल्पना नाम जायते ।

यथोपवर्णितेन न्यायेन स्वरूपसिद्धस्य स्कन्ध व्यतिरिक्तस्यात्मनः सर्वथाभावात्[1] नन्वनित्येषु रूपवेदनासंज्ञासंस्कारविज्ञानाख्येषु भावेष्वात्मेति कल्पना अभूता[2]र्थारोपणं क्रियत आत्मा सत्त्वो जीवो जन्तुरिति[3]। यथा[4] हीन्धनमुपादायाग्निरेवं स्कन्धानुपादायात्मा प्रज्ञप्यते । स च स्कन्धेभ्यस्तत्त्वान्यत्वेन पञ्चधा च निरूप्यमाणः स्वभावतो नास्तीत्युपादाय प्रज्ञप्त्या परिकल्प्यत इत्यनित्येषु संस्कारेस्वात्मपरिकल्पना भवतीति स्थितम् ॥ ३ ॥

२२६

§ ६. अत्राह[5] । अस्त्येवात्मा स्वभावतः । प्रवृत्तिनिवृत्तिकारणत्वात् । यद्यात्मा न स्यात् कः शुभमशुभं वा[6] कर्मकृत्वा तत्फलं संवेदयेत । स हि शुभमशुभं वा[6] जातिगतियोन्यादिभेदभिन्ने अधातुके कर्मानुरूपं जन्मप्रबन्धमन[7]न्तं सुखदुःखदुःखफलोपभोगनिबन्धनमासादयति । स ह्यभिसंस्कर्ता च प्रत्यनुभविता च स हन्यते चाधर्मेण[8] स्पृश्यते मुच्यते[9] च । तस्मादस्ति स्वरूपत आत्मेति । किं पुनरयमात्मा[10] जन्मान्तरपरिवर्तेषु[11] देहभेदविकारमनुरुध्यतेऽथ न । यदि तावन्[12] नानुरुध्यते तदा किमनेनाकिञ्चित्करेणात्मपरिकल्पनेन[13] । अथानुरुध्यते तदा नियतं तव— ।

* देहाद्विकृतं याति पुमाञ्जन्मनि जन्मनि ।
देहान्त[14]चान्यता तस्य नित्यता च न युज्यते ॥ ४ ॥

---

१. T. सर्वथानुपलम्भात्
२. S. स्वभूतार्थारोपणं
३. T. नन्वनित्येत्यारभ्य जन्तुरितिपर्यन्तस्थाने—"अनित्येषु भावेषु रूपादिसंज्ञकेषु निःस्वभावेषु आत्मेति सत्व इति जीव इति जन्तुरिति मनुज इति कारक इति वेदक इत्याद्यहमिति विपरीत कल्पना क्रियते ।
४. S. यदा ।
५. T. अत्र ।
६. T. आचल वा अध्रुवक वा ।
७. S. अनन्तप्रभेदं
८. T. बाध्यते ।
९. T. बध्यते ।
१०. T. इदानीं
११. T. जन्मान्तरेषु
१२. T. शब्दस्याभावः ।
१३. T. कल्पनेन
१४. S. & V. देहान्तेन

§ १०. नासौ देहादन्यो देहविकारानुविधायित्वाद् देहैकदेशवत् । नापि नित्यो देहादनन्यत्वात् । तस्मादयुक्त[1] आत्माध्यारोपः ॥४॥

२३०

§ ११. अत्राह । यद्यात्मा न स्वरूपेण सिद्धस्तदा देहस्य चेष्टासङ्कोचन-प्रसारणादीनां कः प्रवर्तयिता । न ह्यचालको रथश्चलति । तस्मादवश्यमेव रथ-चालकदेवदत्तवद्देहचेष्टाहेतुः कश्चिदन्तःकरणपुरुषोऽभ्युपेतव्यः । इदमपि न युक्तमिति प्रतिपादयन्नाह—

**भावस्य नास्पर्शगतः प्रेरणा नाम जायते ।**
**तस्माद्देहस्य चेष्टायाः कर्ता जीवो न जायते ॥ ५ ॥**[2]

§ १२. रथो हि केनचिदस्पर्शवता पदार्थेन प्रेरयितुं न शक्यते । स्पर्शवतो हि सा प्रेरणा । भवद्भिः परीक्षित आत्मापि न स्पर्शवान् कालवद्देहाभावात् । कस्याप्यस्पर्शवता केनचित्पदार्थेन स्पर्शो न भवति ।[3] यदैतदेवं तदा कुतो देहचेष्टा-हेतुत्वेनास्य सद्भावानुमानमस्पर्शवतोऽस्माद्भावात् प्रेरणा च । अन्यच्चायमात्मा प्रदेशाभावान्न स्पर्शवान् । योऽप्रदेशो न तस्य संयोगः । संयोगविरहितस्य च प्रेरणा न भवतीति न क्रियावत्त्वेन तत्सद्भावोऽभ्युपगन्तुं युज्यते ॥ ५ ॥

२३१

§ १३. अपि च । यद्ययमात्मा नित्यः स्यात्तस्यापरिरक्षणीयत्वादहिंसात्मक-धर्मोपदेशो न स्यादाकाशवत् । असिसाधाराग्निविषाशनिपातादिभिरस्य रोमापि कम्पयितुं न शक्यते । तस्मादेवोच्यते—

**अहिंसा नित्य आत्मा च को हेतुरिह मन्यते ।**
**सर्वथा घुणतो वज्रो रक्षणीयो न जायते ॥ ६ ॥**[4]

§ १४. अनपकाराशङ्कस्य वज्रस्य घुणात्परिरक्षणं नारभ्यते । तथात्मा नित्यश्चेदहिंसात्मको धर्मो न युज्यते । विद्यत एव चायमहिंसात्मको धर्मः तस्मादात्मा वा नित्यो नाभ्युपगन्तव्यः । कारणान्तरं वा वक्तव्यम् । तच्च नोच्यत इति न तद्युक्तम् ॥६॥

---

१. S. तस्माद्देहस्त्वात्मद्विति अयुक्त ।

२. V. अस्पर्शवत्सु भावेषु चेष्टा नाम न जायते ।
तस्माच्छरीरेच्चेष्टाया जीवः कर्ता न जायते ॥

३. द्रष्टव्या कारिका, २३२

४. V. शाश्वतस्यामरस्यास्यात्मनो हेतु र्हि को मतः ।
सर्वथा कीटकाद्वज्रभक्षणं नैव जायते ॥

## २३२

§ १५. अत्राह। नित्य एवात्मा जातिस्मरणसद्भावात्। उत्पन्नेषु संस्कारेष्वनन्तरभङ्गशीलेषु जात्यन्तरस्मरणं न युज्यते। जन्मान्तरसंस्कारा हि यत्रोत्पन्नाः [तत्र] एव नश्यन्ति। इहान्य उत्पद्यन्ते। तस्मादात्मातीते काल एवमेवमभूदिति स्मृति र्न युज्यते स्याच्चेदात्मा नित्यस्तदैव जात्यन्तरचारित्वेनानुस्मृति र्युज्यते। अस्याप्यनैकान्तिकत्वमुद्भावयन्नाह—

**जातिस्मरणसद्भावादात्मा ते यदि शाश्वतः।**
**क्षतं पूर्वकृतं दृष्ट्वा कायस्ते[2] किमशाश्वतः॥ ७॥[1]**

§ १६. इह जात्यन्तरेषु शूलाद्याघातोद्भूतानि क्षतानि भवन्ति। तथोपलक्षितकायाः केचिद्विनश्यन्ति। तथाभिलक्षितकायाश्चैव जायन्ते। जन्मानुस्मरणं च यथानुभवं काले जात्यन्तरजातावसानप्रकाशतत्परंमुपलभ्यते। तस्माज्जातिस्मरणसद्भावकृतात्मनित्यत्वपरिकल्पनावत्तेषा कायनित्यत्वं कल्पयितव्यं चेदेवमपीदं न भवतीति न तद्भवति।

§ १७. तस्माज्जातिस्मरणसद्भावादेतस्मादात्मा नित्यो न युज्यते कायस्यापि नित्यत्वप्रसङ्गात्॥ ७॥

## २३३

§ १८. अपि च। कथमयमात्मा जन्म स्मरतीति कल्प्यते। यदि स्वभावादेवेति। न तद् युज्यते। तस्याकल्पकस्वभावत्वात्। अथ सचित्तत्वादिति कल्प्यते। तदपि न युज्यते। स्वभावत्यागप्रसङ्गात्। तदेव प्रतिपादयन्नाह—

**आत्मनश्चेत्सचित्तस्य ज्ञातृत्वं जायते ततः।**
**सचित्तस्य न चित्तं स्यात्पुरुषो न च शाश्वतः॥ ८॥[3]**

§ १९. यदि बुद्ध्यादय आत्मनो गुणास्तद्योगेनात्मा गुणानुरूपं प्रवर्तते। भावा अपि प्रकृतिं न त्यजन्ति। ते चेदर्थान्तरसम्बन्धात् क्रियाविशेषवन्तस्तदा तेषां विशेषस्य पूर्वमभावेन विकारत्वम्। विकारवतां च स्वरूपं नास्तीति नास्ति तवात्मनः स्वरूपम्। चित्रादिवद् विकारवत्त्वात्।

§ २०. अन्यच्च। यथा चित्तवत्त्वेनात्मा चित्तवांस्तथाचित्तात्मकत्वेन चित्तवानपि किमचित्तवान् न स्यात्।

---

१. V. स्मृतिसन्तानसिद्ध्यर्थमात्मा नित्यो मतस्तव।
दृष्ट्वा भाग्यक्षयं तस्य सोऽनित्यः किं न ते मतः॥

२. B. अनुवादस्तु तवात्मा

३. V. आत्मनश्चेच्चैत्तवतो ज्ञातृत्वं जायते तदा।
नास्ति चित्तं च चैत्तं च पुमान्नित्यो न जायते॥

तस्मादिह न केवलं जातिस्मरणमेवायुक्तमक्षयस्य सचित्तत्वमपि न युक्तमिति नित्यत्वमपि न भवतीति नास्यात्मनो नित्यत्वम् ॥ ८ ॥

२३४

§ २१. अन्यच्च । यथाऽयमात्मा सत्त्ववत्त्वेन चेतयति तथा सुखदुःखादिमत्त्वेन पूर्वस्वरूपविनाशात् तं तं विशेषं प्राप्स्यति । तस्मादयमनित्य एव जायत इति प्रतिपादयन्नाह—

**जीवैः सुखादिमान्नाना दृश्यते यत्सुखादिवत् ।**
**तस्मात्सुखादिवत्तस्य नित्यतापि न युज्यते ॥ ९ ॥**[1]

§ २२. यदि सुखदुःखावस्थास्वस्य न कश्चिदपि विशेषः स्यान्न स्यात्तासामान्योन्यं भेदः । ततश्च षामात्मगुणानां भेदो न स्यात् । अतोऽवश्यमनेनात्मना विविधं सुखाद्यनुविधातव्यम् । तदनुविधाने च सुखादिवदेवास्य नित्यत्वं न युक्तम् ॥ ९ ॥

२३५

§ २३. अपि चान्य आहुः । यस्य दर्शने पुरुषो न सचित्तस्तस्येह दोषः । अस्माकं तु दर्शने पुरुषश्चैतन्यस्वरूप इति नानिष्टं भवतीति । तेषां मतमप्ययुक्तमित्युद्भावयन्नाह—

**कारणं जायते मिथ्या चैतन्यं शाश्वतं यदि ।**
**शाश्वतश्चेद्भवेदग्निरिन्धनं स्यान्निरर्थकम् ॥ १० ॥**[2]

§ २४. इह यदा कारणभूतानां चक्षुरादीनां प्रवृत्तयो रूपाद्यर्थेषु पतन्ति तदा रूपादिबुद्धयो रूपादिप्रकारेणानुपरिणममाना उपजायन्ते । तं च बुद्धिव्यवसायकृतमर्थं पुरुषश्चेतयते । चैतन्यं च विषयकल्पनास्वरूपं । स च पुरुषस्तस्मादभिन्नरूपो नित्यश्च । सर्वदा सन्निधानात् । पुरुषस्वरूपादभेदेनावस्थितैश्चैतन्यं च सर्वदा सन्निहितम् । तस्मादस्य चक्षुरादिकरणं निष्प्रयोजनत्वान्निरर्थकम् ।

§ २५. यस्य दर्शने इन्धनस्याभावेऽग्निर्न भवति भावे च भवति, तस्य दर्शने इन्धनन्यायो युक्तः । यस्य तु दर्शनेऽग्निर्नित्य इत्यभ्युपगमस्तस्य[3] निष्प्रयो-

---

१. V. जीवसुखादिमान् दृष्टो विभिन्नः स सुखादिवत् ।
तस्मात् सुखादिवत्तस्य नित्यतापि न युज्यते ॥

२. V. करणं जायते मिथ्या चैतन्यं शाश्वतं यदि ।
नित्यो यदि भवेदग्निरिन्धनं निष्प्रयोजनम् ॥

३. T. तथा सति

जनमेवेन्धनोपार्जनम् । तद्वदेतत् । ततश्चास्य महदादेर्विकारग्रामस्य विफलैव प्रवृत्तिरिति व्यर्थ एवास्य शास्त्रे प्रक्रियाप्रणयनश्रमोलक्ष्यते ॥ १० ॥

२२६

§ २६. अथ स्याच्चैतन्यशक्तिरूपः पुरुषः । तस्य चक्षुरादिकरणव्यापार-निबन्धनबुद्ध्यभिव्यक्तेश्चैतन्यवृत्त्यभिव्यक्तिः[1] उपभोक्ता हि पुरुषः । स विषयोप-भुक्तिक्रियाभिनिर्वृत्त्या[2] विषयं चेतयते स ह्यस्य विषयोपभुक्तिचैतन्यवृत्त्यात्मिका क्रिया । स च न विना चक्षुरादिना करणग्रामेण भवतीति कुतोऽस्य विकारग्रा-मस्य वृथात्वमिति । उच्यते । यदि चैतन्यं[3] चैतन्यवृत्तिस्वरूपं सा च क्रियात्मका[4] तदास्य क्रियाया[5] धर्मानतिक्रमेण भवितव्यम् । कश्च क्रियाणां धर्मः । द्रव्याश्रयत्वं चलत्वं च । तथाहि—

**अविनाशाच्चलं नाम द्रव्यं नास्ति क्रिया यथा ।**
**पुरुषोऽस्ति न चैतन्यमिति तेन न युज्यते ॥ ११ ॥**

§ २७. द्रव्यव्यापाररूपा हि क्रिया । सा चोदयात्प्रभृत्या विनाशाच्चला । तथा हि । वृक्षादयः पवनाभ्युपनिपात[6]मन्तरेणानारब्धक्रिया[7] उदयात् प्रभृत्या विनाशात्[8] तिष्ठन्त्यविचलाः । कम्पनक्रिया त्वेषां[9] पवनादिप्रत्ययसम्पातादुपजाय-माना आविनाशं चलना नातिवर्तते । यस्मादेतदेवं—

**पुरुषोऽस्ति न चैतन्यमिति तेन न युज्यते**

§ २८. यथा वृक्षादयश्चलनक्रियाप्रारम्भात् प्रागवस्थाया वृक्षाद्यात्मना द्रव्यरूपेणोपलभ्यन्ते, नैवं पुरुषः । स हि चैतन्यरूपमात्रत्वात् न[10] तद्व्यतिरिक्तः । द्रव्यरूपत्वाभावाच्च[11] चैतन्यरहितेनाप्यात्मनास्तीति न शक्यते कल्पयितुम् । ततश्च पुरुषो विद्यते[12] न चैतन्यमिति न युज्यते । यच्च[13] चैतन्यशक्तिसद्भावात् [14]पुरुषस्या-स्तित्वं कल्प्यते[15] तदप्ययुक्तम् । निराधारायाः शक्तेरसद्भावात् ॥११॥

---

१. S. व्यक्तेः
२. S. निवृत्त्या ।
३. S. नाऽत्र शब्दोऽयं विद्यते ।
४. S. सा च क्रियात्मिका इत्या—भावः ।
५. S. क्रियया ।
६. T. पवनोपनिपातं ।
७. S. नारब्धक्रिया ।
८. S. "उदयात् प्रभृत्या विनाशा" दितिवाक्यांशाभावः ।
९. S. त्वेषा ।
१०. T. नेत्याभावः ।
११. T. तद्व्यतिरिक्तद्रव्यरूपत्वाभा-वाच्च ।
१२. S. संविद्यते ।
१३. S. यच्चैतन्य...
१४. T. तदा पुरुषः
१५. T. कल्प्येत ।

२३७

§ २९. अपि चायं पुरुषो यदि चैतन्यव्यक्तेः पूर्वं[1] चैतन्यशक्तिरूपः स्यात् तदा—

**चेतनाधातुरन्यत्र दृश्यतेऽन्यत्र चेतना।**
**द्रवत्वमिव लोहस्य विकृतिं यात्यतः पुमान् ॥ १२ ॥**

§ ३०. चैतन्यस्य द्वैरूप्यकल्पनायामन्यत्र पृथक्त्वेन चेतनायाश्चेतनाधातु-श्चेतनाबीजं चेतनाशक्ति दृश्यते त्वया चेतनाशक्तेश्चान्यत्र पृथक् चेतना[2]। तस्मा[3]दश्चेतनाधातोश्चेतना प्रवर्तमाना चेतनाधातुसमानदेशा[4] प्रवर्तते। दृष्टान्तमाह द्रवत्वमिव लोहस्येति।

§ ३१. इह[5] यथा लोहं द्रवत्वमापद्यमानं लोहदेशाभिन्नदेशं भवति तद्वत्। बीजाङ्कुरयोर्ह्याविर्भावतिरोभावदर्शनान्न समानदेशता। न च पुरुषस्याविर्भावति-रोभावाविति समानदेशत्व[6]मस्ति। अतएवाचार्यो[7] द्रवत्वमिव लोहस्येति लोहस्य द्रवतादृष्टान्तमाह[8]। न च चैतन्यशक्तिरूपात् पृथक् पुरुषोऽस्ति व्यक्तः[9]। ततो-ऽन्यत्वात्। तदयं शक्तिरूपापन्नो व्यक्तिरूपतामापद्यमानो "द्रवत्वमिव लोहस्य विकृतिं यात्यतः पुमान्।" विक्रियमाणत्वाच्च लोहवदेव नास्यात्मना नित्यत्वमिति सिद्धम् ॥ १२ ॥

२३८

§ ३२. अन्ये पुनराहुः। न ह्यस्माकं चैतन्यरूपः पुमान्। किं तर्हि—

*** चैतन्यं च मनोमात्रे महांश्चाकाशवत्पुमान्।**
**अचैतन्यं ततस्तस्य स्वरूपमिव दृश्यते ॥ १३ ॥**

§ ३३. आत्मा हि प्रतिशरीरे सर्वप्राणभृतामाकाशवद् विभुः। तस्य च मनो-मात्रसंयुक्ता चेतना न सर्वव्यापिनी। मनश्चात्मनः परमाणुमात्रदेशसंयुक्तम्। तेन मनसा संयुज्य पुरुषस्तदभिन्नदेशं चैतन्यमुत्पादयति। ततश्च यथोक्तदोषानवसरो-

---

१. T. ज्ञानस्यास्य पूर्वं।
२. S. शब्दस्याभावः।
३. S. नास्ति शब्दोऽयमत्र।
४. T. धातुसमानदेशा।
५. S. नात्र शब्दोऽयं विद्यते।
६. S. समानदेशमस्ति।
७. T. नात्र शब्दोऽयं विद्यते।
८. S. अतएवाचार्यो लोहस्य द्रवता दृष्टान्तमाह।
९. T. पुरुषशक्तिर्व्यक्तास्ति।

ऽमन्यपक्ष[1] इति । उच्यते । यत एव ह्याकाशवदति[2]महतोऽस्य[3] पुरुषस्य मनोमात्रे चैतन्यमभ्युपेयते[4] त्वया "अचैतन्यं ततस्तस्य स्वरूपमिव दृश्यते ।

§ ३४. एवं सत्यचेतन एव पुरुषः प्राप्नोति । न हि परमाणुमात्रप्रदेशचेतना सम्बन्धेन सचेतनः पुरुष इति शक्यं[5] वक्तुम् । न हि लवणपरमाणुमात्रसम्पर्काद् गङ्गानदीजलं[6] लवणमिति शक्यं सम्भावयितुम् । तद्वदेतद् । द्रव्यं चात्मा चैतन्यं च गुणरूपम् । तयोः परस्परभेदादचेतनस्वरूप एव पुमान् । न चस्याचेतनस्य घटस्येवात्मत्वं कल्पयितुं न्याय्यमिति न युक्त आत्मा ।।१३।।

२३६

§ ३५. यदि चायमात्मा प्रतिसत्त्वं सर्वगतः स्यात् तदा—

*** परस्तत्र्केति[7] किं नाहमहं सर्वगतो यदि ।**
**तेनैवावरणं नाम न तस्यैवोपपद्यते ॥ १४ ॥**

§ ३६. यदि तावत्क्रिया[8] कल्पनयाहं सर्वगतः सर्वव्यापी स्यामाकाशवत् तदा सत्त्वान्तरेऽपि मदात्मनः सद्भावात् किमिति तस्य तस्मिन् ममेवाहङ्कारो नोत्पद्येत । एवं ह्यस्य सर्वगतत्वं युज्यते यदिह ममेव परस्यापि मदात्मनि स्यादहङ्कारः ।

§ ३७. न च परात्मनास्य मदात्मनः परशरीरे युक्तमावरणम् । न हि परात्मदेशे [9]मदात्मनोऽसद्भावः सर्वात्मनां व्यापित्वाभ्युपगमात् । यदा च समान-देशता तदा न तेन तस्यावरणं शक्यं कर्तुमिति प्रतिपादयन्नाह "तेनैवावरणं नाम न तस्यैवोपपद्यते ।"

§ ३८. समाने देशत्वात् स्वात्मस्वरूपस्येव स्वात्मना नास्त्यावरणमित्यहङ्का-रविषयत्वं परात्मनोऽपि प्रसज्यते । न त्वेवं[10] भवतीति न सर्वगत आत्मा । ।।१४।।

---

१. T. पक्षे
२. S. आकाशवदिति ।
३. S. महतः पुरुषस्य
४. S. ननु त्वया
५. S. युक्तं
६. S. गङ्गानदीहृदजलं
७. S. तवेति, T. तस्येति
८. S. भाविकया
९. S. अस्मदा...
१०. S. तेनैवं

§ ३९. एवं तावदुभयमतेऽप्यात्मनोऽस्तित्वमयुक्तमिति प्रतिपाद्य गुणानामपि सकलजगत्कर्तृत्वासम्भवेनायुक्ततां[1] प्रतिपादयन्नाह[2]—

*** येषां गुणानां कर्तृत्वमचैतन्यं च सर्वशः ।**
**तेषामुन्मत्तकानां च न किञ्चिद् विद्यतेऽन्तरम् ॥१५॥**

§ ४०. सत्त्वरजस्तमांसि त्रयो गुणाः । तेषां साम्यावस्था[3]प्रधानम् । प्रसवावस्था प्रकृतिः सेदानीं त्रिगुणात्मिका प्रकृतिरचेतनापि सती पुरुषस्य विदितविषयोपुरुषेणाभेदं[4] प्रतिपाद्य सकलं विकारग्रामं प्रसूते । तत्रायं क्रमः । पभोगौत्सुक्यात् प्रकृतेर्महान् । महानिति बुद्धेः पर्यायः । महतोऽहङ्कारः । एवं येषां वादिनां गुणानां कर्तृत्वमचैतन्यं चेत्यभिप्रायो वस्तुतत्त्वविचक्षणाः "तेषामुन्मत्तकानाञ्च न किञ्चिद् विद्यन्तेऽन्तरम्" इति पश्यन्ति । उन्मत्तको हि नाम विपर्यस्तविज्ञानसन्ततिः । स हि विपर्यस्तेन विज्ञानेन यथार्थं न प्रतिपद्यते । विपरीतं चावधारयत्यसदर्थं च प्रलपति । तथा चायमपि साङ्ख्यः ॥ १५ ॥

२४१

§ ४१. अपि चास्यायं पुरुषो विकारग्रामस्याकर्ता च भोक्ता च । गुणास्तु कर्तारो न तु भोक्तारः । तदयं कर्तृत्वमभोक्तृत्वं च निरुपपत्तिकं गुणानामावेदयन्नत्यन्तायुक्ततामेवात्मनः प्रकटयतीति प्रतिपादयन्नाह—

*** कर्तुं नाम विजानन्ति गृहादीन् सर्वथा गुणाः ।**
**भोक्तुं च न विजानन्ति किमयुक्तमतः परम् ॥१६॥**

§ ४२. युक्तिविरुद्धत्वाल्लोकासम्मतत्वाच्चास्य मतस्य नातः परमयुक्ततरम्[5]-स्तीत्यभिप्राय इति ॥ १६ ॥

२४२

§ ४३. एवं तावद् गुणानां कर्तृत्वमयुक्तम् । यस्याप्यात्मैव[6] कर्ता धर्माधर्मयोः फलस्य चोपभोक्तेति मतं[7] तस्याप्यात्मनो नित्यत्वमयुक्तम् । [तथाहि—]

*** क्रियावाञ्चाश्वतो नास्ति नास्ति सर्वगते क्रिया ।**
**निष्क्रियो नास्तिता तुल्यो नैरात्म्यं किं न ते प्रियम् ॥१७॥**

---

१. S. नायुक्तरूपतां
२. T. उद्भावयन्
३. T. 'समांशावस्था' इति यावत्
४. अभेदं ।
५. T. परमयुक्तं ।
६. T. यस्यापि दर्शने आत्मा··· ।
७. T. महत्

§ ४४. इह करोतीति कर्ता । तस्य क्रियानिबन्धनं कर्तृत्वम् । न ह्यकिञ्चित् कुर्वाणो निर्हेतुकः कश्चित् कर्तेति युज्यते । सति च क्रियावत्त्वे नियतं तु[1] क्रियाप्रागव [ स्थाविशेषोऽभ्युपगन्तव्यः ] पूर्वापरावस्थयोर्निविशेषस्यात्मनः पूर्वं वस्थावत् क्रियावत्त्वं नास्ति । न च स्पर्शवतां (?) क्रियावतां वाताग्न्यादीनां नित्यत्वम् । तद्वदस्यापि न सद्भावः ।

§ ४५. अपि चास्यात्मनः क्रियावत्त्वं न युक्तम् सर्वगतत्वाभ्युपगमात् । क्रिया हि कर्मास्थिता वा कर्माश्रिता वा । सा च द्विविधा । व्यापाररूपा भावरूपा च । तत्र कर्त्रास्थिता व्यापार रूपा । तद्यथा गमनक्रिया । सा हि गन्तृदेवदत्तस्था । तत्सम्बन्धाद् देवदत्तो गच्छतीत्युच्यते । स च सर्वगतो न भवतीति पादोत्क्षेपणावक्षेपणलक्षणया क्रियया पूर्वापदेशत्यागग्रहणाभ्यां क्रियावान् युज्यते । अथ तु यदि सर्वगतः कल्प्येत् तदा क्वायं ? गच्छेदनुपस्थितश्च क्व भवेत् । यस्मादेतदेवं तस्मात् "नास्ति सर्वगते क्रिया ।"

§ ४६. तथा कर्मस्थापि क्रिया या कम्पात्मिका संयोगादितो बाह्यरूपा (१) । या च पाकादिरकल्पात्मिका । सापि कर्तृस्थेन व्यापारेण भावेन च द्वाभ्यां सम्प्रयुक्ता ज्ञेया । तस्मादेवं "क्रियावाञ्छाश्वतो नास्ति नास्ति सर्वगते क्रिया" इति स्थितम् । अथात्मा क्रिया रहित इति ।

§ ४७. एवमपि ननु "निष्क्रियो नास्तिता तुल्यः" । निष्क्रियो हि भाव आकाशकुसुमसमो न सन् । आत्मनश्च निष्क्रियत्वात् सर्वथासद्भावेन् "नैरात्म्यं किं न ते प्रियम् ।"

§ ४८. यदि नित्य आत्मा नास्ति केन हेतुना नैरात्म्यं ते नप्रियम् । सकलासद्दृष्टिनिवृत्तिहेतुतः प्रियमवश्यमेव स्यात् ॥ १७ ॥ ]

२४३

§ ४९. अपि च । यद्यात्मेत्ययं कश्चिदग्नेरौष्ण्यवत् स्वरूपेण स्यात् तदा स तेन स्वरूपेण सद्भावान्नियतमुपलभ्येत । न त्वेवमस्ति । तथाहि स वादिभिः—

**दृश्यते सर्वगः कैश्चित्कैश्चित्कायमितः पुमान् ।**
**दृश्यतेऽणुमितः कैश्चित्प्राज्ञै र्नास्तीति दृश्यते ॥१८॥**[2]

---

१. T. क्रियारम्भकालेऽस्य तत्

२. T. सर्वगः केनचिद्दृष्टो देहमात्रस्तु केनचित् ।
दृष्टोऽणुमातरः केनापि प्राज्ञैर्नासन् स दृश्यते ॥

§ ५०. तत्र केचित्प्रतिशरीरमभिन्नं सर्वगतमात्मानं प्रतिपद्यन्ते। अन्ये सकल-जगदात्मानं चन्द्रवदेकमेव प्रतिपद्यन्ते। तस्य च भेदो देहभेदादौपचारिकः। तैलघृतजलादिपात्रभेदेन चन्द्रप्रतिबिम्बभेदवत्। स च सर्वगतः। एवं "दृश्यते सर्वगः कैश्चित्कैश्चित्कायमितः पुमान्"।

§ ५१. एवं केचिद भ्रमरसारसपिपीलिकाहस्त्यादीनामात्मा कायमात्र इति [तस्य] सङ्कोचं विस्तारं च प्रतिपद्यन्ते। अन्येऽस्य सङ्कोचविस्तारधर्ममसह-माना आत्मा परमाणुमात्र इति प्रतिपद्यन्ते। तथागतोक्तिमाश्रित्य जातसम्य-ग्ज्ञानाः प्रतीत्यसमुत्पादधर्माभिज्ञानप्रज्ञावन्तस्तु [स] नास्त्येवेत्युपलभन्ते।

§ ५२. यदि स स्वरूपेण स्यात् तदा नियतं स खलुभावोऽविपरीतदर्शनै-र्बुद्धैरात्मत्वेनोपलभ्येत। तीर्थिकानां चैवं नाना दर्शनं न स्यात्। अस्ति चैतत् सर्वमिति नास्त्यात्मा स्वभावरूपेण ॥१८॥

२४४

§ ५३. अपि च यद्यात्मा स्वरूपेण स्यात् तदा निर्विकारत्वेन मुक्ति र्न स्यात्। सोपद्रवस्य हि तत्र पराङ्मुखस्य पुरुषस्य ततो निवृत्या कुशलं सम्भवति न त्वात्मनो नित्यस्य निरुपद्रवस्य।

**शाश्वतस्य कुतो बाधा मोक्षो बाधां विना कुतः।**
**तेनात्मा शाश्वतो यस्य तस्य मोक्षो न युज्यते ॥१९॥[1]**

§ ५४. उपकारापकाराभ्यां निर्विशेषात् का स्यान्मोक्षावस्था। किञ्चास्या एवमभावे। तस्मात्सर्वथा निर्विशेषादात्मनित्यत्ववादिनो मोक्षो न युज्यते ॥१९॥

२४५

§ ५५. अन्यच्च। सर्वैः पाखण्डिकैरात्मग्राह्यात्मीयग्राह्ययोः सर्वथा क्षपणी-यत्वान् मुक्तिरभ्युगता। तस्मात्तेषां मुक्त्यवस्थायाम् -

**भवेदात्मेति चेन्नैव युक्तं नैरात्म्यचिन्तनम्।**
**तत्त्वज्ञानेन नियतं निर्वाणमिति चानृतम् ॥२०॥[2]**

---

१. V. नित्यस्य कस्यचिद् दुःखमदुःखस्यास्ति निर्वृत्तिः।
नित्यो यस्य भवेदात्मा तस्य मोक्षो न युज्यते ॥

२. V. नूनमात्मा यदि भवेन्नैरात्म्यं नैव भाव्यते।
सुयुक्तितोऽपि निर्वाणं वितथं तस्य जायते ॥

§ ५६. यद्यात्मा स्वरूपेण स्यात्तदा स्वरूपनिवृत्त्यभावान्मोक्षावस्थायामपि [तस्य] सद्भावः स्यात् । तस्मान्मोक्षावस्थायामनपनीतात्मग्राहहेतुप्रतिबन्धस्यात्मयः सद्भावादात्मा नास्तीत्येवमात्मग्राहप्रहाणं न युक्तम् । तस्मादात्मतत्त्वज्ञानेन नियतमात्मग्राहप्रहाणान्निर्वाणं भवतीत्यप्यनृतम् । तत्राप्यात्मग्राहसद्भावात् ॥२०॥

२४६

§ ५७ अथात्मसद्भावे मोक्षावस्थायामात्मग्राहप्रवृत्तिप्राप्त्या भयान्मुक्त्यवस्थायामात्मनोऽस्तित्वं नाभ्युपगम्यते । नन्वेवमपि भवति—

**मुक्तो यदि भवेन्नैव भवेत्प्रागपि नैव सः ।**
**असंयुक्ते हि यद्दृष्टं स स्वभाव इतीर्यते ॥२१॥**[1]

§ ५८. सम्बन्धिधर्मासंयुक्तस्य स्वरूपविशेषमात्रावस्थितस्य भावमात्रस्य यावानंश उपलभ्यते स तस्य स्वभाव इति व्यवस्था । धर्मान्तरामिश्रणात् । यथा ज्ञातक्षयस्य सुवर्णस्य तदन्यस्य सम्बन्धिनो लोहस्य परिक्षयाद् या विशुद्धावस्था [स] तस्य स्वभावो व्यवस्थाप्यते तथा मुक्तस्यात्मनो विशुद्धज्ञानावस्थायां ज्ञानस्य यः स्वरूपविशेषो दृश्यते तत्तस्य स्वरूपमिति युक्तिर्नैषदपि दृश्यते । अहङ्कारप्रवृत्तिप्रसङ्गात् । तस्मान्मोक्षस्य पूर्वावस्थायामपि स तस्य स्वभावो भवत्येवेति युक्तम् । तस्मादात्मा स्वरूपेण न सिद्ध्यतीति स्थितम् ॥२१॥

२४७

§ ५९. अत्राह । यद्यात्मा न स्यात्तदा प्रतिक्षणविनाशशीलानां संस्काराणामुत्पत्त्यनन्तरं भङ्गादुच्छेददृष्टिः । वैनाशिकानां भावानामाश्रय आत्मा त्ववैनाशिक इति सर्वथाभावानाभ्युपगमान्नास्त्युच्छेददृष्टिः । उच्यते—

**उच्छेदश्चेदनित्यस्य मूलाद्यद्यापि किं भवेत् ।**
**यदि सत्यं भवेदेतन्न मोहः कस्यचिद्भवेत् ॥२२॥**[2]

§ ६०. लोके हि नानित्यार्थोच्छेदेन कल्पना । तथाहि । प्रथमकल्पात् स्थितानां मूलमूलाङ्कुरद्रुमादीनां हेतुफलसम्बन्धप्रवृत्तिक्रमोऽविच्छेदेनाद्याप्युपलभ्यते । अपि

---

१. V. यदि नास्त्येव निर्वाणं तत्प्रागपि न विद्यते ।
दृष्टं यन्मानुषे नाम सत्त्वं तस्यैव भाष्यते ॥

२. V. उच्छेदो यद्यनित्यस्य तृणादेः सम्भवः कथम् ।
सदिदं चेत्तदा कस्याप्यविद्यैव न जायते ॥

च यद्यनित्यस्योच्छेदस्तदा सन्तानाप्रवृत्तिलक्षणो विनाशः । ततश्च कथमेतानि मूलादीन्यद्याप्युपलभ्यन्ते । उपलम्भाच्च नानित्यस्योच्छेद इत्यवगम्यत इत्यवश्य-मेवैवमभ्युपगन्तव्यम् । न चैवम् । यद्यनित्यस्योच्छेद इतीयं दृष्टिर्यथार्था तदा नियतं न कस्यापि सत्त्वस्य मोहः ।

§ ६१. अनित्यस्योच्छेद इति च नियमेनोच्छेदादविद्यया प्रवृत्ति र्न स्यात् तस्मात्संसारविपर्यासावरणं विनैव साध्यं स्यात् । सर्वस्य च लोकस्यविद्यया-प्रहाणात् किञ्चिदपि तत्त्वं नादृष्टमित्येवमपि न भवतीति नानित्यस्योच्छेदः ॥२२॥

२४८

§ ६२. अथ सकलभावोद्भवहेतोरात्मनो नित्यत्वमिति न तेन हेतुना प्रवृत्तमूलादीनामुच्छेददृष्टिरिति । तदपि न भवति । न हि क्वापि हेतुप्रत्ययानाय-त्तोद्भवो नित्यो भावो विद्यत इति प्राक् प्रतिपादितम् । असतश्च खरविषाणव-ज्जगत्प्रवृत्तिहेतुत्वं न युक्तमिति नास्ति तत्सद्भावनिबन्धना जगत्प्रवृत्तिः । अथवा यद्यात्म सद्भावो निवेश्यते जगतोऽस्य प्रवृत्तिहेतुरेव न युक्तो भवेत् । तथाहि—

**सद्भावेऽप्यात्मनो रूपस्योद्भवो दृश्यतेऽन्यतः ।**
**दृश्यते स्थितिरन्यस्माद्विनाशो दृश्यतेऽन्यतः ॥२३॥[1]**

§ ६३. यदि भावा आत्महेतुकास्त आत्मनः पृथग्भूताद्भावान्तरान् नोद्भ-वेयुः । मणीन्धनसूर्यसंयोगादग्निरुद्भवति । चन्द्रसमागमे चन्द्रकान्तमणितः सलिलं स्रवति । बीजादिभ्योऽङ्कुरादय प्रवर्तन्ते । कललादिभ्यो महाभूतेभ्यो यथा पिण्डादबुर्दाद्घनात् प्रशाखायाः प्रत्यङ्गेभ्यश्च तेभ्यश्चक्षुरादीन्युपलभ्यन्ते । एवं सति रूपमन्यस्मादुद्भवतीत्युपलभ्यते ।

§ ६४. अपि च यद्येतत् सर्वमात्मकर्तृकमेव स्याद्रूपस्यास्य प्रवृत्तिस्तस्मा-देवेत्युपलभ्येतैव किं हेत्वनन्तरपरीक्षया । ततश्च हेतुत एव जगत्प्रवृत्तिरिति किम-न्यया निरर्थयात्मकर्तृकत्वपरीक्षया ।

§ ६५. यथा रूपस्यान्यस्मादुद्भवो दृश्यते स्थितिरप्येवमन्यस्माद्दृश्यते । इन्धनसंयोगादे र्हेतोरन्याद्यर्थसिद्धेर्दर्शनात् । "विनाशो दृश्यतेऽन्यतः ।" इन्धन-वैकल्यादेर्हेतोः । तस्मान्नास्त्यात्मा स्वरूपेण ॥२३॥

---

१. V. सत्तायामात्मनो रूपमन्योद्भूतं हि दृश्यते ।
दृष्टं वैषस्थितिमन्यस्य विनाशोऽन्यस्य दृश्यते ॥२३॥

२४९

§ ६६. यदा न नित्याजातिस्तदा लोके—

**यथा हि कृतकाद्बीजाज्जायते कृतकोऽङ्कुरः।**
**अनित्येभ्यस्तथा सर्वमनित्यमेव जायते ॥२४॥**[१]

§ ६७. यथा हेतुप्रत्ययान्तरायत्तोद्भवात् स्वभावासिद्धाद्बीजात् प्रतीत्य-समुत्पादादङ्कुरः कृतकः स्वयमव्यवस्थितो निःस्वभावः प्रकृतिशून्यस्तथा पण्डिते-नानेन दृष्टान्तेन भावान्तराणामप्रकाशावृत्ताः सूक्ष्मा हेतुफलावस्था अरूपिणो वेदनादयो हेतुकर्मक्लेशातीता अनास्रवाः संस्काराश्च (१) निःस्वभावाद् हेतो निःस्वभावा जायन्त इति निर्णेयम् ॥२४॥

२५०

§ ६८. एवं च यत्र संस्काराणां शाश्वतोच्छेदवज्राशनिर्लौकिकलोकोत्तर-हेतुफलसम्बन्धप्रोन्मूलनः पतति [तत्र] तमपि पण्डितः प्रतीत्यसमुत्पादज्ञानप्रशं-सयातिदूराद् वारयतीति प्रतिपादयन्नाह—

**यस्मात्प्रवर्तते भावस्तेनोच्छेदो न जायते।**
**यस्मान्निवर्तते भावस्तेन नित्यो न जायते ॥२५॥**[२]

§ ६९. भावो भवनधर्मी फलमङ्कुरादिः। यस्माद्बीजाख्याद्धेतोः फलमङ्कुरो भवति तस्माद्बीजं नामानुच्छेदम्। यद्यङ्कुरादिसन्तानमनुत्पादयदग्निसंयोगादिव बीजं निरुध्यते ततोच्छेददृष्टिः। अङ्कुरादिप्रवृत्तिसद्भावदर्शनात्तु बीजस्योच्छेद-दृष्टि र्न सम्भवति।

§ ७०. कारिकाया कृतौ द्वितीयो भावशब्दो हेतुवाचकः फलमस्माद् भवतीति कृत्वा। अपि च। यद्यङ्कुराख्ये कारिकाया कृतौ द्वितीयो भावशब्दो हेतुवाचकः फलमस्माद् भवतीति कृत्वा। अपि च। यद्यङ्कुराख्ये फले प्रवृत्तेऽपि स्वभावा-वस्थितया बीजं न निवर्तेत तदा बीजस्याविकारदर्शनाच्छाश्वतदृष्टिः। न

---

१. \. यथैव कृतकाद्बिजादङ्कुरः कृतको भवेत्।
अनित्येभ्यस्तथा सर्वमनित्यमेव जायते ॥२४॥

२. माध्यमिकवृत्ति, पृ०. ३६७

त्वेददेवं भवति। बीजनिवृत्तिदर्शनात्। यदि न निवर्तेत तदा तस्मादङ्कुरान्तरमपि भवेत्। न चेह तद् भवतीति।

यस्मान्निवर्तते भावस्तेन नित्यो न जायते सोऽपि स्वभावेन सिद्ध इति बीजाङ्कुरो द्वपि तत्वान्यत्वकल्पनासम्यवाद सिद्धाविति भावानां निःस्वभावत्वमतिव्यक्तं सिद्धम् ॥२५॥

**योगाचारे चतुःशतके आत्मप्रतिषेधभावनासन्दर्शनं दशमं प्रकरणम् ॥१०॥**

**दशमं प्रकरणं समाप्तम्**

## एकादशं प्रकरणम्

### कालप्रतिषेधभावनासन्दर्शनम्

२५१

§ १. अत्राह कालवादी । रूपादीनामन्यस्मादुद्भवदर्शनाल्लोकस्याप्रत्यक्षत्वात्कस्यचित्सत्यस्य फलस्यादर्शनेनुमानागम्यत्वाच्च नास्त्यात्मेति यदुक्तं न [तेन] सर्वथा नित्यानां भावानामभावः। कालसद्भावात् । इह क्षितिसलिल-ज्वलन पवनाकाशबीजादि सद्भावेऽपि कदाचित्कुसुमाङ्कुरादीनामुत्पादभङ्गयोरभावादथ कदाचिद्भावात्कालो नाम तत्फलदर्शनान्मानम् । स च क्षणपलमूहूर्तादिव्यञ्जनीयोऽतीतोनागतः प्रत्युत्पन्नश्च कालत्रयव्यवस्थिताद्भावादिभन्नो नित्य इति ।

§ २. अत्रोच्यते । यदि कालो नाम भावादिभन्नो ज्ञानसिद्धो भवेद्भवेत्स उत्पादभङ्ग हेतुः । न त्वेवमस्ति । भावादिभन्नत्वेन ग्रहणप्रसङ्गात् ।

**यस्मिन्भावे प्रवृत्ति च निवृत्तिश्चोपलभ्यते ।**
**अन्यायत्तो भवत्येष कार्यस्तेन च जायते ॥**

इत्यादिना ( कारिका, २०७ ) प्रतिसिद्धत्वादपि स्वलक्षणसिद्धस्य कालस्य न प्रवृत्तिनिवृत्ति हेतुत्वम् ।

§ ३. अन्यच्च । ये त्रयः कालाः कालस्य स्वभाव विशेषेणावस्थितास्तेऽप्यमूर्त्तत्वेन स्वरूपेण निर्णेतुमशक्यत्वान्न शक्यन्ते स्वभावेन व्यवस्थापयितुम् । तेषामरूयातव्यस्य भावस्य विशेषो घटादिद्वारा शक्यो व्यवस्थापयितुम् । ते तु भावभिन्नस्वरूपा वेदनादिवदनुभवाकारा न रूपशब्दादिवदिन्द्रियद्वारा परिच्छेत्तव्याः । तस्माद्घटादिद्वारैव तेषा विशेषः परिच्छद्यत इति तद्द्वारा कालत्रय निषेधेन कालप्रतिषेधं कर्त्तुं काम आह—

**अनागते घटे वर्तमानेऽतीतश्च नो घटः ।**
**यस्मादनागतौ तौ द्वौ नास्ति तस्मादनागतः[१] ॥१॥**

§ ४. अनागतः काल उपव्याख्यातव्य इति तदर्थमनागतो घट उपन्यस्तः । तथातीतप्रत्युत्पन्न कालोपव्याख्यानार्थमतीतप्रत्युत्पन्नघटोपन्यासः । तत्रानागतो न प्रत्युत्पन्नं कालं प्राप्तः । अतीतस्ततः एवातीतः प्रत्युत्पन्नो जातोऽनिरुद्धः ।

---

१. V. नानागतो वर्तमानो घटोऽतीतो न विद्यते ।
अनागतं द्वयं येन तेन न स्यादनागतः ॥

ते च त्रयः कालाः परस्परापेक्षयैव स्थिताः । द्वौ द्वावपेक्ष्यैकैको न भवतीति ।

§ ५. यः सोऽनागतो घटो न तस्मिन्वर्तमानो घटो नाप्यतीतः । लक्षण-भेदादितरेतरासम्भवाच्च यद्येवमनागते घटे वर्तमानोऽतीतश्च द्वावपि न विद्येते तदा वर्तमानोऽतीतश्च द्वावप्यनागतावनागतत्वेनानागतौ । यथानागतो वर्तमानेऽनानागतस्तथा वर्तमानोऽतीतश्च द्वावप्यनागतावनागतत्वेनानागतौ । यदि वर्तमानेऽनागतत्वेनानागतो नानागतोऽनागतत्वेनेति । नैतदेवम् । अनागतसिद्धौ वर्तमानस्यातीतस्य च द्वयोः सिद्धिः । यदि त्वनागत एव नास्ति तदा कुतोऽतीतः प्रत्युत्पन्नो वा भवेत् । इदमभिप्रेत्याचार्योऽनागतस्याभावं प्रतिपादयितुकामस्तत एव ।

यस्मादनागतौ तौ द्वौ नास्ति तस्मादनागतः । इत्याह । यस्मादुभावप्यनागतौ तदा त्रयोऽप्यनागता एव । त्रयाणामनागतत्वे चातीत प्रत्युत्पन्नयोरसंम्भवात्कुतोऽनागतत्वेनानागतो व्यवस्थाप्यते । तस्मान्नास्त्यनागतः कालः ॥१॥

२५२

§ ६. अथ मन्यते । अनागतो घटः सर्वथा नास्त्येवेति न । अनागतस्य स्वभावोऽनागते घटे विद्यते । तस्मादनागतस्य सद्भावेन पृथगतीतस्यापि सिद्धिसद्भावे विद्यत एवानागत इति । एवमपि ।

**यद्यतीतानागतयोः स्वभावः स्यादनागते ।**
**अनागतः स्वयं यः स्यादतीतः स कथं भवेत् ॥२॥**[1]

§ ७. यद्युभयमतीत्वमनागतत्वं चानागते घटे विद्यत इति मन्यते तदातीत्वं न युक्तम् । त्वम्मतेनानागतत्वस्य सद्भावात् । अनागतस्वभाववत् । तस्मात् स एव दोषः ॥ २ ॥

२५३

§ ८. अपि च योऽनागतो भावः स तेन किं सन्नाहोस्विदसन् । उक्तमनागतस्वभावसद्भावेनानागतः सन्निति व्यवस्थापितम् । तथा सत्यस्यानागत्वं न भवति । कस्मादिति ।

---

१. V. अनागतस्य नष्टस्य स्वभावश्चेदनागते ।
अनागतः स्वतो यः स्याद् सोऽतीतो जायते कथम् ॥

**यस्मादनागतो भावः स्वयं तिष्ठत्यनागतः।**
**वर्तमानो भवेत्तस्मान्न सम्भवत्यनागतः[1] ॥३॥**

§ ९. यस्येदानीमस्तित्वं तस्य वर्तमानत्वमिदानीं सद्भावाद्वर्तमानस्वभाववत् अथ न तस्य वर्तमानात्मकत्वमपिनागतात्मकत्वं तस्मान्न वर्तमानो भवतीत्यस्त्येवा-नागतत्वमिति मन्यते। उच्यते।

यस्य यः स्वभावस्तत्तत्रतदात्मकं वर्तमाने च। तथा हि। नीलं नीलात्मक-त्वसद्भावेन वर्तमानं न तत् पीतात्मकत्वेन। तथानागतोऽप्यनागतात्मकत्वभावेन वर्तमान एव भवतीत्यस्यानागतत्वं सम्भावयितुं न शक्यते। यदैवमनागतो न सम्भवति तदा कोऽतीतो वर्तमानो वेति चिन्त्यम्। तस्मान्न कालत्रयसद्-भावः ॥ ३ ॥

२५४

§ १०. ये [तु] स्वयूथ्या आहुर्भावानां स्वलक्षणाभ्युगमात्ते कालत्रये भवन्ती-त्यनिष्टस्वभावा भावा एव हेतुप्रत्ययसामग्र्या तस्यां तस्यामवस्थायां भवन्तीति। तान् प्रति वक्तव्यम्-। अनागतोऽस्त्यतीतोऽस्ति वर्तमानोऽस्ति नास्ति कः। सर्वकालास्तिता यस्य तस्यास्त्यनित्यता कुतः ॥ ४ ॥[2]

§ ११. यन भावो वर्तमानो भवत्यस्य यः स्वभावो बुद्धिदृश्यः स्वभावः स एवानागतावस्थातीतावस्थयोरपीत्यभ्युपगमवादः। तत्र कुतस्तस्यानित्यता-दृष्टिः। तस्माद्भावाः स्वभावान्नित्यत्वेन नित्या एव। एवं च तस्यागमविरोधः। उक्तं हि भगवता अनित्या वत संस्कारा उत्पादव्ययधर्मिणः। उत्पद्य [ ते ] निरु-ध्यन्त तेषामुपशमः सुखः[3] इति ॥४॥

२५५

§ १२. यथा नागतस्यानागतत्वासम्भवेनानागतत्वं नास्ति तथातीतस्याप्य-तीतत्वा सम्भवादेवाभाव प्रतिपादयन्नाह—।

---

१. V. अनागतो यतो भावः स्वयं तिष्ठत्यनागतः।
अनागतत्वं न ततो वर्तमानस्य जायते ॥

२. V. अनागतोऽस्त्य अतीतोऽस्ति वर्तमानोऽस्ति नास्तिकः।
अतीत्यता कुतस्तस्य यस्य सत्त्वैव सर्वदा ॥

३. अनिच्चा वत संखारा उप्पादव्ययधम्मिनो।
उप्पज्जित्वा निरुज्झन्ति तेसं वुपसमो सुखो ॥
संयुत्तनिकाय, २.२, १६३

**स्यादतीतादतीतश्चेदतीतो जायते कुतः।**
**अतीतादनतीतश्चेदतीतो जायते कुतः ॥ ५ ॥**[1]

§ १३. योऽतीतः कालः स किमतीतस्वरूपादतीत आहोस्विदनतीतः। यदि यावदतीतादतीतः। सोऽतीत इति न युज्यते। अतीतत्वं नामातिक्रान्तस्यव्यापारः। य इदानीं तस्मादतीतोऽतिक्रान्तः कथं सोऽतीतः। दुग्धभावादतीतं दधि दुग्धमिति बालभावादतीतस्य प्राप्तयौवनस्य बाल इति चाभिधानं न भवति। एवमतीतादनतीतोऽतीत इति न युज्यते।

§ १४. अथ मतमतीतोऽतीतादनतीत एवेति। एवमप्यतीतादनतीतोऽतीतं नात्येत्यतीतव्यापारेणाशून्यः कस्मादतीतः। तस्मादतीतत्वासंम्भव एवेत्यभिप्रायः। तस्मादेवमतीतादनतीतोऽप्यतीतो न युज्यते।

§ १५. तस्मन्नास्त्यतीतः कालः स्वरूपेण। अतीताभावे च तदनपेक्षितोऽनतीतोऽपि न सम्भवतीति न कालत्रयं स्वरूपेण विद्यते ॥ ५ ॥

२५६

§ १६, यो वैभाषिकः सर्वकालसद्भाव वक्तुं सर्वास्तिवादमेव प्रशंसति तस्य पुनर्विवादः परीक्षितव्यः। यस्यानागतस्यार्थस्यास्तित्वं कल्प्यते स जातोऽजातो वा कल्प्यते। तत्र तावत्भवेज्जातोऽनागतश्चेद्वर्तमानो भवेन्न किम्। अथाजातो भवेत्तस्य शाश्वतः किमनागतः ॥ ६ ॥[2]

§ १७. यद्यनागतो भावो जात इति परिकल्प्यते स जात एवेति वर्तमानो भवेन्नानागतः। अथाजातस्य तस्यास्तित्वं कल्प्यते। एवमपि अथाजातो भवेत्तस्य शाश्वतः किमनागतः। यदजातं विद्यमानं च तन्निर्वाणवन्नित्यमेव। तस्मान्निर्वाणवदेव तस्यानागतो मन्तव्यः ॥ ६ ॥

२५७

§ १८. [ अथानागतो यद्यप्यजातस्तथापि सोऽसंस्कृतवन्नाविनाशो। ][3]

तथा हि। हेतुप्रत्ययैस्तस्यानागतभावविनाशेन[4] वर्तमानता भवति। न चैवमसंस्कृत स्वरूपात्प्रच्यवत[5] इति नास्यासंस्कृतवन्नित्यत्वमिति। एवमपि कल्प्यमाने।[6]

---

१. V. अतीताज्जायतेऽतीतः सोऽतीतो जायते कथम्।
अनतीतश्चेदतीतात्सोऽतीतो जायते कथम् ॥

२. V. अनागतश्चेदुत्पन्नो वर्तमानः कथ न सः।
अथानुत्पाद एवास्य नित्यं किं वास्त्यनागतः ॥

३. T.; ४. T. S. तस्यानागतभावव्युत्पा [द] हेतुप्रत्ययैर्

५. T. च्यवत् ६. T. कल्पिते

* विनापि जन्मना भङ्गादनित्यो यद्यनागतः ।
अतीतस्य न भङ्गोऽस्ति स नित्यः किं न कल्प्यते ॥ ७ ॥

§ १६. यदि स्वरूपप्रच्युतिसद्भावादनागतस्य नित्यत्वं (नेष्यते भावस्या) तीतस्य तर्हि स्वरूपप्रच्युति[1]र्नास्तीति स नित्य इति कल्प्यताम् ।

२५८

§ २०. कस्य[2] वा पदार्थस्य शक्यमनित्यत्व कल्पयितुम् । यदा च न शक्यते तदा सर्वपदार्थानामनित्यत्वस्यासम्भवान्नित्यतैव सम्भाव्यते ।[3] तत्र तावत्—

* अनित्यो वर्तमानोऽयमतीतश्च न जायते ।
ताभ्यामन्या तृतीयापि गतिस्तस्य न विद्यते ॥ ८ ॥

§ २१. यस्तावदय वर्तमानः पदार्थस्तस्य तावद् नित्यत्वं नास्ति । स हि वर्तमानत्वात्स्वभावादच्युतेर्वर्तमान इति व्यपदिश्यते । यस्य चानित्यत्वं स वर्तमान एव न भवत्यभावेनाभिसम्बन्धात् । भावाभावयोश्च युगपदसम्भवाद्[4] वर्तमानस्यानित्यत्वं न सम्भवति ।

§ २२. तथा[5]तीतस्याप्यनित्यत्वं न सम्भवति । विनष्टो ह्यतीत उच्यते । न च विनष्टस्य पुनरपि विनाशो न्याय्यो निष्प्रयोजनत्वादाश्रयाभावादनवस्थाप्रसङ्गाच्च । एवं तावद् ।

अनित्यो वर्तमानोऽयमतीतश्च न जायते । न च वर्तमानातीतौ मुक्त्वा तस्यानित्यत्वस्य तृतीयोऽवकाशो युज्यत इत्याह—

ताभ्यामन्या तृतीयापि गतिस्तस्य न विद्यते । उत्पन्नस्य यदानित्यता[6]श्रयस्यानित्यत्वमसम्भाव्यं तदोत्पत्तिशून्यस्यानागतस्याकाशादेरिव तत्स्यादित्यत्यन्त मसङ्गतम्[7] । न चानित्यतारहितस्याकाशादेरध्वत्रयकल्पना युक्तिमती । तद्वत्सत्स्वभावभाववादिनो न युक्तमध्वत्रयम् ॥८॥

२५६

§ २३. अत्राह । अस्त्येवानागतो भावस्तस्य सत्सु प्रत्ययेषु जन्मदर्शनात् ।

---

१. T. च्युति
२. T. अथवा (यन्न) कस्य पदार्थस्य
३. T. भवति
४. सम्भवात्
५. S. अतीतस्य
६. T. S. नित्यता ।
७. T. असम्बद्धम् ।

न ह्यसतः पूर्वं[1] पश्चाज्जन्म युज्यते वन्ध्यापुत्रादेरिव । ततश्च जन्मदर्शनादस्त्ये-वानागतो भाव इति । एवमपि कल्प्यमाने—

*** यः पश्चाज्जायते भावः स पूर्वं विद्यते यदि ।**
**न मिथ्या जायते पक्षस्तस्मान्नियतिवादिनाम् ॥ ९ ॥**

§ २४. य उत्पादात्प्रागवस्थो भावो हेतुप्रत्ययैः पश्चाज्जायते[2] स यद्युत्पादात्पूर्वं स्वरूपतोऽस्तीति कल्पयत एवं सति नियतिवादिनां[3] प्रतिनियतस्वभावं निर्हेतुकं पुरुषकारशून्यमुपपत्तिविरुद्धं जगद्वर्णयतां नाभ्युपगमो मिथ्या स्यात् । न च न मिथ्या तेषां वादः । तत्पक्षस्य दृष्टादृष्टविरोधात् । पुरुषकारानपेक्षत्वात्तेषां जगतः[4] प्रतीत्यसमुत्पादाभावः । तदभावाच्च खरविषाणवत्सर्वं जगदग्राह्यं स्यादित्ययुक्तो नियतिवादः । यदि चायं[5]मनागतः सद्भाववादो[6] न्याय्यः स्यात्तदा नियतिवादिनामपि वादो[7] न्याय्यः स्यादित्ययुक्तोऽनाग[8]तार्थसद्भाववादः ॥९॥

२६०

§ २५. इतश्चायुक्तो यतः—

*** सम्भवः क्रियते यस्य प्राक्सोऽस्तीति न युज्यते ।**
**सतो यदि भवेज्जन्म जातस्यापि भवेद्भवः ॥ १० ॥**

§ २६. यस्यार्थस्य हेतुप्रत्ययैः संभव उत्पाद[9]नं क्रियते स जन्मनः पूर्वमस्तीति न युज्यते । यदि हि तस्यास्तित्वं[10] स्यात्तदा सतो[11] विद्यमानस्य पुनरपि[12] जन्म

---

१. T. पूर्वमसतः ।
२. T. यो भाव उत्पादात्प्राक् स्वरूपाभावान्नास्ति [पश्चात्] हेतुप्रत्ययैरुत्पाद्यते ।
३. T. नियतिवादः ।
४. T. तेषां दर्शनेजगतः
५. T. S. अस्य ।
६. T. S. वादिनो ।
७. T. वादोऽपि ।
८. S. युक्तो नागतार्थ ।
९. T. S. उत्पादनं सम्भवः ।
१०. T. अस्तित्वं
११. T. सदात्मकस्यापि ।
१२. T. अपि ।

स्यात् । न च सतः पुनरपि जन्म न्याय्यं निष्प्रयोजनत्वात् । इति न युक्तोऽनागत-पदार्थसद्भाववादः ॥१०॥[१]

२६१

§ २७. अत्राह । यद्यनागतं न स्याद्यदेतदनागतार्थालम्बनं योगिनां प्रणिधि-ज्ञानं (तद्) यथार्थं न स्यात् । अस्ति चैतद्यथार्थं योगिनां ज्ञानम् । यथार्थानाग-तव्याकरणात्[२] । तस्य च तथैव भावात् । न ह्यसत्सु वन्ध्यापुत्रादिष्वेतत्सम्भवति तस्मादस्त्येवानागत इति[३] । उच्यते । तात्त्विकया[४] कल्पनया[५] ।

* दृश्यतेऽनागतो भावः केनाभावो न दृश्यते ।
विद्यतेऽनागतं यस्य दूरं तस्य न विद्यते ॥ ११ ॥

§ २८. उत्पादात्प्रागवस्थायामनागतो भावो नास्ति स्वरूपत इति प्रति-पादितम् । यदि चाविद्यमानः पदार्थो योगभिर्दृश्येत वन्ध्यापुत्रादयोऽपि दृश्येरन् । द्वयोरपि तुल्यं स्वभावासत्त्वम् । तत्रैको दृश्यते नापर इति न युज्यते । अपि च यस्या[६]नागतोऽर्थः स्वरूपतोऽस्ति तस्य न तद् दूरं[७] स्यात् । अस्ति चास्य दूरत्वम् । दूरा[८]धर्माः कतमे । अतीतानागताः । अन्तिका[९] धर्माः कतमे । प्रत्युत्पन्नाः । इत्यभ्युपगमात् । तत्र[१०]मनागतमस्य[११] दूरम्[१२] । तच्चास्य दूरत्वम-युक्तमिति प्रतिपादयन्नाह—

---

१. न च विद्यमानस्य पुनरुत्पत्तौ प्रयजनं पश्यामः, MV. पृ०१५; तस्मा-द्धि तस्य भवने न गुणोऽस्ति कश्चिज्जातस्य जन्म पुनरेव च नैव युक्तम्, MA, V, 3, p. 13; उत्पन्नस्य पुनरुत्पत्तौ कल्पमानायां अनवस्था-प्रसङ्गः, AKV. पृ० १४; किं पुनः सुभूते उत्पन्नो धर्म उत्पत्स्यते उतानुत्पन्नः । सुभूतिराह—नाहं सारिपुत्र उत्पन्नस्य धर्मस्योत्पत्तिं इच्छामि न चानुत्पन्नस्येति, शिक्षासमुच्चय, पृ० २८२.

२. T. अत्राह । अस्त्येवानागतस्तदालम्बनाद्योगिप्रणिधिज्ञानाद्यथार्थानागत-व्याकरणात्तस्य च तथैव भावात् ।

३. T. अस्त्येवानागत इति ।
४. P. S. तात्त्विकया, T. ताविकया ।
५. T. कल्पनया
६. T. यस्य दर्शने
७. S. दूरे
८. S. दूरं
९. S. आन्तिकं
१०. T.; S. न तत्र 'एव' इति शब्दो वर्तते ।
११. T. न तत्र 'अस्यं' शब्दः ।
१२. S. दूरे

**विद्यतेऽनागतं यस्य दूरं तस्य न विद्यते।**
**वर्त्तमानस्य विद्यमानत्वादित्यभिप्रायः ॥ ११ ॥**

२६२

§ २९. यश्चानेन कल्याणमित्रसम्पर्केण धर्मश्रवणद्वारे[1]न्द्रियपरिपाकादि-काद्[2] भाविनः प्रत्यया[3]द्दानशीलाद्यात्मकः कर्त्तव्यो[4] धर्मः सोऽप्यनागतार्थसद्भा-ववादित्वात्तस्यास्त्येवेति । तदा—

*** धर्मो यद्यकृतोऽप्यस्ति नियमो जायते वृथा ।**

**अथ स्वल्पोऽपि कर्त्तव्यः सत्कार्यस्य न सम्भवः ॥ १२ ॥**

§ ३०. यदर्थमस्य कायवाङ्मनसां संयमः स धर्मोऽस्याकृत एवास्तीति तदुपार्जनाय नियमश्रमोऽस्य वृथा । तेन[6] विनापि तस्य सम्भवात्[7] । अथास्य तेन नियमेन तस्य धर्मस्य कश्चिद्विशेषो निष्पाद्यते स एव विशेषः पूर्वमसन् पश्चात्क्रियत इति व्याहन्यतेऽस्या[8]नागतार्थसद्भाववादित्व[9]मिति प्रतिपादयन्नाह—

अथ स्वल्पोऽपि कर्त्तव्यः सत्कार्यस्य न सम्भवः ॥१३॥

२६३

§ ३१. अथोदयात्पूर्वापरयोरप्यवस्थयोरस्यास्तित्वं स्यात्तदास्य (नित्यत्वम्) आपद्यते । अथानेनानित्यत्वमङ्गीक्रियते तदास्य ।

**अनित्ये सति सत्कार्यं कथं नाम भविष्यति ।**
**आद्यन्तौ यस्य विद्येते तल्लोकेऽनित्यमुच्यते ॥ १३ ॥**

§ ३२. अनित्ये सति सत्कार्यं कथं नाम भविष्यति ।

द्वयोरप्यनयोरन्योन्यविरोधादित्याशङ्का । एवम् आद्यन्तौ यस्य विद्येते तल्लोकेऽनित्यमुच्यते । यस्य पूर्वं भावान्तरं नास्ति स लोक आदिर्नाम । यस्य

---

१. T. S. O मित्रसम्पर्कधर्मश्रवणेन्द्रिय ।
२. S. O पाकाद् ।
३. T. भूतेन प्रत्ययेन ।
४. T. S. न तत्र 'कर्तव्य' इति शब्दोद्यते ।
५. T. S. न तत्र 'तस्य' इति शब्दोवर्तते ।
६. T. न तत्र 'तेन' शब्दः ।
७. T. S. तेन विनिपातस्यासम्भवात् ।
८. S. अस्य तर्हि ।
९. T. S. सद्भाववादित्वं ।

पश्चाद्भवान्तरं नास्ति सोऽन्त इत्युच्यते। यस्यार्थस्यादिरन्तश्च सोऽनित्य इति लोकोऽभीप्सति। तस्मादाद्यन्तसद्भावान्न नित्य उच्यते। न च तस्य सत्कार्य-वादो युज्यते ॥१३॥

२६४

§ ३३. यस्य सत्कार्यवादे दोषदर्शनेनानागतं नास्तीति लब्धिस्तस्य दर्शनेऽपि—

**अप्रयत्नेन मोक्षः स्यान्मुक्तानां नास्त्यनागतम्।**
**तथा सति विना रागं स्याद्रक्तस्यापि सम्भवः ॥१४॥[1]**

§ ३४. अनागतयोः क्लेशजन्मनोरभावादप्रयत्नेनार्यमार्गोत्पादनं विनाप्यस्य मुक्तिर्भवेत्। मुक्तानामार्यमार्गफलेनानागतयोः क्लेशजन्मनोर्द्वयोरनुत्पादादनागतं नास्ति यथा मुक्तानामनागतं विना प्रयत्नः साध्यते [तथा] तेषामिवनागतफला-भाववादेऽप्यस्मिन् विना प्रयत्नं मोक्षो भवेच्चेदेवमपीदं न भवतीत्य सत्कार्यवादो न युज्यते।

§ ३५. न केवलं मोक्षप्रसङ्ग एव क्षतिरपित्वस्मादहेतुक उत्पादोऽपि भवेदिति प्रतिपादयन्नाह तथा सति विना रागं स्याद्रक्तस्यापि सम्भवः। विना रागं स इष्यते चेदहेतुक एव स्यात्। अहेतुकस्य च न सम्भावना। अर्हतोऽपि रागप्रस-ङ्गात्। तस्मान्नास्त्यहेतुक उत्पादः। यदा हेतुक उत्पादो न सम्भवति तदानागतं नास्त्येवेति न युज्यते ॥१४॥

२६५

§ ३६. तत्र सत्कार्यासत्कार्यवादिनोरुभयोरपि दर्शने हेतुना फलसिद्धिरशक्ये-त्यभिव्यञ्जयन्नाह—

*** स्तम्भादीनामलङ्कारो गृहस्यार्थे निरर्थकः।**
**सत्कार्यमेव यस्येष्टं यस्यासत्कार्यमेव च ॥ १५ ॥**

§ ३७. साङ्ख्यवैभाषिकौ सत्कार्यवादिनावेव। साङ्ख्यदर्शने यत्सत्तदेवास्ति यन्न सत्तन्नास्त्येव। असतोऽनुत्पत्तिः सतश्चाविनाशः इत्यभ्युपगमः। तत्रासद-करणादुपादानग्रहणाच्छक्तस्य शक्यकरणाच्चेत्यादिना[2] सदेव कार्यं जायते। असत्कार्यवादश्चेत्सर्वतः [सर्वं] सम्भवः स्यात्। न चेदमेवमस्ति। तस्मात्सदेव

---

१. V. अयत्नतश्चेन्निर्वाणं तस्य न स्यादनागतम्।
विनापि रागं रक्तोऽपि नन्वेवं सति जायते ॥
२. सांख्याकारिका, ९.

कार्यं जायत इति । वैभाषिकोऽपि स्वभावानुद्भूतादुद्भवप्राप्तिभिया कालत्रयेऽपि सदेव कल्पयति ।

§ ३८. वैभाषिकसौत्रान्तिकविज्ञानवादिनोऽसत्कार्यवादिनः । ते हि सतः कार्यस्योत्पत्ति निरर्थेत्यसदेव कार्यमुत्पद्यत इति प्रतियन्ति ।

§ ३६. तस्मादनयोर्द्वयोर्वादिनोः सत्कार्यवादिनस्तावद्ग्रहार्थं यः स्तम्भद्वार-कवाटादीनामलङ्कारो मर्कटविहङ्गादिविन्यासविशेषखचितस्वरूपः स न युज्यते । तस्य कार्यस्य गृहस्य सत्त्वात् । प्रकारान्तरसाध्यत्वाभ्युपगमे चासत्कार्यवाद-प्रसङ्गात् ।

यस्यासत्कार्यवादस्तस्यापि दर्शने स्तम्भाद्यलङ्कारस्य यथोक्तप्रयोजनाभाव एव । तस्य कार्यस्यासत्त्वात् । असद्धि वन्ध्यापुत्रो न शक्यः केनापि निष्पादयि-तुम् । एवमसत्कार्यवादेऽपि कार्यं गृहं न सिध्यति ॥ १५ ॥

## २६६

§ ४०. अत्राह । यद्यपि त्वयातीतानागतौ कालौ निषिद्धौ तथापि वर्तमान-स्तावदस्ति । तत्सद्भावेनानागतोऽप्यस्ति । अनागतावस्थो भावः परिणामेन वर्तमानो भवति ।

यदि न भवेत्कस्य परिणामेन वर्तमानो भवेत । तस्माद् वर्तमानसद्भावेना-नागतोऽस्ति ।

§ ४१. उच्यते । स्यादेवं यदि परिणाम एव स्यात् । न तु स सम्भवति । किमिति । इहानागतस्यार्थस्य परिणामेऽस्मिन् कल्प्यमाने स्वरूपस्य विनाशेन वा कल्प्यते स्थित्या वा कल्प्यते । यदि तावत्स्वरूपविनाशेन तदैकं विनश्यत्यन्य-दुत्पद्यत इति परिणामेन विनाशोत्पादयोरेव परिणाम इति भवेत् । स्थिते द्रव्यस्य धर्मान्तरे [ तद् ] वृत्तिधर्मान्तरोद्भवो न परिणामः । अथास्माकं परिणाम ईदृश एव ।

§४२. तथा हि । यथा गोरसद्रव्यवृत्तेर्धर्मान्तरस्य दुग्धभावस्य निवृत्तिर्धर्मान्तरस्य दधिभावस्योद्भवश्च परिणामस्तथा रजस्तमःसत्त्वानां त्रयाणां गुणानामनागताव-स्थानिवृत्तिर्वर्तमानावस्थोद्भवश्च परिणाम इति मतम् । नास्य परिणामस्यास्तित्वं स्थापयितुं शक्यते । लोकस्यैषामनागतानां गुणत्रयाणामस्तित्वोपलम्भात्तेषां परिणामो नोपलभ्यत एव । न च दधि दुग्धस्य विकार इति शक्यं व्यवस्थाप-यितुम्, दुग्धावस्थायामेव दुग्धस्य दुग्धत्वमिति । न च दुग्धावस्थायामेव वर्तमानस्य

दुग्धस्य दधिभावः। यदि भवेद्दुग्ध एव दधीति भवेत्। न चेदं युज्यते। तस्मान्न दुग्धस्य दधिभावः। यदा दुग्धस्य दधिभावः स्यात्तदान्यस्यापि कस्यचित्स्यात्। तस्मान्नास्ति परिणामः। न च दधिदुग्धावस्थातो भिन्नं गोरसद्रव्यमात्रं किमप्युपलभ्यते। तथा च।

**भावानां परिणामोऽपि मनसापि न गृह्यते।**
**तथापि वर्तमानोऽस्ति कल्पयन्त्यविचक्षणाः[1] ॥ १६ ॥**

§ ४३. भावानां परिणामो हि न केवलं चक्षुरादीन्द्रियायत्तदर्शनपञ्चकेन न गृह्यते सूक्ष्मावृतारूपार्थपरिच्छेदसमर्थेन मनसापि न गृह्यते। एवं जडजनानपेक्ष्य वर्तमानो नाम स्वरूपेण परीक्षितुं न शक्यत इति नास्तीति नास्ति कालत्रयम् ॥ १६ ॥

**२६७**

§ ४४. अत्राह सन्त्येव कालास्तद्धेतोर्भावस्य सत्त्वात्। ते हि स्वममूर्तत्वाद्भावमेवोपादाय परिच्छेत्तुं शक्यन्ते न स्वयमेव। तस्मात्कालाभिव्यक्तिनिमित्तसद्भावादस्ति कालः।

§ ४५. उच्यते। स्यात्कालस्यास्य सत्त्वं यदि तद्धेतुर्भाव एव स्यात्। न तु [ स ] सम्भवति। यथा च न सम्भवति तथा प्रतिपादयन्नाह —।

**स्थितिं विना कुतो भावोऽनित्यत्वेन स्थितिः कुतः।**
**स्थितिर्यदि भवेदादौ गच्छेदन्ते न जीर्णताम् ॥ १७ ॥[2]**

§ ४६ स्थितिं विना कुतो भावः।

इहैकैकस्मिन् क्षणे उत्पादभङ्गवता भावानां सर्वथापि स्थितिर्नास्ति। स्थित्यभावेन कालस्य हेतुभावो नास्ति। स्थित्यभावमेव प्रतिपादयन्नाह अनित्यत्वेन स्थितिः कुतः। अनित्यत्वेन भुक्तस्य (?) भावस्य स्थितिर्न सम्भवति। यदि स्थितिः स्यात् स्थितिमान् भावः पुनर्जीर्णो न स्यात्। जरायाः स्थितिविरुद्धत्वात्। अन्यच्च

स्थितिर्यदि भवेदादौ गच्छेदन्ते न जीर्णताम्। आयत्यामजीर्णत्वप्रसङ्गात्पुरस्तादेव स्थित्यभावः प्रतीयताम् ॥ १७ ॥

---

१. V. मनसापि न गृह्यन्ते भावा हि परिणामिनः।
वर्तमानस्य तत्सत्तां कल्पयन्त्यविचक्षणाः ॥

२. V. अस्थिरः कस्यचिद्भावोऽनित्यत्वात् कस्यचित् स्थिरः।
आदौ यदि स्थिरो भावस्तस्यान्यत्वं न जायते ॥

२६८

§ ४७. इतश्च स्थितिर्नास्ति । तथा हि ।

**विजानाति यथा नार्थद्वयं विज्ञानमेककम् ।**
**विज्ञानद्वयमेवं न विजानात्यर्थमेककम् ॥ १८ ॥**[1]

§ ४८. यदि भावस्य स्थितिर्नाम भवेत्तदा [ऽयं] अभेदानेकविज्ञानज्ञेयो भवेत् । नास्य सम्भावनापि । ज्ञानज्ञेययोर्द्वयोः क्षणिकत्वात् । यदेकेन गृहीतं न तदन्येन ग्रहीतुं शक्यते । तस्मान्नास्ति स्थितिः । स्थितेरभावाच्च न भावो नापि काल इति सिद्धम् ।

२६९

§ ४९. अत्राह । अस्त्येव स्थितिः वर्तमानकाललक्षणत्वात् । स्थित्या हि वर्तमानकालो लक्ष्यते । स्थित्या विरहितस्य वर्तमानत्वासम्भवात् । अत्रोच्यते—

**स्थितिर्यदि भवेत्काले स्थितिः कालो भवेन्न हि ।**
**अथ स्थितिर्न विद्येत नान्तोऽपि स्याद्विना स्थितिम्**[2] **॥१९॥**

§ ५०. तत्र स्थितिर्यदि भवेत्काले इति मन्यते तदा स्थितिः कालो भवेन्नहि यथाधाराधेययोर्भेदाद्गृहे विद्यमानो देवदत्तो गृहमेव न भवत्येवं स्थिति कालो भवेन्नहि काले सद्भावात् । तस्मात्कालस्य स्वभावो नास्तीति न सा कालस्य लक्षणम् । अथ स्थिति र्न स्यात् । स्थित्या रहितस्यान्तःपरिक्षयोऽपि न स्यात् ।

ततः प्रत्युत्पन्नः काल आयात्यां तिष्ठेत् । तस्य कालस्य नित्यत्वात् प्रत्युत्पन्नो भावोऽपि नित्यो भवेत् । एवमपीदं न भवति । तस्मान्नास्ति स्थितः ॥१९॥

२७०

§ ५१. अत्राह । अस्त्येव सा स्थितिः । तद्वतो भावस्यानित्यत्वात् । स्थितिरहितस्य भावस्यासत्वादनाश्रयस्यानित्यत्वस्यासम्भवे भावेऽनित्यत्वस्यापि सत्वम् तस्मात्तत्सत्वेन स्थितेरपि सत्वम् ।

---

१. V. विजानाति यथानैकं विज्ञानं वस्तुयुग्मलम् ।
विजानाति तथा नैकं वस्तु विज्ञानयुग्मलम् ॥

२. V. स्थिरता यदि कालस्य स्थिरः कालो न जायते ।
अस्थिरश्चेत्कथं तिष्ठेदसन्नन्ते न विद्यते ॥

§ ५२. अत्रोच्यते । यद्यनित्यत्वं नाम किञ्चित् स्यात्तद्भावादन्यदेव वैकमेव वा स्यात् । उभयथापि नोपपद्यत इति प्रतिपादयन्नाह—

**भिन्ने भावादनित्यत्वे भावोऽनित्यो न जायते**
**एकत्वे यदनित्यत्वं स हि भावः स्थितिः कुतः ॥२०॥**[1]

§ ५३. अनित्यत्वं चेद्भावादन्यदेव तदानित्यत्वलक्षणभेदाद्भावो नित्यो भवति । न च भावो नित्य इति नानित्यत्वस्यान्यत्वम् । अथैकत्वमिष्यते तथापि भावस्तस्मात्पृथग्न सम्भवतीति यदनित्यत्वं स एव भाव इति भावस्यानित्यत्वात्मकत्वात्स्थितिः सर्वथैव न सम्भवति । तस्मान्नास्ति स्थितिः । स्थित्यभावेनानित्यत्वमपि नास्तीति स्थित्यनित्यत्वयोर्द्वयोरभावेन नास्ति भावः । तदभावेन कालोऽपि नास्तीति सिद्धम् ॥२०॥

§ ५४ यत्पूर्वं

२७१

**स्थितिं विना कुतो भावो-**
**ऽनित्यत्वेन स्थितिः कुतः ।**

इत्युक्तं तत्राह । अनित्यत्वे विद्यमानेऽपि विद्यत एव स्थितिः । कथं कृत्वेति । स्थितिकाले स्थितिर्बलवत्तरा नानित्यत्वम् । न च दुर्बलो बलवन्तं विनाशयितुं शक्नोतीति । इदमपि न युज्यते इति प्रतिपादयन्नाह—

**दुर्बलानित्यता यत्र स्थितिस्तत्र न दुर्बला ।**
**किं पश्चान्नियमादृष्टस्तयोः पदविपर्ययः ॥२१॥**[2]

§ ५५. यदि स्थितिकालेऽनित्यत्वं दुर्बलं केन पश्चाद्धर्मसाम्ये सा स्थितिर्हीनिप्यते । केन तस्य पश्चाद्बलवत्त्वम् । तस्मात्तत्पूर्वमेव वा पश्चादेव (?) वा न बलवत्तरम् । तस्माद्भावो नित्यो वा स्थितिहीनो वा स्यात् । न चेद युक्तम् । तस्मान्न सा विद्यते ॥२१॥

२७२

§५६. अन्यच्च

---

१. V. भावान्तरमनित्य चेद्भावोऽनित्यो न विद्यते ।
एकस्यानित्यता यस्य कथं भावःस तिष्ठति ॥

२. V. अनित्यं दुर्बलं येन दुर्बलं सन्न जायते ।
तत्स्थिति नियतं पश्चान्निवृत्तिः केन दृश्यत ॥

**भवेत्सर्वेषु भावेष्वनित्यत्वं दुर्बलं न चेत्।**
**स्थितिर्भवेन्न सर्वत्र न वा सर्वमशाश्वतम् ॥ २२ ॥**[1]

§ ५७. यद्यनित्यत्वं दुर्बलं न भवेद्बलवद्भवेत् सर्वेषु च भावेषु तिष्ठेत् । यदि भावानामेकमन्तं (?) व्याप्य तिष्ठेत्तदा सर्वेस्वपि न तिष्ठेत् । अथ सर्वेषु न तिष्ठेत्तदा न सर्वे धर्मा अनित्या स्युः । तदा कश्चिद् [अंशो] नित्यो यत्र स्थिति र्बलत्तरा । कश्चिद्देशोऽनित्यो यत्रानित्यत्वं बलवत्तरम् । एवं सति न सर्वेऽनित्याः न वा (सर्वे) स्थित.: ॥२२॥

२७३

§ ५८. अन्यच्च । अनित्यत्वमिदं लक्ष्येण सह वा जायते पश्चात्काले वा । तत्र

**यदि नित्यमनित्यत्वं भवेन्नित्यं स्थितिर्न हि।**
**नित्यो भूत्वाथवा पश्चादनित्यः खलु जायते ॥ २३ ॥**[2]

§ ५९. यदि नित्यमनित्यत्वं भवेन्नित्यं स्थितिर्नहि । लक्ष्यलक्ष्यणाव्यभिचारात् । यद्यनित्यत्वं नित्यमनुबद्धं न तदा स्थितिर्नित्यम् । अनित्यत्वानुबन्धात् ।

नित्यो भूत्वाथवा पश्चादनित्यः खलु जायते ॥ यदि यथोक्तदोषजिहासया पश्चाद्भावोऽनित्य इष्टस्तदा स भावः पूर्व स्थितिमानित्यतिरिक्तो भूत्वा पश्चादनित्यत्ववानित्यनित्य इत्येको भावो नित्योऽपि भवत्यनित्योऽपि भवतीति यत्तदपि न युक्तम् ॥ २३ ॥

२७४

§ ६०. अपि च । संस्कृतलक्षणाना नामन्योन्यमभिचारात्—

**अनित्यत्वेन सहिता स्थितिर्भावे भवेद्यदि।**
**मिथ्या वा स्यादनित्यत्वं स्थितिः स्याद्वितथाथवा ॥२४॥**[3]

§ ६१. अनित्यत्वेन सहिता स्थितिर्भावे भवेद्यदि तथापि मिथ्यास्यादनित्यत्वं स्थितिः स्याद्वितथाथ वा ॥ यदि स भावस्तिष्ठति तदा तस्यानित्यत्वं मिथ्या ।

---

१. V. अनित्यं दुर्बलं येन सर्वभावेषु विद्यते ।
सदसत्त्वं च सर्वस्मिन्नथ सर्वमशाश्वतम् ॥

२. V. नित्येऽनित्यं यदि भावेन्नित्यं सत्ता न जायते ।
नित्ये क्षीणेऽथ तत्पश्चादनित्यं किल जायते ॥

३. V. अनित्येन यदा सार्धं सत्ता भावेषु विद्यते ।
अनित्यं जायते मिथ्या मिथ्या सत्तापि जायते ॥

अथ नश्यति । स्थिति वितथेति स्थिति र्न युक्ता । स्थितेश्च तस्या अभावेन भावो नास्ति । भावस्य चाभावे तदाश्रयिणः कालस्याभावात्कालस्वभावो न सिध्यति ।। २४ ।।

२७५

§ ६२. अत्राह । अस्त्येव भावहेतुकः कालः । तथा हि । अस्त्यतीतसंस्काराश्रयः कालः । यद्यतीतो भावो न स्यान्ममातीते काल एवमेवमभूदिति मननेऽतीतालम्बना स्मृतिः किंविषिया स्यात् तस्मात्तद्विषयकस्मृतिसद्भावादस्त्येव भावहेतुकः कालः इत्युच्यते । अत्र स्मृतिरियमनुभूत एव विषये प्रवर्तते । वर्तमानविषय विज्ञानेन वस्तुत उपलभ्यमानस्य स्मृत्या न किमपि प्रयोजनम् । तस्माद्यदालम्बना स्मृतिरालम्बनभूतः स भावो विद्यते ।

तदप्यसारमिति प्रतिपादयन्नाह—

**न दृष्टो दृश्यते भावश्चित्तं न जायते पुनः ।**
**तेन मिथ्या स्मृतिर्नामार्थोऽस्या मिथ्यैव जायते ।।२५।।[1]**

## इति योगाचारे चतुःशतके कालप्रतिषेधभावनासन्दर्शनमेकादशं प्रकरणम् ।।११।।

§ ६३. वर्तमानावस्थस्य तस्य भावस्य यत्स्वरूपं साक्षात्कर्तुर्वर्तमानेन ज्ञानेन दर्शनादस्ति न तत्पुनर्दृश्यते । एकस्य ह्यर्थस्य विज्ञानद्वयेन परिच्छेद्यत्वं पूर्वमेव निषिद्धम् । तेनैव न्यायेन दृष्टो भावो न दृश्यते । यदा न दृश्यते तदा तद्विषयकं चित्तं पुन र्न जायते ।

§ ६४. तस्मात्स्मृतेरालम्बनमतीतो भावः । यदि स स्वरूपेण स्यात्तदा सा स्मृतिः सतोऽर्थस्यावलम्बनात्स्वरूपेण सिध्येत् यदा तु सोऽतीतो भावः स्वरूपेण नास्ति तदा तदालम्बन स्मृतिरपि नास्ति । तस्मान्मिथ्येति सिद्धम् । मिथ्येति स्वाभावेनाभावः प्रतीत्य समुत्पादश्च नार्थान्तरम् । भावाभावार्थो हि न मिथ्यार्थः । नातीतार्थः सर्वथा न भवति । स्मरणीयत्वात्तत्फलदर्शनाच्च । स्वरूपेण सन्नपि च न भवति । नित्यत्वप्रसङ्गाद्वस्तुतो ग्रहण प्रसङ्गाच्च । तादृशाभावाज्जायते चेत् स्मृतिरपि तादृशी भवति । तेन मिथ्या स्मृति र्नामार्थोऽस्या मिथ्यैव जायते ।। इति सिद्धम् । जाग्रदवस्थायां स्वप्नदर्शनावस्थानुभवविषयकस्मृतिवत् ।।२५।।

---

१. V. यो भावश्चेतसादृष्टः सोऽदृष्टो न पुनर्भवेत् ।
स्मृतिर्नाम भवेन्मिथ्या मिथ्या भावोऽपि जायते ।।

## दृष्टिप्रतिषेधभावनासन्दर्शनम्

### २७६

§ १. अत्राह। त्वया खल्वेष नैरात्म्यधर्मो व्यक्तं विस्तरशः प्रदर्शितः। तथागतोऽप्ययमवबोधकश्चोपदेशकश्च। तत्किमित्यस्मिन् धर्मे लोको भूयसा न प्रवर्तते। यस्मादयं धर्मः कर्तृव्याख्यातुर्धर्मस्य च माहात्म्येन शुक्लतरस्तस्मात्सर्वेषां मोक्षकामाणां युक्तेह प्रवृत्तिः। किं विचार विशेषोपदेशान्तरैः।

§ २. उच्यते। यद्यपि धर्मस्यास्य प्रवक्तुव्याख्या तुर्धर्मस्य च स्वभावेन माहात्म्यमस्ति तथापि श्रोतुर्माहात्म्यमतिदुर्लभम्। तथा हि—

> शङ्कुष्ठो बुद्धिमानर्थी श्रोता पात्रमितीर्यते।
> अन्यथा न गुणो वक्तुर्न श्रोतुरपि जायते॥१॥[1]

§ ३. तत्र शङ्कुष्ठः यः पक्षेऽपतितः। कः पुनः पक्षेऽपतितः। यः स्वपक्षे परपक्षे चानुरागेण प्रतिघेन च पक्षरहितः। स ह्येवं चित्तसन्तानाक्लेशात्सुभाषितरत्नविशेषयुक्ततत्परो भवतीति संक्लेशपक्षक्षेपमूले शङ्कौ तिष्ठति। तस्मादेकं सति शङ्कुष्ठः श्रोतोत्तमस्य सद्धर्मामृतस्य भाजनम्। शङ्कुष्ठभूतोऽपि यदि प्राज्ञः स्यात् स्यात्सुभाषितदुर्भाषितसारासारविचारपटुः। स हि प्राज्ञत्वेनासारं त्यक्त्वा सारं गृह्णाति। श्रोता चेदेवं प्राज्ञो भवेत्स भाजनं भवेत्। एवं शङ्कुष्ठः प्राज्ञभूतश्च सुभाषितश्रवणार्थी संश्चित्रपुरुष इव न वीर्यहीनो भवति। एवं शङ्कुष्ठो बुद्धिमानर्थी श्रोता पात्र मितीर्यते।

§ ४. श्रोतृषु च तादृशेषु नूनं

> अन्यथा न गुणो वक्तुर्न श्रोतुरपि जायते॥

तत्र वक्तुर्गुणा अपक्षपातित्वमवैपरीत्यं स्पष्टत्वमकोपवक्तृत्वं श्रोत्रध्या शयावगन्तृत्वं निरामिषचित्तत्वश्चेत्येवमादयः। श्रोतुरपि धर्मे धर्मवादिनि च द्वयोः श्रद्धा मनोनिवेशः शङ्कुष्ठत्वं बुद्धिमत्त्वर्थित्वं च। तस्यार्थित्वं च धर्मे धर्मवादिनि च श्रद्धया

---

१. V. साक्षी धीमानर्थपतिः श्रोता दृष्टेति भास्यते।
वक्तुर्गुणा न चान्यस्य नापि श्रोतुर्भवन्ति ते॥

मनोनिवेशादिनी च प्रतीयते। एवं च सति वक्तुर्गुणो नान्यथा जायते। श्रोतुरपि गुणो नान्यथा जायते। श्रोतरि हि तादृशे वक्तुर्गुणो दोषरूपो न भवति। श्रोतुर्दोषाद्गुणोऽपि दोषरूपेण विक्रियन्ते दोषोऽपि च गुणरूपेण विक्रियन्ते। उक्तलक्षणस्तु श्रोता श्रवणाद्युद्भूताविपरीत गुणगणनामाधारो भवति। वक्तुर्गुणो नान्यथा जायते। न च श्रोतुर्गुणो दोषरूपो भवति।

§ ५. नास्त्यस्माकं जडात्मना देशनाया कापि प्रज्ञा किमपि कर्त्तव्यं वा। नास्ति प्रतिपत्तेत्येवं न कोऽपि वक्ता। प्रत्येतव्यमेतद् अभिप्रायोपदेशसूत्रे ॥१॥

२७७

§ ६. तस्मादेव भगवता—।

**उक्तो भवो भवोपायः शिवोपायस्तथा शिवम्।**
**यल्लोके न परिज्ञातं व्यक्तं तद्दर्शने मुनेः॥२॥[1]**

§ ७. तत्र भवः फलभूतमुपादानस्कन्धपञ्चकम्। भवोपाया हेतुभूताः संस्काराः। शिवं निर्वाणम्। सर्वोपद्रवनिवृत्तिस्वभावत्वात्। शिवोपाय आर्य आष्टाङ्गिको मार्गः। एवं भगवता मोक्षकामेभ्य आर्यसत्यचतुष्टयमुपदिष्टम्। सफलयोर्हेयोपादेययोरुपदेशात्। तत्र श्रवणमननभावनावतां सम्यग्यथवात् प्रत्यात्मभ्यवगच्छतां परम्परायां भगवतोपदिष्टोऽर्थो यथावदेव भवति। व्यक्त (?) श्रवणमननभावनाभ्युद्यमास्तु स्वयमभाजनभूता अनार्या नास्माभिरर्थो यथावत् प्रतीयत इति नूनमयं न सम्यग्भाषित इति सा भ्रान्तिर्मुनेरिति निश्चिन्वन्ति। न तावता बुद्धो भगवानपराध्यति। आर्यसत्यचतुष्टयसंप्रकाशत्वेननिखशेषपुरुषार्थ संप्रकाशकत्वादिति कुतो वक्तुर्दोषः। तस्मान्मुनेर्दर्शन इत्युच्यते। कैश्चित्तदुपदिष्टं वस्तुतत्त्वं यथावन्न निश्चितमिति न हि जात्यन्धेनादृष्टालोकस्यं सूर्यस्य दोषो भवत्यनन्धैस्तस्य दर्शनात् ॥२॥

२७८

§ ८. अत्राह। तस्य तथागतस्याभ्युन्नतासु सर्वासु कथास्वत्यर्थं व्यक्तासु [ अपि ] सर्वभावाभावप्रदर्शनपरत्वेन न निःश्रेयसकथासमादृशैरगन्तुं शक्यते। एवं च भगवान् सर्वभावस्वरूप दूष प्रवृत्तत्वान्नास्माकं मनः सन्तोषयति। उच्यते—।

---

१. V. उक्तो भवोभवोपायः शिवोपायस्तथा शिवम्।
यल्लोकेनापरिज्ञातं दृष्टं तन्मुनिसन्निभम् ॥

**सर्वत्यागेन निर्वाणं सर्वपाषण्डिनां मतम् ।**
**न सर्वदूषणो तेषां किञ्चिद्वैमुख्यकारणम् ॥३॥**[१]

§ ९. ' सांख्य वैशेषिकादीनां सर्वपाषण्डिनां निखिल सुख दुःखादि भावसंक्लेशनि[२] ] वृत्या मोक्षावाप्तिरिति निश्चयः[३] । यदा चैवं सर्वत्यागेन सर्वपाषण्डिनां निर्वाणमभिमतं तदा न किञ्चित्[४] मया[५] आपूर्वमुक्तं[६] यद्वैमुख्यकारणं भवेत् । पाषण्डिकं[७] येषामेव हि पदार्थानां निर्वाणे पुनरप्रवृत्त्या निर्वृति[८]रभिसमीहिता[९] तेषामेव मया नैःस्वभाव्य प्रतिपादनपरेण शास्त्रेणास दर्शनकण्ट[१०] [ कोद्धरणात्मकेन ] निर्वाणनगरगामिमार्गपरिशोधनमनुष्ठितम् । तत्किमिति हृदि भयमसत्कल्पयित्वा[११] भवान् बिभेति । आधीयतां[१२] मनः परितोषः क्रियतामात्मसादयं धर्मो निवेश्यतां चेतसि[१३] सांक्लेशिकवस्तु[१४] निवारणकथा ॥३॥

**२७९**

§ १०. ननु च यदि सर्वपाषण्डिनाम[१५]प्ययमेवाभिप्रायो यदुत सर्वत्यागेन निर्वाणमिति कः पुनर्भवतस्तीर्थिकानाञ्च विशेषः । अयं विशेषो यत्तीर्थिकानां सर्वत्यागाभिप्रायमात्रं न[१६] पुनः सर्वत्यागोपायाख्यानम् । अनुपदिष्टे च सर्वत्यागोपाये ।

**किं करिष्यति स त्यागं त्यागोपायं न वेत्ति यः ।**
**शिवमन्यत्र नास्तीति नूनं तेनोक्तवान्मुनिः ॥४॥**

§ ११. सर्वत्यागाशयेऽपि स्थिते[१७] तीर्थिकमतावलम्बी त्यागोपायानभिज्ञः किं त्यागं करिष्यति । यन्न जानाति सर्वधर्मस्वभावशून्यता लक्षण सर्वत्यागोपायं परमार्थसत्यम् । अतएव

शिवमन्यत्र नास्तीति नूनं तेनोक्तवान्मुनिः ॥४॥

---

१. V. सर्वत्यागेन निर्वाणं सर्वपाषण्डिनां मतम् ।
न तेषां दूषणैः सर्वैः किञ्चिद्वैमुख्यकारणम् ॥

२. T.

३. T. अभ्युपगम

४. T. किञ्चिदपि

५. T. न तत्र 'मया' इति शब्द ।

६. S. उपन्यस्तम्

७. T. ; S. न तत्र "पाखण्डिकैः" शब्दः

८. T. ; S. निवृत्तिर्

९. T. इष्टा

१०. S. दर्शनकटा··· ।

११. T. ; S. आलिख्य ।

१२. T. ; सा० उत्पाद्यताम्

१३. T. ; सा० आत्मनि

१४. T. सांक्लेशिक सर्ववस्तुशोकनिवा

१५. T. त्यागोपायाख्यानम् ।

१६. S. न तु

१७. T. ; S. स्थित

२८०

§ १२. ननु च तवा[1]प्यपर्यन्तत्वाद्[2] ज्ञेयस्यातीन्द्रियेस्वर्थेषूपदिष्टेष्वसमक्षत्वात् तेषां संशय एव जायते किमसावर्थो यथोपदिष्टस्तथैवाहोस्विदन्यथेति न हि तद्विषयं निश्चयकारणमस्तीति । तत्राप्युच्यते ।

**बुद्धोक्तेषु परोक्षेषु जायते यस्य संशयः ।**
**इहैव प्रत्ययस्तेन कर्त्तव्यः शून्यतां प्रति ॥ ५ ॥**

§ १३. न हि सर्वे भावाः प्रत्यक्षज्ञानगम्या अनुमानगम्या अपि विद्यन्ते । शक्यं चात्रानुमानं कर्तुं दृष्टान्त सद्भावात् । इह सर्वत्यागोपायः[3] सर्वधर्मस्वभावशून्यता । सा चाशक्या केनचिदन्यथात्वमासादयितुम् । सूक्ष्माश्चायमर्थो नित्यसन्निहितोऽपि सर्वजनानामसक्षत्वात् । तस्य चोपपत्त्या सर्वधर्मस्वभावग्राहविनिवारणमुखेनोपपादिता यथावत्ता । अत्रैव तावदस्थीयतां निश्चयः ।

§ १४. अथात्र[4] किमेवमेवैतदुताहो अन्यथेत्यस्ति कश्चिदनिश्चयकारणं तदुपदिश्यतां यदि तन्न निराकृतमुक्तवक्ष्यमाण प्रकरणप्रतिपादितनिश्चयेन । न च शक्यमनेन स्वल्पमप्यनिश्चयकारणं किञ्चिदभिधातुमिति सिद्ध एवायं दृष्टान्तः । ततश्चान्यदप्यसमक्षार्थप्रतिपादकवचनं भगवतोयथार्थमिति प्रतीयतां स्वनयेनैव तथागतोपदिष्टत्वात्स्वभावशून्यतार्थाभिधायकवचनवदिति कुतो बुद्धोक्तेषु परोक्षेषु संशयावकाशः ॥५॥

२८१

§ १५. न च तथागतवत्तीर्थिकानामपि शक्यमविपरीतार्थाभिधायित्वम[5]वसातुं तेषां दृष्टधर्म एव विपर्यस्तत्वात् । तथा ह्यस्य लोकस्य तैर्नित्यकारणपूर्विका प्रवृत्तिरुपदिश्यते सा चाशक्यप्रतिपादना[6] दृष्टविरुद्धा चोपपत्तिविरुद्धा च । एवम्— ।

*** लोकोऽयं येन दुर्दृष्टो मूढ एव परत्र सः ।**
**वञ्चितास्ते भविष्यन्ति सुचिरं येऽनुयांति तम् ॥ ६ ॥**

§ १६. न हि सम्पूर्णे[7]चन्द्रमसि व्याहतदर्शनसामर्थ्योध्रु[8]वमरुन्धती वा पश्यतीति सम्भाव्यम्[9] । तद्वदयं तीर्थिको लोकस्य सत्त्वभाजनाख्यस्य हेतुफलव्यामूढ-

---

१. T. तव दर्शने
२. T. पर्यन्तत्वाद्
३. T. S. त्यागोपायः ।
४. T. S. अथास्त्यत्र ।
५. T. विपरीताभिधायित्वम् ।
६. S. अशक्यप्रतिपाद्या ।
७. T. सा पूर्णिमा -
८. T. कश्चिद्ध्रुवमरुन्धती ।
९. T. न तत्र विद्यते "इति सम्भाव्यम्" ।

त्वात् स्थूलमेवार्थं तावद्यदा न सम्यगीक्षते तदा कथमयमतिसूक्ष्मं विदू[1]रदेशका-लव्यवहितं सप्रभेदमर्थं ज्ञास्यतीति[2] सम्भावयितुं शक्यम् । तदिमं तीर्थिकं स्वयमत्य-न्तविपर्यासितदर्शनं मृगतृष्णाजलवदनुपासनीयं तत्त्वदर्शनामलजलपिपासवः संसाराध्वपरिश्रमक्लमापनोदाय ।

वञ्चितास्ते भविष्यन्ति सुचिरं येऽनुयांतितम् । अपर्यवसानापरकोटिके संसारे ते बत वञ्चिता भविष्यन्ति ये यथार्थशास्तारं बुद्धं भगवन्तमवधूय[3] दृष्टादृष्टपदार्थस्वभावव्यामूढं मोक्षकामतया तीर्थिकमनुगच्छन्ति ॥६॥

२८२

§ १७. कस्मात्पुनरेते मोक्षकामा[4] विपर्यस्तदर्शनं तीर्थिकमनुगच्छन्ति । स्वभावशून्यताधर्मोपदेशश्रवणभयात् । तद्भयं

नास्त्य[5]हं न भविष्यामि न मेऽस्ति न भविष्यति ।

इत्यालम्ब्यो[6]त्रासात् । त्रासश्चायं सुचिरमहङ्कारममकाराभ्यासात् । अतएव कल्याणमित्रपरिग्रहात्सुचिराभ्यस्तमपि भावस्वभावाभिनिवेशम[7]लं त्यक्त्वा—

*** स्वयं ये यान्ति निर्वाणं ते कुर्वन्ति सुदुष्करम् ।**
**गन्तुं नोत्सहते नेतुः पृष्ठतोऽप्यसतो मनः ॥७॥**

§१८. बुद्धो भगवान् स्वयं भूत्वा स्वयमेव निर्वाणपुरमुपयातः[8] । तस्येत्थं[9] दुष्करकारिणो महाकारुणिकस्य[10]

गन्तुं नोत्सहते नेतुः पृष्ठतोऽप्यसतो मनः ॥ न केवलमसतोऽहङ्कारममकार व्यवस्थितस्य[11] स्वयमेव निर्वाणं गन्तुं मनो नोत्सहते । अपि खलु दुष्करकारिणो[12] नेतुः पृष्ठतोऽप्य[13]सतो निर्वाणं गन्तुं मनो नोत्सहते[14] ॥७॥

---

१. T. दूर ।
२. T. ज्ञास्यति ।
३ T. बुद्धेन भगवता यथावदुपदिष्टमर्थमनुपास्य ।
४. S. मोक्षकामा [स्त] मेवं ।
५. S. बोधिचर्यावतारपञ्जिका पृ० ४४६. उत्तरार्धं कारिका इति बालस्य सत्रासः पण्डितस्य भवक्षयः ।
६. T. कल्पयित्वा ।
७. T. S. भावस्वभावाभिनिवेशं मलवत् ।
८. T. S. याति ।
९. T. इत्थं ।
१०. T. S. न तत्र शब्दोऽयं विद्यते ।
११. T. S. व्यवस्थितानां ।
१२. S. यथोपवर्णितस्य ।
१३. S. पृष्ठतोऽप्यस्यासतो ।
१४. T. S. नोत्सहं प्रवेद्यते ।

२८३

§ १९. कस्मात्पुनरस्य नेतुः पृष्ठतोऽप्यसतः पुद्गलस्य निर्वाणं गन्तुं मनो नोत्सहते। शून्यतायां त्रासात्। कस्य पुनरस्यां त्रासो भवतीति। यस्य भवति-तं प्रति[1] प्रतिपादयन्नाह—

*** त्रासो नारभ्यतेऽदृष्टे दृष्टेऽपैति स सर्वशः।**
**नियमेनैव किञ्चिज्ज्ञे तेन त्रासो विधीयते ॥८॥**

§ २०. अव्युत्पन्नशास्त्रसङ्केता हि गोपालादयः। शतशोऽप्युपदिश्यमानायां शून्यतायां सर्वथा[2]नुप्रवेशाभावेना[3]दृष्टत्वाच्छून्यतार्थस्य तेषां त्रासो नोत्पद्यते तस्मिन्।

दृष्टेऽपैति स[4] सर्वशः।

दृष्टे हि शून्यताख्ये धर्मे स[5] त्रा[6]सस्तत्पण्डितानां सर्वथापैति भवनिमित्ता त्मात्मीयाभिनिवेशविगमात्। रज्वा जात सर्पविपर्यासस्य रज्जुदर्शने सति सर्पभय-विगमात्। यस्तु किञ्चिज्जानाति[8] तस्य नियमेनावश्यम्सम्भावितया त्रासो विधीयते ॥८॥

२८४

§ २१. किमर्थं पुनरमी किञ्चिज्ज्ञा उत्तरं पदं न पर्यपन्ते यावतैषां[9] ज्ञातव्य-परिसमाप्तिर्भवतीति। उच्यते। त्रासात्। किं पुनस्त्रासस्य कारणम्। आह।

अनभ्यासः। तस्य पुनः किं कारणम्। विपरीताभ्यासः। तदेव प्रतिपाद-यन्नाह—।

*** एकान्तेनैव वालानां धर्मेऽभ्यासः प्रवर्तके।**
**धर्मान्निवर्तकात्तेषामनभ्यासतया भयम् ॥९॥**

---

१. T. न तत्र शब्दोऽयं विद्यते।
२. T. S. सर्वथातदनु—।
३. T. S. प्रवेशाभावे सति।
५. T. S. न तत्र शब्दोऽयं विद्यते।
६. T. S. न तत्र शब्दोऽयं स्वीक्रियते।
७. T. S. सन्त्रास।
८. T. किञ्चिज्जानाति किञ्चिन्न जानाति।
९. T. एषां।

§ २२. संसारप्रवृत्त्यनुकूलो हि धर्मः प्रवर्तकः। पृथग्जनपर्यापन्नायां च भूमौ स्थितानां सत्वानां[१] प्रवर्तक एव धर्मोऽभ्यासः। भावानां[२]स्वभावशून्यता हि निवर्तको धर्मः संसारनिवृत्त्यनुकूलत्वात्। [तदभ्यास[३]] स्य परिपन्थ्यात्मस्नेहः। तदनुगतचित्तसन्तानत्वात्पृथग्जनास्तद्व्यावर्तकाद्धर्मात्सुतरां बिभ्यति।[४] स्वभावशून्यतां प्रपापमिव मन्यमाना न तां यथावत् प्रतिपत्तुमुत्सहन्ते ॥९॥

## २८५

§ २३. तदेवमविद्या सान्द्रान्धकार प्रच्छादितपदार्थतत्त्वेऽनुपलभ्यमानापरकोटिके[५] ससारमहाटवीकान्तारे[६] प्रनष्टसन्मार्गस्य कस्यचिन्नाम[७] पद्गलस्य भवति स्वभावशून्यताकथायां च्देद्भक्ति स[८] तदनुकूल प्रत्ययोप [ सिद्धिद्वारेण यथोप[९] ] चीयमानप्रसादः शून्यतायां भवति तथा कार्यं करुणावता[१०]। कृतज्ञ न[११] च भगवति तथागते सद्धर्मान्तरायनिमितं कर्मात्मनो[१२] महाप्रपातहेतुं परिजिहीर्षुणा[१३] संकटमप्यवगाह्य दुर्देयमपि दत्त्वा संग्रहवस्तुचतुष्टयेन संग्रह्य सद्धर्मोऽयं[१४] सद्धर्मभाजनेभ्य[१५] उपदेष्टव्यः[१६]। यस्तु न केवलं यथोपदिष्टं न बहु मन्यते, अपितु।

*** विघ्नं तत्त्वस्य यः कुर्याद्वृतो मोहेन केनचित्।**
**कल्याणाधिगतिस्तस्य नास्ति मोक्षे तु का कथा ॥१०॥**

§ २४. मोहेन केनचिदिर्ताष्या मात्सर्य कौसीद्यभयश्रोतृ विद्वेषादिना तत्त्वोपदेशभाजने जने यस्तत्त्वदेशनश्रवणादिविघातं[१७] करोति तस्य सुभतेरपि तावद्देव[१८]

---

१. T. S. पृथग्जनाना।
२. T. S. न शब्दोऽयं स्वीक्रियते।
३. T.
४. T. भावानां स्वभावशून्यता......सुतरां बिभ्यतीति स्थाने निवर्तको हि धर्मस्तदभ्यासपरिपन्थिनी भावानां स्वभावशून्यता संसारनिवृत्त्यनुकूलत्वात्। आत्मस्नेहानुगतचित्तसन्तानत्वात् बिभ्यति।
५. T. अनाद्यन्ते।
६. T. संसाराटवीकान्तारे।
७. T. कस्यचित्।
८. T. न तत्र शब्दोऽयं वर्तते।
९. T.
१०. T. महाकारुणिकेन।
११. कृतज्ञेन।
१२. T. आत्मनां।
१३. T. S. परिजिहीर्ष [अदभ्यः]।
१४. T. सद्धर्मोऽयं सर्वप्रयत्नेन।
१५. T. सद्धर्मभाजनभूतेभ्यः।
१६. T. जनेभ्य उपदेष्टव्यः।
१७. T. S. विघातकं।
१८. T. S. न स्वीकरोति।

मनुष्यात्मिकाया नास्ति सम्भवो नियतं [ दुर्ग ] निगमनात्[1] किमुतास्य मोक्ष-कथावकाशः स्यात् ॥१०॥

२८६

§ २५. एवं[2] परात्मनो रत्यन्तापकारितां[3] पश्यता[4] भगवता तथागतेनोक्तम्[5]—।

*** शीलादपि वरं स्रंसो न तु दृष्टेः कथञ्चन।**
**शीलेन गम्यते स्वर्गो दृष्ट्या याति परं पदम् ॥११॥**

सूत्र उक्तं। वरं शीलविपन्नो न तु दृष्टिविपन्न इति ॥११॥

२८७

§ २६. एवमतिमहार्थतां[6] मस्य तत्त्वदर्शनस्यापर्यैतदविघाताय विदुषायतितव्यम्। न चानेन तद्विघातभयदर्शिना सता सर्वत्रैवानवधार्य पात्रविशेषमेतन्नैरात्म्यदर्शनमुपदेष्टव्यमपात्रेषु। अपात्रे[7] हि तदुपदेशोऽनर्थायैव[8] स्यात्। [उक्तं[9] च]

**उपदेशो हि मूर्खाणां प्रकोपाय न शांतये।**
**पयः पानं भुजङ्गानां केवलं विषवर्धनम् ॥[9]**

इति। भगवताप्युक्तम्-वरं खलु काश्यप पद्गलदृष्टिःसुमेरुमात्रा न त्वेवाभिमानिकस्य शून्यता दृष्टिः। तत्कस्माद्धेतोः। सर्वदृष्टिगतानां शून्यता निःसरणम् यस्य खलु शून्यतादृष्टिस्त महमचिकित्स्यम् [इति वदामि इति] अतएव

*** अहङ्कारोऽसतः श्रेयान्न तु नैरात्म्यदर्शनम्।**
**अपायमेव यात्येकः शिवमेव तु नेतरः ॥१२॥**

§ २७. नैरात्मधर्माधिमुक्तिविरहितो ह्यात्मग्राहाभिनिष्टोऽसद्धर्मसमाश्रया दृष्टिगहनानुचारी नरो[10]ऽसन्नित्युच्यते। तस्यासतो वरमात्मदेशना दुश्चरितनिवृत्यनुकूलत्वात् तस्याः। तथा ह्यसावात्मस्नेहानुगम[11]नाद्धितमा[12]त्मनो[13]ऽभवाञ्छन् दुश्चरितनिवृत्ति बहु मन्यते। निवृत्तपापस्य चास्य सुगतिगमनं भवति सुल-

1. T. S. अपागमनात्।
2. S. एवमेव।
3. T. परात्मनोरपकरितां।
4. T. दृष्ट्वा।
5. T. भगवता उक्तम्।
6. T. S. महार्घतां।
7. T. न तत्र शब्दोऽयं वर्तते।
8. T. अनर्थ हेतुरवेत्यर्थः।
9. काश्यपपारवर्त, ६४-६५
10. T. S. न स्वीकरोति।
11. T. अनुबन्धाद्।
12. T. हितं सुख च।
13. T. S. आत्मना।

भम् । नैरात्म्योपदेश[1]स्तस्य प्रतिक्षेपविपर्यासबोधाभ्यां कायचित्तसन्तानं निहतमुपहन्ति । तदेवम् ।

अपायमेव यात्येक: शिवमेव तु नेतरः ।

§ २८. नैरात्म्यदर्शनविप्रतिपन्नो ह्यविद्वानपायमेव याति न शिवम् । यस्तु नेतरः स शिवमेव याति नापायम् । इतरशब्दोऽयमनुत्कृष्टवाची । कश्चानुत्कृष्टः । यः[2] शून्यतार्थं विपरीत[3]मधिगच्छति प्रतिक्षिपति वा । तत्प्रतिषेधेन नेतरः । नेतर इत्युत्कृष्ट इत्यर्थः । यत एव शून्यतोपदेशादितरोऽपायनिष्ठ[4]स्तत एक शून्यतोपदेशान्नतरां निर्वाणनिष्ठो जायते । शून्यतादर्शन प्रत्ययेन[5] सर्वत्रसङ्गपरित्यागान्निहतक्लेशकर्मगणो नियतं निर्वृत्तिपद[6]मुपयाति । [[7]अथवा योऽमन्नैरात्म्यधर्मं शृणोति स प्रतिक्षेप विपर्ययबोधाभ्यामपायमेव याति । यो न शृणोति स पुण्यकर्मप्रत्ययेन स्वर्ग[8]मेव] ॥१२॥

२८८

§ २९. किं पुनरिदं नैरात्म्यं नाम यदसत्सु नोपदेष्टव्यं सत्सु चोपदेष्टव्यमिति तत्प्रतिपादयन्नाह—

* **अद्वितीयं शिवद्वारं कुदृष्टीनां भयङ्करम् ।**
**विषयः सर्वबुद्धानामिति नैरात्म्यमुच्यते ॥१३॥**

§ ३०. यदद्वितीयं शिवद्वारं तन्नैरात्म्यम् । यत्कुदृष्टीनां भयङ्कर तन्नैरात्म्यम् । यो विषयः सर्वबुद्धानां तन्नैरात्मम्[9]च्यते । तत्रात्मा[10] नाम यो[11]ऽपरायत्तस्वरूपः [12]स्वभावः । [ तदभावो नैरात्म्यम[13] । ] तच्च धर्मपुद्गलभेदाद्वितं प्रतिपद्यते । धर्मनैरात्म्यं पुद्गलनैरात्म्यं चेति । तत्र पुद्गलो नाम यः[14] स्कन्धानुपादाय प्रज्ञप्य[15]ते । स च स्कन्धेषु पञ्चधा मृग्यमाणो न सम्भवति । धर्मास्तु स्कन्धायतन[16] धातुसंशब्दिताः पदार्थाः । तदेषां धर्माणां पुद्गलस्य च यथास्वं हेतुप्रत्यया-

१. T. नैरात्म्यधर्मोपदेशः ।
२. T. S. न स्वीकरोति ।
३. T. S. विपरीतं शून्यतार्थं ।
४. T. S. निविष्ट ।
५. T. S. प्रत्ययः ।
६. T. S. निर्वृत्ति ।
७. T.
८. सुगति इत्यर्थः ।
९. T. तन्नैरात्म्यम् ।
१०. T. S. तच्चात्मा ।
११. S. यद् ।
१२. S. स्वरूपस्वभावः ।
१३. T. S. न तत्र अंशोऽयम् ।
१४. S. यः स्कन्धपञ्चकस्योपादानाख्यस्योपादाता ।
१५. प्रतीयते इत्यर्थः ।
१६. T. S. स्कन्धायतनधातु... ।

धीनजन्मत्वादुपादाय प्रज्ञाप्यमानत्वाच्च स्वायत्तमपरायत्तं निजमकृतक[1] रूपं नास्तीति पुद्गलस्य धर्माणां च नैःस्वभाव्यं व्यवस्थाप्यते। यस्य चार्थस्य स्वरूपसिद्धिर्नास्ति तस्य केनान्येनात्मनास्तु सिद्धिरिति। तस्मा[2]त्सर्वथा सिद्धलक्षणा[3] एवा[4] पदार्था मूर्खजन[5]स्य विमंवादकेनात्मना प्रतीत्य वो[6]पादाय वा वर्त्तमाना मूढधियां सङ्गास्पदं भवन्ति[7]।

§ ३१. यथास्वभावं तु सम्यग्दर्शनैः प्रतिभाव्यमाना धर्मपुद्गलयोः [ सङ्गपरिक्षयवाहका भवन्ति[8]] सङ्गपरिक्षयश्च निर्वाणावाप्तिकारणम्। विदितनैरात्म्यस्य हि सर्वेषु[9] भावेषु परिक्षी[10]णसङ्गस्य न क्वचित्काचित्प्रार्थना कुतो वा निमित्तोपलम्भ इत्यद्वितीयमेव शिवद्वारमेतन् नैरात्म्यम्। तच्चैतत्कुदृष्टीनां [भयङ्करम्। नैरात्म्ये हि वस्तुनः सर्वधानुपलम्भात्कुदृष्टीनां] वस्तुस्वरूपपरिकल्पसमाश्रयणा[11]दत्यन्तविनाशदर्शनाद्भयङ्करमेतन्नैरात्म्यम्। विषयः सर्वबुद्धानां नैरात्म्यम्। सर्वबुद्धानामिति श्रावकप्रत्येकबुद्धानुत्तरसम्यक्सबुद्धानाम्। ज्ञानविशेषविषयत्वेनावस्थानाद्विषयः सर्वबुद्धानामित्युच्यते। धर्मशरीरव्यतिरेकर्कातना वा सर्वेषां सम्यक्सम्बुद्धानामावेदयन्नाह विषयः सर्वबुद्धानामिति। विशेषणमालया[12] सर्वधर्म[13]नैरात्म्यमुक्तमाचार्येण ॥ १३ ॥

२८६

§ ३२. एतच्च नैरात्म्यं सता मन्दधियो जनस्य[14] नोपदेष्टव्यम्। यस्मात्—

*** अस्य धर्मस्य नाम्नोऽपि भयमुत्पद्यतेऽसतः।**
**बलवान्नाम को दृष्टः परस्य न भयङ्करः ॥१४॥**

§ ३३. बलवन्नैरात्म्यदर्शनं सर्वासद्दर्शनोन्मूलनसमर्थत्वात्। दुर्बलमसद्दर्शनमुन्मूलनीयत्वात्। नियतं चैतद्यद्दुर्बलः[15] सबलाद्बिभेतीति। तस्मान्न दुर्बलस्य कुदर्शनेनाभिभूतचित्तसन्तानस्यायं धर्म उपदेष्टव्यो भयहेतुरिति कृत्वा ॥ १८ ॥

२९०

§ ३४. ननु चोपदेष्टव्य एवायं धर्मः सकलकुदर्शनप्रमाथित्वात्। तथा ह्यवश्यं परप्रवादिनः सह धर्मेण निग्रहीतव्याः। ततश्च वादार्थिना सता परमत-

---

१. T. निज 'ऽ' कृतकल्पं।
२. T. S. न तत्र शब्दोऽयं वर्तते।
३. T. स्वलक्षणासिद्धा।
४. T. न तत्र 'एव' शब्दो वर्तते।
५. T. मूर्खजनस्येति शब्दस्याभावः।
६. T. न तत्र 'वा' शब्दो ऽ च।
७. T. . . सम्भवन्ति।
८. T.
९. T. ; S. न स्वीकरोति।
१०. T. परिक्षीणाशेष।
११. T. परिकल्पनाश्रयेण।
१२. T. ; S. विशेषणमालय।
१३. T. ; S न स्वीकरोति।
१४. T.; S. न तत्र शब्दोऽयं विद्यते।
१५. T. ; S. अबलवान्।

विजिगीषुणा धर्मोऽयमपात्रेष्व[1]प्युपदेष्टव्य इति । उच्यते । नैतदेवम् । यस्मात्[2]—।

*** वादस्य हि कृतो धर्मो नायमुक्तस्तथागतैः ।**
**परवादांस्तथाप्येष दहत्यग्निर्यथेन्धनम् ॥१५॥**

§ ३५. यदि चायं धर्मो वादस्य कृते [ उपदिष्टः ] स्यात् स्यादेतदेवम् । न त्वयं वादार्थ[3] मुपदिष्टो विमोक्षमुखेनोपदेशात् । यद्यप्येवं

[ परवादांस्तथाप्येष दहत्यग्निर्यथेन्धनम् ॥ वादार्थमनुपदिष्टोऽप्ययं धर्मः परवादं निराकरोत्येव शोधनादिकार्यार्थमुपादत्तोऽग्निर्यद्यपि दाहाद्यर्थो न भवति तथापि दहनस्वभावेनेष्टं कार्यमनुविदधान इन्धनमपि दहति ॥ ] १५ ॥

२६१

§ ३६. कथं पुनरेष धर्मः श्रद्धावतः सन्तान उपजातः परवादान्दहति । उच्यते –।

**जानाति य इमं धर्मं[4] प्रीतिरन्यत्र तस्य न ।**
**धर्मोऽयमात्मनस्तेन नाशद्वारमिवेक्ष्यते ॥१६॥[5]**

§ ३७. सद्धर्मतत्त्वदर्शनामृतरसास्वादनेन हि दर्शनान्तरस्यासन्तोषकरत्वान्न स तदन्येषु सर्वेषु दर्शनेषु प्रीयते । आचार्य आस्वादित सद्धर्मामृतरसस्येव बुद्धिमतो जनस्य मनः सन्तोषकरं वचनमाह—

धर्मोऽयमात्मनस्तेन नाशद्वारमिवेक्ष्यते ॥

§ ३८. पुनरनुत्पादेन विनाशदर्शनाद्धर्मोऽयं नैरात्म्यधर्मविगन्तृसन्ताने सर्वासद्दर्शनविनाशहेतुरित्याचार्यस्य दृश्यते । अयमनुपलम्भात्मक इति न कस्यचिदपि विनाशहेतुरिति नाशद्वारमिवेत्युच्यते अथ वोपदिष्टधर्माभिप्रायान्नाशद्वारमिवेत्युच्यते । निर्वाणं ह्यात्यन्तिको विनाशः । तदनुसारि द्वारं विमोक्षद्वारं शून्यतावगमात्मकम् । उपदिष्टोऽपि धर्म आचार्यस्य तादृशो दृश्यते । यथार्थधर्मस्वभावावगमेन ज्ञानाच्छ्रद्धावतो दर्शनान्तरे नाभिरुचिरेषमागमधर्मावगमे नान्यत्र प्रीतिरित्यभिप्रायः ॥१६॥

---

१. T. पात्रेषु ।
२. T. तथाहि ।
३. S. वादार्थ उपदेष्टव्य ।
४. T.
५. V. धर्मोऽयं येन विज्ञातो भवेत् सोऽन्यस्य न प्रियः ।
विनाशद्वारवत्तेन दृष्टो धर्मोऽयमात्मनः ॥

२६२

§ ३९. अथार्याणामपि किमेष उत्रासहेतुर्न भवतीति चेत्। आत्मस्नेह-निवृत्तेः। यस्यात्मस्नेहस्तस्यतदनुकूला वस्तुदृष्टिरिष्टा न तदनुकूला नैरात्म्यदृष्टिः।

**तत्त्वतो नैरात्म्यमिति यस्यैवं वर्तते मतिः।**
**तस्य भावात्कुतः प्रीतिरभावेन कुतो भयम् ॥[१]१७॥**

§ ४०. तत्त्वतो नैरात्म्यमिति यस्यैवं वर्तते मतिः। आर्यस्य।
तस्य भावात्कुतः प्रीतिरभावेन कुतो भयम् ॥

यस्य बाह्यस्यान्तरस्य च भावस्य स्वरूपापरिकल्पनया न कश्चिद्भावः स्वभावेनास्तीत्यभिप्रायो वर्तते कुत्र तस्याभावदर्शनेन तस्मान्नैरात्म्य [ दर्शना ] भयं कुतो [ वा ] भावदर्शनात्परिसन्तोषः। तस्मादेव तयोरनुरागस्य प्रतिघस्य चाभाव इति। भावदर्शनेऽनुरागा भावान्नैरात्म्यदर्शनेऽपि प्रतिघाभावात्। तस्मादुभयमनाचरन् निर्विवादोऽयं निर्वाणनगरीं मुखेन गच्छति। तस्मान् निर्वाणं परमं स्थानमिति तन्नैरात्म्यं न तस्य भावहेतुर्भवति ॥१७॥

२६३

§ ४१. भावदर्शनाभिनिविष्टास्तीर्थिका निर्वाणे प्रपातसंज्ञिनो निर्वाल्लोकस्योच्छेदं कुर्वन्तोऽनन्तदुःखहेतुभावदर्शनयोगगताना जनानामपर्यन्तदुःखबीजभूता भवन्ति। तस्मात्—।

**बीजभूताननर्थस्य विलोक्य तीर्थिकान् बहून्।**
**धर्मकाये जने कस्य करुणा नैव जायते ॥[२]१८॥**

२६४

§ ४२. कस्मात्पुनः सत्त्वाः कुशलान्तराशया अपि भूयसा तीर्थिकानां मतमनुबध्नन्ति न तु सौगतानामिति। तस्य सूक्ष्मत्वात्। यथा च सौगतानामयं धर्मः सूक्ष्म एव तदन्येषामायुक्त एव तथा प्रतिपादयन्नाह—

**शाक्यैरचेलकैर्विप्रैस्त्रिभिश्चक्षेन चक्षुषा।**
**कर्णेन गृह्यते धर्मः सूक्ष्मस्तत्समयो मुनेः ॥१९॥[३]**

---

१. V. अनात्मचिन्तातत्त्वेन तस्माद्यस्य सता भवेत्।
सता कस्य भवेत् प्रीतिरसता च भय कथम् ॥

२. V. अनर्थबीजभूतंस्तांस्तां दृष्ट्वा तीर्थिकान् बहून्।
धर्मकामे जने कस्य कृपा नाम न जायते ॥

३. V. शाक्येन चेतसा धर्मो नग्नकेन तु चक्षुषा।
श्रुत्या गृहीतो विप्रेण मुनिप्रोक्तस्ततः शिवः ॥

§ ४३. विप्रा हि पाठं सारं कुर्वन्ति। स तेषां कर्णविषयः अचेलका हि शौचाचाररहितत्वाद्वर्धमान देहदुर्गन्धपङ्काश्लेलस्नानशाटिकारहिता हिमवातसूर्य-केशलुञ्चनादिदुःखाधारभूताः। तेषां स आचारो दर्शनेनावगन्तव्यः। तस्मात्तेषां धर्मश्चक्षुषा विज्ञेयः। शम्यास्तु सर्वभावनिःस्वभावत्वदर्शनसूर्योद्भासितचित्तसन्तानाः समस्तासद्दर्शनभीता उन्मूलितगहनाविद्यातिमिराः संस्कृतं स्वप्नेन्द्रजाल मायायुवति[1] प्रतिविम्बनिर्माणसमं पश्यन्तो निखिल क्लेशमलायाकरणेन निर्मलभूतचित्तसन्तानाः समाहिताश्चैव निर्णेतव्याः। तस्मात्तेषां कुशलभावना मनोविज्ञानेनावगंतव्येति मुनेः समयः सूक्ष्मः। तस्मादनिश्चयेन पुण्यकामोऽपि जनो न सौगते धर्मे प्रवर्तते ॥ १९ ॥

२९५

§ ४४. अत्राह। यदि स्थूलबुद्धित्वाल्लोको बाह्योपासने प्रवर्तते अथेहाप्येव मनुविधीयताम्। न बाह्यं कार्यमनुविधीयते तथा हि—।

**ब्राह्मणानां यथा धर्मः प्रायेण बाह्य उच्यते।**
**नग्नकानां तथा धर्मः प्रायेण जड़ उच्यते ॥२०॥[2]**

§ ४५. ब्राह्मणा मन्त्रजपदानहोममङ्गलप्रायश्चित्तादिभिः कार्यैरन्येभ्यो लाभसत्कारादीच्छया बाह्यमिच्छन्ति। तेषां धर्मः प्रायेण बाह्यः। बाह्यप्रधान इत्यर्थः। अयं धर्मो मोक्षकामाणां निषिद्धः। संसारानुकूलत्वात्। यथा मोक्ष-पर्यन्तोच्छेदकत्वेन ब्राह्मणानां प्रायेण बाह्यो धर्मो मोक्षकामैर्नाचरितव्यस्तथा नग्नकानामपि धर्मश्चित्तजाड्यकरणहेतुर्जडप्राय इति नाचरितव्यः। अतएवमुपदेशो नानुविधीयते ॥ २० ॥

२९६

§ ४६. यस्मादेषां ब्राह्मणानां धर्मो बाह्यप्रायस्तस्माल्लोकस्य प्रायेण—।

**विद्याग्रहणतः श्रद्धा विप्रेषु जायते यथा।**
**कृपा क्लेशग्रहणतो नग्नेषु जायते तथा ॥ २१ ॥[3]**

---

१. तुलनार्थम्—M. पृ. ४५, ४६, ४६३.

२. V. ब्राह्मणानां यथा धर्मः क्रिया प्रायः प्रकीर्तितः।
निर्ग्रन्थानां तथा धर्मो जड़प्रायः प्रकीर्तितः ॥

३. V. यथैव वेदग्रहणे भक्तिर्विप्रस्य जायते।
निर्ग्रन्थस्य तथा क्लेशग्रहणे जायते मतिः ॥

§ ४७. यथा पाठक्रियामात्रेणोल्लसितचित्तस्य लोकस्य विद्याग्रहणाद्ब्राह्मणेषु श्रद्धा जायते तथा क्लेशग्रहणात्केशलुञ्चनादिदेहपरिखेदादचेलकेषु कृपा जायते ॥ २१ ॥

२९७

§ ४८. एषां शरीरपरिक्लेशदु:खानुभवो धर्मनिमित्तं भवतीति । नेदं सम्भवति । दुश्चरितफलादिति प्रतिपादनात् ।

**क्लेशः कर्मविपाकेण यथा धर्मो न जायते ।**
**जन्मकर्मविपाकेण तथा धर्मो न जायते ॥ २२ ॥**[1]

§ ४९. क्लेशः कर्मविपाकेण यथा धर्मो न जायते । इत्याह । यथा नग्नचारिणामिह दुःखानुभवो नरकदुःखानुभववद्धर्म निमित्तं न भवति ब्राह्मणानामपि । जन्मकर्म विपाकेण तथा धर्मो न जायते ॥ २२ ॥

२९८

§ ५०. यदि कर्म विपाकश्चक्षुरादिवद्दुःखं जन्म च न धर्मस्तर्हि को धर्म इति । उच्यते— ।

**धर्मं समासतोऽहिंसा वर्णयन्ति तथागताः ।**
**शून्यतामेव निर्वाणं केवलं तदिहोभयम् ॥२३॥**

§ ५१. धर्मं समासतोऽहिंसा वर्णयन्ति तथागताः । हिंसा परापकारापन्नत्वात्सत्त्वस्यापकारचिन्ता तत्समुत्क्षिप्तं कायकर्म वाक्कर्म च । अहिंसा तद्विपरीतमुखेन दश कुशलकर्मपथाः । यदापि परोपकारकं तत्सर्वमप्यहिंसान्तः संगृहीतम् । तथागता हि धर्मं समासतः संक्षेपतः सैवाहिंसेति प्रतिपादयन्ति ।

§ ५२. शून्यतामेव निर्वाणं केवलं तदिहोभयम् । या स्वभावशून्यतोच्यते तदेव बुद्धा भगवन्तो निर्वाणं वर्णयन्ति । अहिंसा शून्यता चेति तद्धर्मद्वयं स्वर्गविमुक्तिप्रायकम् । तस्मात्

केवलं तदिहोभयम् ।

---

१. V. क्लेशकर्म विपाकेन यथा धर्मो न जायते ।
जन्म कर्म विपाकेन तथा धर्मो न जायते ॥

२. MV. पृ० ३५२

केवलमिति परिशुद्धम् । तथागतप्रतिपादितेऽस्मिन्नेव धर्मद्वयमिदं परिशुद्ध-मुपलभ्यते नान्यत्रेति स्वपरात्मनोः स्वर्गस्य विमुक्तेश्च सुखं सम्यगुत्पादयितुकामेन प्रत्येतव्यम् ॥ २३ ॥

**२९९**

§ ५३. कस्मात्पुनरेषां बाह्यानां सुगतशासनमिदं पश्यतामपि धर्मद्वयेऽस्मि-न्नादर इति । स्वपक्षरागात् । तथा हि— ।

**स्वपक्षः सर्वलोकस्य जन्मभूमिरिव प्रियः ।**
**तन्निवृत्तिकरो हेतुर्भवेत्केन तव प्रियः ॥२४॥**[1]

§ ५४. स्वपक्षरागोऽनादिसंसारादभ्यस्तः । स च स्वजन्मस्थानवल्लोकेन परित्यक्तुं न शक्यते । तस्मात् स्वदर्शनाभिनिवेशेन बालास्तथागतधर्मेऽस्मिन्न प्रवर्तन्ते । पण्डितस्तु स्वजन्मभूमेरपि व्यसनहेतुभूताया आशा प्रहाय विशुद्धवैभवं देशमाश्रयितुमर्हन्ति । यथेदं तथा स्वरागपक्षं प्रहाय पक्षान्तरेऽपि गुणवति मनः प्रवर्तयितव्यम् ॥ २४ ॥

**३००**

§ ५५ तस्मादेवमपक्षपातिना— ।

**ग्राह्योऽन्यतोऽपि युक्तोऽर्थःश्रेयस्कामेन धीमता ।**
**ऊर्ध्वमर्को नेत्रवतां सर्वसाधारणो ननु ॥२५[2]॥**

## योगाचारे चतुःशतके दृष्टिविप्रतिषेधभावानां सन्दर्शनं द्वादशं प्रकरणम् ॥१२॥

§ ५६. बुद्धिमान् ह्यात्मीयमिव चेतसा यत्र क्वापि सुभाषितमुपलभेत तत् तस्मादाद्यात् । न क्वापीह धर्मे मात्सर्यं वर्तते । सर्वत्र समरूपत्वात् यथा सर्वत्रा-नुरागप्रतिघविरहितत्वाद्दर्शनीयः सूर्यः सर्वेषां चक्षुष्मतां साधारणस्तथायमपि धर्मो यदि सिद्ध्या समाप्यते स्ववर्गस्य परवर्गस्य च सर्वस्यैवोपकारकः । तस्मादेवं विदित्वा श्रद्धावतायं धर्म आत्मीयः कर्त्तुं युक्तः ॥ २५ ॥

---

१. V. स्वपक्षः सर्वलोकस्य प्रियः स्याज्जन्मभूमिवत् ।
निवृत्तिहेतुस्ते तस्य येन दुःखाय जायते ॥

२. V. परस्मादपि युक्तार्थं धीमानभिसमीप्सते ।
अर्कबिम्बं हि सामान्यं सर्वस्याक्षीमतो न किम् ॥

# त्रयोदशं प्रकरणम्

## इन्द्रियार्थप्रतिषेधभावनासंदर्शनम्

३०१

§ १. इह ग्राह्योऽन्यतोऽपि युक्तोऽर्थः श्रेयस्कामेन धीमता । इति १२. २५ यदुक्तं तत्र यो धीमता याह्यो युक्तोऽर्थः स पुनः क इति कथ्यताम् ।

उच्यते बाह्याध्यात्मिकाः सर्वे भावाः स्वभावेन निरात्मका दृश्यन्ते । यदि सर्वेषां भावानां स्वभावेनाभाव इति । नेदं प्रत्येतुं शक्यते । नास्त्यसतां खरविषाणादीना प्रत्यक्षत्वं घटादीना नीलादीनाञ्च प्रत्यक्षत्वमस्त्येवेति । तस्माद्घटादयः सर्वे भावा सस्वभावा एवेति ।

नेतद्युज्यते । तथाहि—

*** सर्व एव घटोऽदृष्टो रूपे दृष्टे हि जायते ।**
**ब्रूयात्कस्तत्त्वविन्नाम घटः प्रत्यक्ष इत्यपि ॥१॥**

§ २. अपि शब्देन तदुपादाननीलादिरपि प्रत्यक्ष इति कस्तत्त्वज्ञो ब्रूयात् । घटस्य द्रव्याष्टकत्वात् ।[1] चक्षुषा ह्येक रूपं दृश्यते न गन्धादि । विषयभेदात् । तस्मान्न सर्वो घटश्चक्षुषा दृष्ट इति ॥१॥

३०२

§ ३. यथा यथोक्तेन न्यायेन घटादीनां प्रत्यक्षत्वं न युज्यते एवमिन्द्रियान्तरेण परिच्छेद्याना प्रतीत्य प्रज्ञापयितव्यानां (?) घ्रातव्यानां स्वादयितव्याना स्प्रष्टव्यानां च प्रत्यक्षत्वं निराकर्तुमाह—

**एतेनैव विचारेण सुगन्धि मधुरं मृदु ।**
**प्रतिषेधयितव्यानि सर्वाण्युत्तमबुद्धिना ॥२॥**

§ ४. सुगन्धीतीदं नासिकापरिच्छेद्यं जातिकुसुमपद्मोत्पलचन्दनादि निखिलं नासिकेन्द्रियविषयमुपलक्षयति । रूपादिदर्शनं विना कारागारगतगन्धमात्रग्रहणात् । एवं मधुरमितीदं शर्करालवणनिम्बादि सर्वं रसनेन्द्रियविषयमुपलक्षयति । मृद्वितीदं दारु (?) कम्बलसिकतापाषाणादि सर्वं कायेन्द्रियविषयमुपलक्षयति । तेऽपि

---

१. द्रव्याष्टकम्—चत्वारि महाभूतानि, चत्वारि च उपादायरूपाणि ।

द्रव्याष्टकोपादाना इति यथास्वमिन्द्रियैरेकैक विषयतया गृह्यन्ते न सर्वथेति जाति कुसुमशर्करादारु (१) कम्बलादीन्यात्मनः प्रत्यक्षाणीतिकस्तत्त्वज्ञो ब्रूयात् । शब्दप्रतिषेधः पश्चाद् (१३-१८-२०) विस्तारतो व्याख्यास्यते परम् ।

३०३

§ ५. अथ यदि घटो रूपादभिन्नो रूपं तं व्याप्यवर्तत इति रूपदर्शनेन सर्वो घटो दृश्यतेति चेत् । इदमप्यसारमिति प्रतिपादयन्नाह—

**यदि दृष्टेन रूपेण दृष्टः सर्वः स जायते ।।**
**दृष्टमदृष्टरूपेण किमदृष्टं न जायते ।।३।।**

§ ६. यदि दृष्टेन रूपमात्रेणादृष्टो अपि सर्व एव घटो दृश्येतादृष्टेन घटेन दृष्ट रूपं किमदृष्टं न जायते । अथवेदमर्थान्तिरम् । घटो द्रव्याष्टकोपादानकोऽपि यद्येकेन द्रव्येण रूपेण कृत्स्नो दृष्टः कल्प्यते तैस्तावदपृथगवस्थितं तदेव रूपं तद-न्येननादृष्टेन द्रव्यसप्तकेनादृष्टमिति किं न कल्प्यते । तस्माद्रूपमेव न प्रत्यक्षमिति घटस्यापि प्रत्यक्षत्व न युक्तम् ।।३।।

३०४

§ ७. अथ मन्यते यदि यथोक्तेन विचारेण घटस्य प्रत्यक्षत्वं न सम्भवति घटरूप तु तावत्प्रत्यक्षम् । तस्मात्परम्परया घटोऽपि प्रत्यक्ष एव जायत इति ।

नेद भवति । रूपस्य प्रत्यक्षत्वे तत्तथोच्यते । न तु रूपस्य प्रत्यक्षत्वं सम्भव-तीति प्रतिपादयन्नाह—

**रूपस्यैव केवलस्य प्रत्यक्षत्वं न विद्यते ।**
**अंशः परश्चापरश्च मध्यमश्चास्ति तस्य यत् ।।४।।**

§ ८. अनीप्सितगन्धादिसम्बन्धाभिधानस्य केवलस्य रूपस्यापि कर्णे परापर-मध्यांशानां दर्शनात् प्रत्यक्षत्वं न युज्यते । तेषामपि परापर मध्यांशानां पुनरन्ये परापरमध्यांशाः तेषामप्यन्ये तेषामप्यन्य इत्येवं कर्णे पश्चाद्रूपमापरमाणवन्ता-द्वर्तत ।।४।।

---

१. V. रूपे दृष्टे यतः सर्वमेतददृष्टं भविष्यति ।
रूपेऽदृष्टे कुतो दृष्टमदृष्टं नैव जायते ।।

२. V. रूपस्य केवलस्यैव प्रत्यक्षत्वं न जायते ।
कुतस्तस्य वहिर्भागः कुतो मध्यं कुतोऽन्तरम् ।।

३०५

§ ९. कल्प्यमानस्य— ।

**अणोरंशोऽस्ति नास्तीति विचारोऽत्रापि वर्तते ।**
**तस्मात्साध्येन साध्यस्य सिद्धिर्नैवोपपद्यते ।।५।।**[1]

§ १०. अणोरपि तस्य पुरः पश्चाद्दिगंशभेदात्परापरमध्यांशभेदाच्च अंशोऽस्ति नास्तीति विचारोऽत्रापि वर्तते ।

यदि तत्र पुरः पश्चादंशभेदः स्यात्तदा घटवत्तस्य परमाणुत्वहानिः । अथ न स्यादेवमप्यप्रकाशस्यागृहीतरूपस्य तस्य नास्त्यस्तित्वम् । अतः कुतस्तस्य प्रत्यक्षत्वसम्भवः ।

तस्मात्साध्येन साध्यस्य सिद्धिर्नैवोपपद्यते ।। तस्मादेवं प्रत्यक्षत्वमसिद्धं नोपपद्यते तदेवं प्रत्यक्षत्वमसिद्धं साध्यभूतमिति साध्यम् । भावानां सस्वभावत्वं त्वन्याभ्युपगमसिद्धं नोपपद्यते ।।५।।

३०६

§ ११. अन्यच्च । रूपवदिन्द्रियग्राह्योऽर्थः परिकल्प्यते—

**सर्वोऽप्यवयवी भूत्वा जायतेऽवयवी पुनः ।**
**तस्माद्वर्णस्य वचनमप्यत्र नैव विद्यते ।।६।।**[2]

जायतेऽवयवी पुनः तस्माद्वर्णस्य वचनमप्यत्र नैव विद्यते ।

§ १२. घटः खल्ववयवं कपालमपेक्ष्यावयवी । कपालावप्यात्मनाऽवयवमपेक्ष्यावयविनौ । एवं परमाणुपर्यन्तं योजनीयम् । सोऽपि द्रव्याष्टकमपेक्ष्य पुरः पश्चान्मध्यञ्चेत्यंशान् वापेक्ष्य पुनरवयवीति कुत्रापि स्वरूपेणावयवत्वमवयवित्वं वा नास्ति । तस्मान्न घटादीनां प्रत्यक्षत्वम् । यथा परमाणोर्विचारस्तथानन्तनामगतस्य वर्णस्यापि । परमाणुवदसिद्धेः ।

तस्माद्वर्णस्य वचनमप्यत्र नैव विद्यते ।।

वर्णस्य वचनमपि न सम्भवतीत्यभिप्रायः । एकप्रकारेण घटादीनामभावे तेषां वाचको वर्णोऽपि न सम्भवति । अर्थाभावे ज्ञानवाचकयोः प्रवृत्त्यसम्भवात् ।

---

१. V. अणोरंशोऽस्ति नास्तीति विचारस्तत्र वर्तते ।
तस्मात्साध्येन साध्यस्य सिद्धिर्नैवोपपद्यते ।।

२. V. सर्वेभ्योऽवयवेभ्यो हि जायतेऽवयवी पुनः ।
उक्तानामपि वर्णानां सत्त्वेयं तन्न विद्यते ।।

वर्णस्य वचनमप्यत्र नैव विद्यते ॥६॥

३०७

§ १३. ये तु रूपायतनं वर्णसंस्थानात्मना द्विधा व्यवस्थाप्य[1] तद्द्वारा घटस्य प्रत्यक्षत्वं कल्पयन्ति तान्प्रति वक्तव्यम् । इह संस्थानमिदं कल्प्यमानं वर्णादन्यत्वेनानन्यत्वेन वा कल्प्यते । तत्र तावद् — ।

**वर्णादन्यत्संस्थानं चेत्संस्थानं गृह्यते कथम् ।**
**अन्यदथ कायेन वर्णोऽपि किं न गृह्यते ॥७॥[2]**

§ १४. वर्णादन्यत्संस्थानं चेत्संस्थानं गृह्यते कथम् । नीलादिवर्णो हि चक्षुरिन्द्रियविषयः । यदि तस्मात्संस्थानम् [अन्य] भूतं वर्णाद्भिन्नमिति शब्दादिवन्न चक्षुर्ग्राह्यं भवेत् । गृह्यते तु वर्णवच्चक्षुषेति न तस्मादन्यत् । यथा भिन्नेषु नीलपीतादिष्वन्यतरदगृहीत्वेतरद्गृह्यते तथा वर्णादन्यद्रूपं न गृह्यते । अनन्यदथ कायेन वर्णोऽपि किं न गृह्यते ।

§ १५. यदि यथोक्तदोषजिहासया संस्थानं वर्णादन्यत् कल्पितम् । तथा सति यथा कारागारे कायेन दीर्घादि गृह्यते तथा तदभेदात्संस्थानवद्वर्णोऽपि किं न गृह्यते ग्राह्योऽपि न गृह्यते तस्मात् संस्थानस्य ग्रहणेऽप्यग्रहणात् संस्थानं वर्णान्नान्यत् । न च तत्वान्यत्वकल्पनातोऽप्रतीतौ शक्यं कल्पनान्तरं स्थापयितुम् तस्माद्वर्णवत् संस्थानमपि न युक्तम् । तदभावाच्च न कस्यचिदपि प्रत्यक्षत्वमिति सिध्यति ॥७॥

३०८

§ १६. अत्राह विद्यत एव रूपायतनम् । तद्धेतुसद्भावात् । इह रूपहेतुश्चत्वारि महाभूतानि । तानि तावद्विद्यन्ते । तेषां सद्भावेन तेषां फलमिति रूपायतनमपि विद्यत इति उच्यते । इदमपि न सम्यगिति प्रतिपादयन्नाह—

**रूपदर्शननिर्मुक्तं न दृष्टं रूपकारणम् ।**
**एवं चेदुभयं कस्माच्चक्षुषैव न गृह्यते ॥८॥[3]**

---

१. रूपं द्विधा, अस्य रूपं द्विधा वर्णः संस्थानं च
AK. १.१०: MVT. १०१, DSu. ६१७.

२. संस्थानं वर्णतो भिन्नं तद्वर्णग्रहणं कथम् ।
अथाभिन्नं शरीरेण वर्णस्याग्रहणं कथम् ॥

३. V. दृष्टो न हेतु रूपस्य रूपदर्शनवर्जितः ।
सत्येवमुभयं चक्षुरेव गृह्णाति नो कथम् ॥

§ १७. द्रव्याष्टक सहभाव नियतमहाभूत चतुष्टयविनिर्मुक्तं रूपं नोपलभ्यते। रूपायतनविनिर्मुक्तोऽपि रूपहेतुर्नोपलभ्यते। रूपायतनं चक्षुरिन्द्रियग्राह्यम्। रूपहेतुस्तु कायेन्द्रियग्राह्यः। तस्माद्यदि रूपहेतुरिति किञ्चित्स्वरूपेण सिध्येत्तदा रूपमपि स्वरूपेण सिध्येत् रूपहेतोरूपाद्यः सिद्धो भेदो न तस्य सम्भवोऽपि। तस्माद्रूपहेतोरभावे निर्हेतुकं रूपमपि न सिध्यति। अथाभेदावस्थिताद्रूपहेतो रूपं भवतीति मन्यते। तदपि न सम्भवति।

एवं चेदुभयं कस्माच्चक्षुषैव न गृह्यते॥

रूपहेतोरपि रूपभेदाच्चक्षुरिन्द्रियेण हेतुफलयोरुभयोरपि ग्रहणं जायेत। न चेदं सम्भवति। इन्द्रियाणां भिन्नविषयत्वाल्लक्षणभेदाच्च॥८॥[१]

३०६

§ १८. तदेव प्रतिपादयन्नाह—।

**कठिना दृश्यते भूमिः सापि कायेन गृह्यते।[३]**

**तेन हि केवलं स्पर्शो भूमिरेषेति कथ्यते॥६॥[२]**

§ १६. धृतिकर्मणा[४] आश्रय वस्तुन्यवस्थानादाश्रयत्वेन काठिन्येन "कठिना दृश्यते भूमिः सापि कायेन गृह्यते।" तस्याः काठिन्यस्य कायेन्द्रियग्राह्यत्वात्। येनैतदेवं तेन हि केवलं स्पर्शो भूमिरेषेति कथ्यते। रूपायतनं तु चक्षुरिन्द्रियग्राह्यम्।

---

१. MK. ४.१-४

२. भूमिरित्यागमो दृष्टः स शरीरेण गृह्यते।
मृत्पिण्डस्य ततः कोऽपि स्पर्शो भूमिरितीरितः॥

३. काठिन्यं दृश्यते भूमेस्तच्च कायेन गृह्यते। भूमेरर्थः काठिन्यम्, विभंग ८२, चत्वारि महाभूतानि पृथिवीधातुरब्धातुस्तेजोधातुर्वायुर्धातुः पृथ्वीधातुः कतमः। खक्खडत्वमिति विस्तरः। तेषां च स्प्रष्टव्यत्वादिति तेषां च खक्खलत्वादीनां स्प्रष्टव्यत्वायम्मात्तानि स्प्रष्टव्यानि। वर्णाद्यस्तु द्रष्टव्या श्रोतव्या घ्रातव्याः स्वादयितव्याः कथं गम्यते स्प्रष्टव्यानि तानित्याथ न हि काठिन्यादीनि चक्षुरादिभि र्गृह्यन्ते। किं तर्हि कायेन्द्रियेणैव। इत्यताऽवगम्यते स्प्रष्टव्यानि तानीति। स्यान्मतं तेऽपि वर्णाद्यः स्प्रष्टव्या। इत्यत आह नापि वर्णादयः कायेन्द्रियेण। किं गृह्यते इति प्रक्रतम्, AK-AKV. । १.३५, पृ० ६६, MV, pp. ६६-६७.।

४. AK. १. १२।

§ २०. तस्मान्नैवं हेतुफलयोरभेदो लक्षणभेदाद्ग्राहकभेदाच्च भेदेऽप्यहेतुवादः[१]। न च तत्वान्यत्वविरहितस्य कस्यचिदप्यस्य भावस्य च रूपेण सद्भाव कल्पयितुं युज्यते। तस्मान्नास्ति रूपस्य हेतुसद्भावः। रूपस्य हेत्वाभावे च न रूपं स्वरूपेणास्ति सिद्धम्। तस्मादुक्तं भगवता—

**ये मां रूपेण अद्राक्षुर्ये मां घोषेण अन्वयुः।**
**मिथ्याप्रहाणप्रसृता न मां द्रक्ष्यन्ति ते जनाः॥**

अथ कथं द्रष्टव्य इति चेद्

**धर्मतो बुद्धा द्रष्टव्या धर्मकाया हि नायकाः।**
**धर्मता चाप्यविज्ञेया न सा शक्या विजानितुम्[२]॥**

इति ॥९॥

## ३१०

§ २१. अत्राहुः केचित्। एकैको घटः स्वरूपेणाद्रष्टव्योऽपि न खलु न द्रष्टव्यः। द्रष्टव्यत्व सम्बन्धाद्दृष्टव्यो भवेत्। द्रष्टव्यभूतश्चेति प्रत्यक्षो भवेदिति। इदमपि न युक्तमिति प्रतिपादयन्नाह—।

**द्रष्टव्यत्वेन जातेन नास्मिन् कश्चिद्गुणो घटे।**
**द्रष्टव्यत्वजातिवत्तत्सद्रूपोऽपि न विद्यते[३] ॥१०॥**

§ २२. यदि द्रष्टव्यत्वमभिव्यक्तं विशेषणभूतं वोभयथापीह द्रष्टव्यत्वं निष्प्रयोजनम्। इह द्रष्टव्यमिदं परिकल्पय [ज्ञानं] द्रष्टव्यस्यार्थस्य स्वरूपमद्रष्टव्यस्यार्थस्य वा स्वरूपं कल्प्यते। यदि तावद्दृष्टव्यस्य स्वरूपं तदा किं तेन परिकल्पितेन। यदर्थं परिकल्प्यते [तस्य] तद्विनापि भावादेवेति न युक्ता कल्पना। अथाद्रष्टव्यभूतस्यापि द्रष्टव्यत्वं कल्प्यते। तदपि न युक्तम्। अशरीराणामपि द्रष्टव्यत्वप्रसङ्गाज्जातेन द्रष्टव्यवेनास्य विरोधाच्च द्रष्टव्यत्वं न जायते।

---

१. मज्झिमनिकाय, १.४०८।

२. MV. पृ० ४८८, वज्रच्छेदिका, पृ० ४३, BCP. पृ० ४२१, JRAS, १९०६, पृ० ९४८।

३. V. जातमात्रे घटे दृष्टे गुणः कश्चिन्न भासते।
एवं जातस्य दृष्टस्य सत्स्वरूपं न विद्यते॥

§ २३. **द्रष्टव्यत्वजातिवत्तत्** ।

*यथा द्रष्टव्यस्याद्रष्टव्यस्य च घटस्य सर्वथा द्रष्टव्यत्वं न युज्यत इति जाति-र्न सम्भवति तथा द्रष्टव्यभूतो घटः* ।

सद्रूपोऽपि न विद्यते

असतो घटस्य द्रष्टव्यत्वकल्पनापि न युक्तेतदमयुक्तम् ॥१०॥

**३११**

§ २४. अत्राह । सन्त्येव प्रत्यक्षा रूपादिविषयास्तद्ग्राहकचक्षुरादीन्द्रिय-सद्भावात् । सद्भूतान्येतानीन्द्रियाण्यवश्यं स्वविषयेषु प्रवर्तन्त इत्यभिप्रायः । यत्र तेषां प्रवृत्तिः सम्भवति ते रूपाद्यर्थाः प्रत्यक्षाः । उच्यते । स्यु रूपादयोऽर्था यदीन्द्रियाणां परिच्छेत्तुं शक्तिः स्यात् । नैव त्वस्ति । कथमिति चेत् । इह चक्षु-रादीनि पञ्च सामान्यतो भौतिकानीत्युपदर्श्यंते । तेषां कार्यं [तु] विषयभेदेन भिद्यते । तथा हि चक्षुषा रूपमेव दृश्यते न शब्दः श्रूयते । कर्णेनापि शब्दः श्रूयते । न रूपं दृश्यते । यदेवम्— ।

**भौतिकमक्षि कर्णश्च दृश्यतेऽक्ष्णापरेण न ।**
**नूनं कर्मविपाकं तदचिन्त्य मुक्तवान्मुनिः ॥११॥**[1]

§ २५. भौतिकमक्षि कर्णश्च दृश्यतेऽक्ष्णापरेण न । तदोपपत्ति विरुद्धकार्य-सम्भवात्कुतश्चक्षुरादीनां स्वरूपकल्पना । तुल्येऽपि भौतिकत्वे विषयग्रहणभेदः कल्पयितुं न युज्यते । चक्षुरादीना सद्भावो विषग्रहणकर्मणानुमीयते । तदपि विरोधेन न सम्भवतीतीन्द्रियसद्भावेन विषयाणां प्रत्यक्षत्वं न युक्तम् । यद्येवं चक्षुरादीनि न सम्भवन्ति ततः कथमेषा चक्षुरादीनामिन्द्रियाणां कर्मविपाकस्वरूपव्यवस्था । किमस्माभिरेषा विपाकस्वरूपं प्रतिसिद्धम् । यदि चक्षुरादीना प्रतिषेधः साध्यते कथ तेन न तत्प्रतिषिद्धम् । अस्माक विचारस्यार्थ-स्वभावन्यायतत्परत्वान्नास्माभिरिह भावानां स्वभावसिद्धेन प्रतिषेधेन चक्षुरादिकृतः प्रतीत्यसमुत्पन्नः कर्मविपाकः प्रतिषिद्धः ।

§ २६. यच्चक्षुर्भौतिकमपि रूपमेव पश्यति न शब्द शृणोतीत्यादि । दृश्यते हीदमपि यस्मादेत देव ।

नूनं कर्मविपाकं तदचिन्त्य मुक्तवान्मुनिः ॥

निःस्वभावानामपि भावाना कर्मफलनियमेन भगवान् कर्मफलविपाकम चिन्त्यमुक्तवान् ॥ ११ ॥

---

१. V. चक्षुर्दर्शनतोऽभिन्नो चाक्षुषं श्रावणं तथा ।
अचिन्त्य कर्मणो नूनं विपाकं प्रोक्तवान् मुनिः ॥

## ३१२

§ २७. अत्राह। विद्यन्त एव चक्षुरादीनि स्वभावेन। तत्कार्यविज्ञानदर्शनात्। उच्यते। स्याच्चक्षुरादिसद्भावो यदि तत्कार्यं विज्ञानमेव स्यात्। न तु सम्भवति। कथमिति। तत्र तावत्।

**ज्ञानं प्रत्ययवैकल्यान्न पूर्वं दर्शनाद्भवेत्।**
**अथ पश्चान्निरर्थं स्यात्तृतीयायां क्रिया वृथा ॥१२॥**[1]

§ २८. न तावद्दर्शनात्पूर्वं चक्षुर्विज्ञानं चक्षुषो दर्शनाधिपतिप्रत्यय[2] वैकल्यात्। अथ दर्शनात्पश्चात्कल्प्यते। तदा ज्ञानं निरर्थकम्। यदि विना विज्ञानेन चक्षुषा रूपदर्शनं तदा विज्ञानकल्पना निरर्था।

§ २९. तृतीयायां क्रिया वृथा ॥

तृतीया कल्पना ज्ञानदर्शनयोर्द्वयोर्युगपदुद्भवः...तत्र...न भवति। अनेन दर्शनेन क्रिया निरर्था। विज्ञानदर्शनयोः सहभावे विज्ञानं येन दर्शनेन तुल्यकालं तस्य दर्शनस्यायत्तं भवतीति न युक्तम्। सहभूतयोः सव्येतरयोर्गोविषाणयो[3] रितरदितरायत्तं जायत इति न सम्भवति। तथा च दर्शनेन सहभूतं विज्ञानं दर्शनायत्तं न जायत इति दर्शनं निरर्थमेव।

यदैवं विज्ञानं न सम्भवति तदा क्व तत्सद्भावेन चक्षुरादीनां...सद्भाव—परीक्षेति न तद्युक्तम् ॥१२॥

## ३१३

§ ३०. [4][अत्राह। न खलु चक्षुः करणरूपम्। किं तर्हि कारकमेव। तस्य कारकभावाभ्युपगमात्। इति यदुक्तं (१३.१२) न तद्युक्तं। एवं कल्पितेऽपि चक्षुर्दर्शनकार्यविरहितमेव भवेत्। कथमिति चेत्। यदि चक्षु][4]

---

१. V. अमितप्रत्ययज्ञानं दृष्टपूर्वं न विद्यते।
अथान्ते ज्ञानवैयर्थ्यं दर्शनंच निरर्थकम् ॥

२. MV. पृ० ७६-७७, Poussin's note, No, ७, विसुद्धिमग्ग (सं० भिक्षु ए० पी० बुद्धदत्त, १९१४) पृ० ४१५—जेट्ठकट्ठेन उपकारको धम्मो अधिपतिपच्चयो...। यं यं धम्मं गरुं कत्वा ये ये धम्मा उपज्जन्ति चित्तचेतसिका ते ते धम्मा तेसं तेसं धम्मानं अधिपतिपच्चयेन पच्चयोति।

३. MV. पृ० १३६, २२४, ५४७

४. S. न स्वीकरोति T.

रूपं[1] पश्येद्देशं गत्वा- वा पश्येदगत्वा वा पश्येदुभयथा[2] च[3] दोष इति प्रतिपादयन्नाह--- ।

*** पश्येच्चक्षुश्चिराद्दूरे गतिमद्यदि तद्भवेत् ।**

**अत्यभ्यासे च दूरे च रूपं व्यक्तं न तच्च किम् ॥१३॥**

§ ३१. यदि चक्षु[4]: प्राप्तकारित्वाद्विषयदेशं गच्छेत्तदोन्मिषितमात्रेण न चन्द्रतारकादीनर्थान् गृह्णीयात् । [गतिमतोऽर्थदेशोपग्रहणं][5] तुल्यकालं विप्रकृष्टविषयग्रहणं [च][6] अयु[7]क्तं गतिकालस्य भिन्नत्वात् । पश्यति च चक्षुरुन्मिषितमात्रेण समीपस्थवद्विदूरदेशस्थमपीत्ययुक्तमेतत् । यदि [च][8] प्राप्तकारि चक्षुः स्यात्तदात्यभ्यासेऽपि पश्येदक्षिस्थामञ्जनशलाकां[9] दूरे च व्यक्तदर्शनं स्यात् । न चैतत्सम्भवतीत्ययुक्तमेतत् ॥१३॥[10]

**३१४**

§ ३२. अपि च । यदि चक्षुर्गत्वा रूपं[11] पश्यति तत्किं दृष्ट्वा तद्देशं[12] गच्छत्युतादृष्ट्वा[13] । उभयथापि दोष इति प्रतिपादयन्नाह ।

*** गतेन न गुणः कश्चिद्रूपं दृष्ट्वाक्षि याति चेत् ।**

**द्रष्टव्यं नियमेनेष्टमिति वा जायते वृथा ॥१४॥**

§ ३३. यदि रूपं दृष्ट्वा रूपदेशं चक्षुर्यातीति कल्प्यते गतेन तेन गमनेन चक्षुषो न किञ्चित्प्रयोजनम् । विषयदर्शनार्थं चक्षुषो गमनम् । स च विषयः पू[14]र्वमिवेहस्थेन दृष्ट इति न किञ्चिद्गमनस्य प्रयोजनम् । अथादृष्ट्वा गच्छति ।

---

१. T. न तत्र शब्दोऽयं वर्तत,
 S. स्थः पश्येद्रूपं ।
२. T. S. उभयथा ।
३. T. न तत्र शब्दोऽयं विद्यते ।
४. S. चक्षुषः ।
५. T. ।
६. T. दन् ।
७. T. S. विषयग्रहणयुक्तम् ।
८. S. T. यन् ।
९. T. S. शलाका वा ।
१०. चक्षुप अप्राप्तविषये दृष्टव्यम्—असम्पत्तवसेना ति अत्तानमसम्पत्तस्स गोचरस्स वसेन । अत्तना विसयदेसं वा असम्पत्तवसेन । चक्खुसोतानि हि रूपसद्देहि असम्पत्तानि । सयं वा तानि असम्पत्तान एव आरम्मणं गण्हन्ति ।—VT. §२८६,६.८, pA. २.५, पृ० ५१–६०, AK. १.४३ AKB AKV with poussin note, NS. ३. १. ४४, NK. पृ० २३ ।
११. T. S. विषयं ।
१२. T. S. किं विषयं दृष्ट्वा विषयदेशं ।
१३. T. ततः किं दृष्ट्वा ।
१४. T. तत्पूर्वमेन ।

तदा दिदृक्षित विषयदर्शनं नियमेन न प्राप्नोति । अदृष्ट्वा ह्यन्धस्येवानभिलक्षित देशगमन,द्रष्टव्यस्य नियमेन दर्शनं न प्राप्नोति ॥१४॥

§ ३४. अथैतद्दोषपरिजिहीर्षया यदि ।

*** गृह्णीयादगतं चक्षुः पश्येत्सर्वमिदं जगत् ।**
**यस्य नास्ति गतिस्तस्य नास्तिदूरं न चावृतम् ॥१५॥**

§३५.यो हि मन्यते चक्षुः श्रोत्रं[1] मनोऽप्राप्तविषयमित्यागमा[2]दप्राप्त विषयमेव चक्षुरिति तं प्रत्युच्यते । प्राप्तकारितामात्रप्रतिषेधपरत्वादागमस्य तावदविरोधः । क्वचिद्विधेः प्राधान्यं यत्र तस्याविरोधः । क्वचित्प्रतिषेधस्य प्राधान्यं यत्र तदविरोधः[3] । तदत्र वि[4]धेरसम्भवात्प्राप्तकारिताप्रतिषेधमात्रेणाप्राप्तविषयत्वं व्यवस्थाप्यते । विधिमुखेन त्वप्राप्तविषयत्वे कल्प्यमान इहस्थमेव चक्षुः सर्वं जगत्पश्येत् । यस्य[5] हि गतिर्नास्ति तस्य कुतोदूरम् । समीपस्थोऽपि ह्यनेनार्थोऽगत्वा द्रष्टव्यो [6]विदूरस्थोऽपीति दूरकृतोऽपि विशेषो न स्यात् । यदा चागत्वा पश्यति तदे[7]हस्थमिव विदूरस्थमपि[8] पश्येत् । गतौ हि सत्याभावृते गतिविघाता-दा[9]वृतं नेक्षत इति युक्तम् । यदा त्वगत्वा द्रष्टव्य तदावृते गतिप्रतिबन्धाभावादनावृत इव दर्शनं स्यात् ॥१५॥

३१६

§ ३६. यदि च दर्शनस्वभावं चक्षुः स्यात्तदा स्वभावस्य सर्वत्रैवाव्याघातात् स्वरूपमपि पश्येत् । तथा हि लोके— ।

*** स्वभावः सर्वभावानां पूर्वमात्मनि दृश्यते ।**
**ग्रहणं चक्षुषः केन चक्षुषैव न जायते ॥१६॥**

§ ३७. यथा चम्पकमल्लिकादिषु[10] सौगन्ध्यं पूर्वं स्वाश्रय एवोपलभ्यते पश्चात्तत्सम्पर्कस्तैलादिस्वपि । यथा चाग्नेरौष्ण्यं स्वतोऽवस्थित[11] तद्योगात्

---

१. S. श्रोत्रमनो...।
२. AK. १.४३—अप्राप्तार्थान्यक्षिमनःश्रोत्राणि ।
३. T.S. तद्विरोधः ।
४. T. विचारस्य ।
५. T. यस्यैवं ।
६. T. S. विदूरस्थे ।
७. T. S. तदिह ।
८. T. S दूरमपि ।
९. S. T. विघातादावृतं ।
१०. T. चम्पकोत्पलादि कुसुमानां ।
११. T. S. स्वतो व्यवस्थितं ।

परतो[1]ऽप्युपलभ्यते । एवं यदि चक्षुदर्शनस्वभावं[2] स्यात्तदा स्वात्मन्येव तावद्द[3]-र्शनं स्यात् । कस्मात्पुनश्चक्षुषो ग्रहणं चक्षुषैव न भवति । भावानां स्वभावस्य च स्वात्मन्येव प्रथमतरं विद्यमानत्वाच्चक्षुषैव चक्षुषो ग्रहणं न्याय्यम् । न चक्षुः स्वात्मानं पश्यतीति लोष्टादिवत्[4] परदर्शनमप्यस्य न सम्भाव्यते ॥१६॥

३१७

§ ३८. यस्तु मन्यते न केवलस्य चक्षुषो रूपदर्शनसामर्थ्यमस्ति । अपि तु त्रयाणां चक्षूरूपचक्षुर्विज्ञानानां सामग्र्यां सत्यां रूपदर्शनं भवतीति । तदप्यसारम् । यस्मात्— ।

*** चक्षुषोऽस्ति न विज्ञानं विज्ञानस्य न दर्शनम् ।**
**उभयं नास्ति रूपस्य तै रूपं दृश्यते कथम् ॥ १७ ॥**

§ ३९. चक्षुषस्तावद्विज्ञानं नास्ति । न हि चक्षुर्विषयं जानात्यविज्ञानस्वरूपात् । भौतिकं हि चक्षुः । तस्य जड़त्वाद्विषयबोधो न सम्भाव्यते । एवं "चक्षुषोऽस्ति न विज्ञानम् ।"

§ ४०. नापि विज्ञानस्य दर्शनमस्ति ।[5] विज्ञानं हि विजानाति न तु पश्यति । यदि तु विज्ञानं पश्येत्तदा तस्यापि रूपदर्शनम् स्याद्विज्ञान सद्भावात् । रूपस्य तूभयमपि नास्ति । न विज्ञानमनवबोध[6] स्वरूपत्वात् । नापि दर्शनं रूपालोचनाभावात्[7] । यदा चैव मन्योन्यार्थ विकलानीन्द्रियविषयविज्ञानानि तदा[8] तत्सामग्र्यामपि सत्यां नैव तै रूपं दृश्यत इति सम्भावयितुं शक्यम् ।[10] रूपदर्शनाङ्गविकलत्वादन्धसमुदायवदित्यभिप्रायः । यदा चैवं रूपस्य [11]दर्शनाभावस्तदा को नामार्हति तत्त्वविद्रूपं दृश्यत इति वक्तुं द्रष्टुं वा ॥१७॥

३१८

§ ४१. यथा च तत्त्व विन्नार्हति रूपं द्रष्टुमेवं शब्दमपि श्रोतुं नार्हति । रूपदर्शनवच्छब्दश्रवणस्याप्यसम्भवा[9]त् । इह यदि शब्दः श्रूयते स श्रवणादेशं

---

१. T. परात्मतो ।
२. T. S. चक्षुषोरदर्शनस्वाभाव्यम् ।
३. T. दर्शनं ।
४. T. खरादिवत् ।
५. T. न तद्रूपवत् । कुतस्तस्य दर्शनम् । तन्नास्तीति गतवन्न पश्यति ।
६. T. S. विज्ञानमवबोध ।
७. T. अदर्शनात्मकत्वात् ।
८. T. न तत्र शब्दोऽयं विद्यते ।
९. T. न तत्र गद्यांशो विद्यते ।
१०. T. S. रूपस्यादर्शनासम्भवात् ।
११. T. अभावात् ।

सम्प्राप्तो वा श्रूयेतासम्प्राप्तो[1] वा। यदि तावत्सम्प्राप्तः श्रूयते स श्रवणदेशं व्रजच्छब्दं कुर्वाणो व्रजति[2] निःशब्दो वा। तत्र यदि पूर्वः कल्पस्तदा—

* न वक्ता जायते केन शब्दो याति ब्रुवन् यदि।
अथ यात्यब्रुवंस्तस्मिन् प्रत्ययः केन जायते ॥१८॥

§ ४२. ततश्च वक्तृत्वाद्देवदत्तवच्छब्दोऽ[3]सौ न भवति। अथाब्रुवन् याति तदा तस्मिञ्छब्दे निःशब्दे व्रजति शब्दोऽयमिति कस्यावसायो भवेत्। न चागृहीतस्यास्यस्तित्वमिति न युक्तमेतत् ॥१८॥

३१९

§ ४३. किञ्चान्यत्—

प्राप्तश्चेद्गृह्यते शब्दः तस्यादिः केन गृह्यते।
न चैति केवलः शब्दो गृह्यते केवलः कथम् ॥१९॥

§ ४४. यदि श्रोत्रेन्द्रियस्थानं प्राप्तः शब्दो गृह्यते [4]तस्यादिः केन गृह्यते। प्राप्तग्राहित्वाच्छ्रोत्रस्य शब्दस्यादे र्ग्रहणं नास्ति। न चान्यदिन्द्रियं तस्य ग्राहकं सम्भवतीति [5]नैव केनचिदस्यादि र्गृह्यते। त[6]तश्चागृह्यमाणत्वाच्छब्द एवासौ न[6] भवतीत्यभिप्रायः। नवद्रव्यकत्वाच्च[7] [8]परमाणोर् "न चैति केवलः शब्दः"

भवता च शब्दमात्रमेव श्रोत्रेण गृह्यते न गन्धादय इति न युज्यते। यद्वा[9] शब्दस्याग्रहणमस्तु। यद्वा गन्धादयोऽपि गृह्यन्ताम्। न चैतदेवमिति न प्राप्तविषयत्वं शब्दस्य ॥१९॥

३२०

§ ४५. अथ यदेतदुक्तं

प्राप्तश्चेद्गृह्यते शब्दस्तस्यादिः केन गृह्यते। इति। यदि तस्यादि र्न गृहीतस्तदा को दोष इति। अयं दोषो यदस्य शब्दत्वमेव विशीर्यते। तथा हि—

यावन्न श्रूयते शब्दस्तावच्छब्दो न जायते।
अशब्दस्यापि शब्दत्वमन्ते तच्च न युज्यते ॥२०॥

---

१. T. श्रूयेत्।
२. T. व्रजन्।
३. T. शब्दो।
४. T. S. न स्वीकरोति।
५. T. भवतीति।
६. T. ततश्चाग्रहीतोऽसौ शब्द एव न।
७. T. एवं नवद्रव्यात्मकत्वात्।
८. S. शब्दपरमाणोर।
९. T. एकधा श्रोत्रेण शब्दस्याग्रहणमस्तु।

§ ४६. यो न श्रूयते सोऽश्रूयमाण त्वाद्गन्धादिवच्छब्द एव न भवति। अथ मन्यसे यदा श्रूयते तदा शब्दो भविष्यतीति एतदप्यसम्भाव्यम्। न हि गन्धादेः पश्चाच्छब्दत्वं दृष्टम्। तद्वदेवास्याप्यशब्दस्य[1] पश्चाच्छब्दत्वमयुक्तमति ॥२०॥

३२१

§ ४७. एवं तावदिन्द्रियाणां विषयग्रहणासामर्थ्यमुद्भाव्य मनसोऽपि विषयग्रहणासामर्थ्य मुद्भावयन्नाह—

*** वियुक्तमिन्द्रियैश्चित्तं किं गत्वापि करिष्यति।**
**एवं सतीह जीवोऽयमनस्कः सदा न किम् ॥२१॥**

§ ४८. यदि चित्तं विषयदेशं गत्वा विषय परिच्छिनत्तीति कल्पयते तदयुक्तम्। इहेदं चित्तमिन्द्रियसहितं वा विषयदेशं गच्छेत्केवलं वा। न तावदिन्द्रियसहितं याति। इन्द्रियाणा देव एव सदा सन्निधानात्। गमने च सति देहस्य निरिन्द्रियत्वप्रसङ्गात्। अथ केवलं गच्छति तदापि

वियुक्तमिन्द्रियैश्चित्तं किं गत्वापि करिष्यति।

§ ४९. न हि चक्षुरादीन्द्रियद्वारतिरस्कृतस्यास्य रूपादिदर्शनसामर्थ्यमस्ति। अन्धादीनामपि दर्शनादिसद्भावप्रसङ्गात्। अथापि कथञ्चिद्विषयदेशगमनेनार्थोपलब्धिरस्य परिकल्प्यते। तदाप्यथबाधापर्यवसानत्वादनिवृत्तिः।[2]

एव सतीह जीवोऽयममनस्कः सदा न किम्। अचिन्तक एवात्मा सर्वकालं प्राप्नोति। न चाचिन्तकस्यात्मत्वं[3] सम्भावयितुं युक्तम्। स्तम्भादीनामप्यात्मत्वप्रसङ्गात्[4]।

§ ५०. तदेव युक्त्या विचार्यमाणानामिन्द्रिय [विषयविज्ञानानां सद्रूपा][5] सम्भवात्[6] स्वरूपसिद्धिरसती। यदि ह्येषां स्वरूपसिद्धिः स्यात्तदोपपत्त्या विचार्यमाणा यथास्थितेन स्वरूपेण स्फुटतरमुपलभ्येरन्। न चोपलभ्यन्ते। तस्मात्स्वरूपशून्या इति सिद्धम् ॥२१॥

---

१. S. शब्दस्य।
२. T. S. तदाप्यपर्यवसानत्वादर्थबोधस्याविवृत्तौ सत्याम्।
३. T. S. अचिन्तात्मकत्वम्।
४. T. S. स्तम्भादिवदचिन्तकत्वात्।
५. T. S. विच्छेदो वर्तते।
६. T. अभावात्।

३२२

§ ५१. [1]यदि तह्येषां स्वभावो नाम नास्ति[2] तत्कथमेषां[3] विशेषपरिच्छेदात्मिका संज्ञा [4]विशेषव्यवस्थाहेतुत्वेनोपदिश्यते । उच्यते । सत्सु पदार्थेसु तद्विषयपरिच्छेदात्मिका संज्ञा स्यात्[5] । यदा[6] तेषां पदार्थानामसत्वं प्रतिपाद्यते तदा तद्द्वारा कुतः][7] स्वरूपसिद्धिः स्यात् । किं खल्वेष विषयपरिच्छेदः सर्वथा नास्ति । न नास्तीति । निःस्वभा[8]वस्य भावस्य विद्यमानत्वात् । तथा हि—

**मनसा गृह्यते योऽर्थः पूर्वदृष्टो मरीचिवत् ।**
**सर्वधर्म व्यवस्थासु स संज्ञास्कन्धसंज्ञकः ॥२२॥**

§ ५२. इह चक्षुः प्रतीत्य रूपञ्च चक्षुर्विज्ञानमुत्पद्य निरुध्यमानं सहेन्द्रियविषयै निरुध्यते । तस्मिन्निरुद्धे पूर्वदृष्टो[9] योऽर्थः स एव पश्चान्मनसा गृह्यते । कथं पुनरसन्निहितस्य ग्रहणं सम्भाव्यत इत्याह [ मरीचिवदिति । यद्यपि नाल्पमात्रमपि मरी ][10] चिकायां जलमस्ति अपि च हेतुप्रत्ययवशात् प्रवर्तत एव जलाकर संज्ञा एवमविद्यमानं स्वरूपेऽपि पूर्वगृहीतेऽर्थे[11] मरीच्यामिव यद्[12] विज्ञानमुत्पद्यते तत्सर्वधर्मव्यवस्थाकारणम् । सर्वधर्मव्यवस्थाकारणत्वाच्च स एव संज्ञास्कंध इत्युक्तस्तथाविधसंज्ञाविशेषसम्प्रयोगात् । संज्ञावशेन च सर्वधर्मव्यवस्था विज्ञातव्या न पुनः पदार्थस्वरूपनिबन्धना स्वभावस्य सर्वथायुज्यमानत्वात् ॥२२॥

३२३

§ ५३. यद्येवमस्ति स्वभावतः संज्ञास्कन्धः । न हि तस्मिन्नसति[13] सर्वधर्मव्यवस्था शक्या कर्तुमिति । उच्यते । सापि हि संज्ञा विज्ञानसम्प्रयुक्तत्वाद् विज्ञानव्यतिरेकेण सती । तदपि च विज्ञानं संज्ञाव्यतिरेकेणासिद्धत्वात् स्वरूपतो नास्ति । इतोऽपि नास्ति ।[14] यस्मात्—

*** चक्षुः प्रतीत्यरूपञ्च मायावज्जायते मनः ।**
**विद्यते यस्य सद्भावः सा मायेति न युज्यते ॥२३॥**

---

१. T. यदि एषां स्वभावो नास्ति ।
२. T.S. एषा ।
३. T. पदार्थविशेष···
४. T. युक्ता ।
५. T. S. न स्वीकरोति ।
६. T. S. तेषाञ्च ।
७. T. S. विच्छेदो वर्तते ।
८. T.S. स्वभावस्य ।
९.; T. पूर्ववद्दृष्टो ।
१०.; S. विच्छेदो वर्तते ।
११. T. गृहीतेऽर्थे ।
१२. S. यद्विकल्पकम् ।
१३. T. ततः
१४. T.; S.न स्वीकरोति ।

§ ५४. न हि तद्विज्ञान मुत्पादात्प्रागस्ति यदुत्पत्तिक्रियाश्रयत्वेन प्रवर्तेत । सत्स्वपि चक्षुरादिषु विज्ञानस्य स्वरूपासम्भवात्[१] । उत्पत्तिक्रियाया अप्रवृत्तेरुत्पादो न युज्यते । उत्पद्यते चैतद्विज्ञानमित्यतः किं निश्चेतुं पार्यतेऽन्यत्र मायाधर्मतायाः । उक्तं हि[२] भगवता—

§ ५५. तद्यथा भिक्षवो मायाकारो वा मायाकारेन्तेवासी [वा] चतुर्महापथे विविधं मायाकर्म विदर्शयेत् । तद्यथा हस्तिकायमश्वकायं[३] रथकायं पत्तिकायं च[४] । तं चक्षुष्मान् पुरुषः पश्येन्निध्यायेद्योनिशश्चोपपरीक्षेत् । तस्य तं पश्यतो निध्यायतो योनिशश्चोपपरीक्षमाणस्यासत्तो[५]ऽप्यस्य ख्यायाद्रिक्ततोऽपि तुच्छतोऽप्यसारतोऽपि । तत्कस्य हेतोः । किमस्मिन् मायाकृते सारमस्तीति । एवमेव भिक्षवो[६] यत्किञ्चि-द्विज्ञान[७]मतीतानागतप्रत्युत्पन्नमाध्यात्मिकं वा बाह्यं वौदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यद्वा दूरे यद्वात्यन्तिके तद्भिक्षुः पश्येन्निधायेद्योनिशश्चोपपरीक्षेत । [८]तत्पश्यतो निध्यायतो योनिशश्चोपपरीक्षमाणस्या सत्तोऽप्यस्य ख्यायाद्रिक्ततोऽपि तुच्छतोऽप्यसारतोऽपि रोगतोऽपि गण्डतो[९]ऽपि शल्यतोऽप्यघतोऽप्यनित्यतोऽपि दुःखतोऽपि शून्यतोऽप्यनात्मतोऽप्यस्य ख्यायात् । तत्कस्य हेतोः । किमस्मिन् विज्ञानस्कन्धे सारमस्तीति ।

§ ५६. यथोपलभ्यते विचार्यमाणस्य तथा स्वरूपासम्भवा[१०]न्मायायुवति[११] प्रख्यं विज्ञानमिति शक्यमवसातुम् । ततश्च सूक्तमेव तत्

चक्षुः प्रतीत्य रूपञ्च मायावज्जायते मनः । इति यदि पुनरस्य स्वरूपं स्यात्तदा स्वरूपतो—

विद्यते यस्य सद्भावः सा मायेति न युज्यते ॥

न हि[१२] लोके स्वभावादशून्या सद्भूता[१३] स्त्री मायेति युज्यते । एवं विज्ञानमपि

---

१. T. अभावात् ।
२. T. उक्तं हि विस्तरशः ।
३. ; S. हस्तिकायं ।
४. S. न स्वीकरोति, T. चेति बहु(?) शतं जायते ।
५. T.; S. असतः
६. T.; S. न स्वीकरोति ।
७. T. यत्किञ्चिद्विज्ञानमुचितं ।
८. T. न स्वीकरोति ।
९. Mvt. ( Chinese-Sanskrit-Tibeton Vocabulary) ९४८७ ।
१०. T. अभावात् ।
११. Mv. पृ० ४६ ।
१२. T. न हि पूर्ववत् ।
१३. T.; S. शून्या सम्भूता ।

स्वरूपतो विद्यमानत्वान्मायोपमं न स्यात् उपदिश्यते च मायोपमं विज्ञानम्। अतो निःस्वभावं विज्ञानं यदा च निःस्वभावं विज्ञानं तदा निःस्वभावविज्ञान-सम्प्रयुक्तासंज्ञा निःस्वभावेति स्थितम् ॥२३॥

३२४

§ ५७. अत्राह। आश्चर्यमेतत्। न चेन्द्रियाणां कथमपि विषयग्रहणं सम्भाव्यते उत्पद्यते [च] चक्षुः प्रतीत्य रूपाणि च विज्ञानमिति। उच्यते। किमेतदेवाश्चर्यं त्वया[1]इदम् इदं किं नाश्चर्यं यन्न निरुद्धान्नानिरुद्धाद्[2]बीजाद ङ्कुरोदयो युज्यते। उत्पद्यतेच बीजं प्रतीत्याङ्कुरः। तथा कृतस्योपचितस्य कर्मणो निरुद्धस्य न क्वचिदवस्थानं सम्भवति[3]। [4]कल्पशतसहस्रान्तरितनिरोधादपि कर्मणः साक्षा[5]दुत्पद्यत एव फलम्। घटादयश्च स्वकारणात् तत्त्वान्यत्वेन विचार्यमाणा न सम्भवन्ति[6]। तथाप्युपादाय प्रज्ञप्त्या मधूदकादीनां[7] सन्धारणाहरणादि क्रियानिष्पादनयोग्या[8] भवन्ति। तदेवम्—।

यदा न किञ्चिदाश्चर्यं[9] विदुषां विद्यते भुवि।
इंद्रियाणां गतावेवं तदा को नाम विस्मयः ॥२४॥

§ ५८. कार्यं हि स्वकारणमनुविदधद्दृश्यते। यथा[9] गोर्गौरश्वादश्वः शालेः शालिरित्यादि[10]। भूतानां रूपशब्दादीनां च विधिरेष न दृश्यते[11] तथा हि। कायेन्द्रियग्राह्यत्वान्महाभूतान्य[12]श्रावणानि। ते तेभ्यश्चाक्षुषं रूपं श्रावणः शब्द उत्पद्यत इति। परमेतदाश्चर्यम्। एवं घ्राणादिविषये चक्षुरादिषु च योज्यम्।

---

१. T. न स्वीकरोति।
२. T. अनिरुद्धद्यमानाद्।
३. T. कृतमुपचितं कर्म निरुद्ध्यातिचिर प्राप्तं न क्वचिदवतिष्ठते।
४. T. किन्तु अनेककल्पशतसहस्रा।
५. T. वस्तुतः।
६. T. विविधं विचार्यमाणा न भवन्ति।
७. T. मधूदकदुग्धानां।
८. T. सन्धारणाहरणादिक्रियायोग्या।
९. T. S. न स्वीकरोति।
१०. T. S. शालिरित्यादीनां।
११. T. युज्यते।
१२. S. अचक्षुषानि अश्रावणानि।

अथवा नैवेयमिन्द्रियाणामर्थगतिर्विस्मयकारणम् । यदि हीन्द्रियाणामेव केवल-मर्थगतावेतद्वैचित्र्यं स्यात्तदैतद्विस्मयस्थानम् । यदा तु सर्वमेव यथोदितेन न्यायेन जगद्विदुषां विस्मयकरमिन्द्रजालमिव तदा नेदमाश्चर्यम् । प्रवेशवृत्ति हि किञ्चिद-सम्भावनीयमुपलभ्यमानं विस्मयकरं जायते न सर्वत्रैव तुल्यरूपम् । न ह्यग्ने-रौष्ण्यं विस्मयायेति ॥२४॥

३२५

§ ५९. अतएवानियतस्वरूपत्वाद्यथाप्रत्ययं तथा तथा विपरिवर्तमान-त्वाद्विदुषाम्— ।

**अलातचक्रनिर्माण स्वप्नमायाम्बुचन्द्रकैः ।**
**धूमिकान्तः प्रतिश्रुत्कामरीच्यभ्रैः समोभवः ॥२५॥**

**योगाचारे चतुःशतक इन्द्रियार्थभावनासन्दर्शनं**
**नाम त्रयोदश प्रकरणम् ॥१३॥**

§ ६० यथा मज्वलन[१]स्येन्धनस्याशुभ्राम्यमाणस्य तद्गतदर्शनविपर्यासनि-बन्धनत्वाच्चक्राकारोपलब्धिर्भवति । न च तत्रास्ति चक्रस्वरूपलेशोऽपि । यथा च [[२]निर्मिता: समाधिप्रत्ययवसम्भूता: स्त्रिय: सद्भूता: स्त्रिय इव कामिनां संक्लेश-हेतु र्भवन्ति । मुनिभिर्निमाणसमाधिवलेना निर्मितमुनिस्वरूपा: सद्भूतमुनिस्वभाव रहिता [अपि] सद्भूता मुनय इव मत्वानामशेष जन्ममनोऽन्धकारोन्मूलनेन स्वर्गापवर्गमार्गहेतुर्भवन्ति । ][२] ते तु चित्तचैत्तेन्द्रिय[३]रहितत्वान्न सद्भूता:[४] । यथा च निद्रा[५] सम्प्रयुक्तविज्ञानसमायुक्तात्म भावप्रत्यय: स्वप्नात्मभावो जाग्रदात्म-भाव इवात्मनि। स्नेहविपर्यासनिबन्धन: । स चासद्भूत: प्रबुद्धस्य तथा दर्शनाभावात् । यथा च मायाकारयन्त्रनिबन्धना मायाकृतयुवतयस्तत्स्वरूपानभिज्ञानां चित्तमोहन-परा एव सद्भूतस्त्रीशून्या जायन्ते । यथा च जलचन्द्र: सद्भूतचन्द्रशून्य: प्रतीत्य समुत्पादबलात्तथोत्पद्यमानश्चन्द्र विपर्यासनिबन्धनो भवति बालानाम् । यथा च प्रतीत्यसमुत्पादबलादेव तथाविधकालादेश निमित्तानि प्रतीत्य धूमिका जाता

---

१. T. S. मजलस्य ।

२. T. S. निर्माणानिसमाधिविशेषप्रत्ययसमुद्भूतानि विचित्रक्रियाविशेषनि-स्पादनात् सद्भूतयोगिसंज्ञादर्शनमनो विपर्यासादुत्पादयन्ति ।

३. T. चित्तचैत्तरहितत्वान्न ।

४. S. सद्भूता: योगिनां ।

५. S. सिद्धा ।

विदूरस्थानां सद्भूत धूमविपर्यासनिबन्धना भवति । यथा च गिरिगह्वरकन्दरा[1]दीना[2]मन्तः प्रतिश्रुत्वा प्रतीत्य[3] जायमाना सद्भूतशब्दाभिमानं जनयति जनानाम्[4] ।

यथा च मरीचिका देशकालविशेषसन्निहितादित्य रश्मिप्रत्यया जलस्वरूपविविक्ता विदूरस्थानां जलविपर्यासं जनयति । यथा चाभ्राणि विदूरतः पर्वताद्याकारं विपर्यासमुपजनयन्ति । एवमविदुषां यथावत्प्रतीत्य समुत्पाद स्वभावा कुशलानामविद्याविपर्यासक्षिप्तकर्म प्रत्ययो विज्ञानादि जन्म संसारः[5] सह बाह्येन भाजनेन[6] [जायमानोऽलातचक्रादि[7]व[8]]न्मृषामोषधर्मकः स्वभावशून्य एव सन् बालजनविसंवादकः प्रतिभाति । विदितधर्मस्वभावाश्च सर्वत्रैव सङ्गपरि [क्षयाद्विमुक्तिमाश्रिता] भवन्तीति स्थितमेतदलात चक्रादिवन्निःस्वभावः संसार इति ॥२५॥

---

१. T. कन्दरदरी ।

२. T. (वातगम्भीराणां ?) गिरिगह्वर ।

३. T. न स्वीकरोति ।

४. T. अविद्वषां ।

५. T. S. जन्मसागरः ।

६ T. S. स बाह्येन ।

७. T. S. विच्छेदोऽत्र वर्तते ।

८. MV. पृ० १७३. ५५२ ।

(i) मायामरीचिस्वप्नोदकचन्द्रप्रतिश्रुतकाप्रतिभसोपमासर्वधर्मन्याव-तीर्णः । LV, १०. पृ० १८१ ।

(ii) प्रतिभासबिम्बमाया भ्रमरिच्या सुपियेन तु ।
अलातचक्रगन्धर्वप्रतिश्रुतकासमोद्भवः ॥ L.A ६, १७३

(iii) गन्धर्वनगरस्वप्नमायानिर्माणसादृशाः LA. १०.१४४
MV. पृ० ३३४

## चतुर्दशं प्रकरणम्

### अन्तग्राह प्रतिषेधभावनासन्दर्शनम्

३२६

§ १. अत्राह। यदि प्रतीत्य समुत्पन्नत्वादलातचक्रादिवन्निः[1] स्वभावो भवः कस्य तर्हीदानीं[2] स्वभावोऽस्तु। न कस्यचित्पदार्थस्य स्वभावः शक्यः परिकल्पयितुम्। तथाविधस्य पदार्थस्य सर्वथानुपलभ्यमानत्वात् तथाहि—

* आयत्तं यस्य भावस्य भवेन्नान्यत्र कुत्रचित्।
सिध्येत्तस्यास्तिता नाम क्वचित्स च न विद्यते ॥१॥

§ २. यदि हि कस्यचित्पदार्थस्य निष्पत्तौ क्वचित् किञ्चिदायत्त न स्यात्त-दास्यापरायत्तस्य[3] स्वतन्त्रस्य स्वत एव व्यवस्थित्वात्स्वभावतोऽस्तित्वं कल्पयितुं युक्तम्। न त्वेष सम्भवोऽस्ति यद्धेतुप्रत्ययजन्मनां परायत्तता न स्यात्। अहेतुको वा पदार्थ कश्चित्सम्भवेत् इति। यतश्चैवं निर्हेतु [त्व] प्रसङ्गात् कस्यचित् पदार्थस्य क्वचित्स्वरूपं नास्तितस्मान्नास्ति कस्यचित्स्वभावः स्वभावाच्चालात-चक्रा[4]दिवन्नास्ति स्वभावसिद्धिरिति स्थितम् ॥१॥

३२७

§ ३. यदि चामी पदार्था अलातचक्रा[5]दिवत् विसंवादका[6] इत्यवस्तुका न स्युस्तदा नियतमुपपत्त्या विचार्यमाणा जातरूपादिवत्स्पष्टतरमुपलभ्यमानस्वरूपाः स्युः। न चैते विचाराग्निसंतापिता विपर्यास[7]निबन्धनत्वात्। स्वरूपाभावं नासादयन्ति। न हि वस्तूपत्तिरहितं[8] युज्यते[9]। सर्वथातस्य विसंवादकत्वात्[10]।

---

१. T. अलालचक्रनिर्माणस्वप्नादिवत्।
२. T. तर्हि।
३. T. अपरायत्तस्य भावस्य।
४. T.; S. चक्रवत्।
५. T. अलातचक्रनिर्माणादिवत्।
६. T.; S. वैसम्वादका विसम्वादकत्वादवस्तुका।
७. T. विपर्यासमात्रनिबन्धनत्वात्।
८. T.; S. वस्तूपपत्त्यापि।
९. T.; न स्वीकरोति।
१०. अविसम्वादकत्वात्।

अतएवाचार्यो वस्तुभिनिवेशशिथिलीकरणायातः परं यथा च घटादीनां स्वरूपं न सम्भवति तथोपपत्तिमाह—।

*** रूपमेव घटो नैक्यं घटो नान्योऽस्तिरूपवान्।**
**न विद्यते घटे रूपं न रूपे विद्यते घटः ॥ २ ॥**

§ ४. इह यदि घटो नाम कश्चित्पदार्थः स्यात्स दर्शनेन्द्रियग्राह्यत्वाद्रूपादभेदेन वा परिकल्पतोभेदेनवा। तत्र तावद्

रूपमेव घटो नैक्यम्

न यदेव रूपं स एव घट इति रूपघटयोरेक्यं न भवति[1]। यदि हि रूपघटयोरैक्यं स्यात्तदा यत्र यत्र रूपं तत्र तत्र [घट २][2]ति सर्वत्रैव रूपे घटः स्यात्। पाकजगुणोत्पत्तौ रूपविनाशे घटविनाशः स्यात्। न चैतत् सम्भवतीति रूपमेव घट इति नास्त्येकत्वम्। अथैतद्दोषपरिजिहीर्षया रूपादन्यो घटो रूपवान् परिकल्प्येत तद्यथार्थान्तरभूतैर्गोभिर्गोमान् देवदत्त इति। एतदप्ययुक्तम्। यस्माद्[3]

घटो नान्योऽस्ति रूपवान्

§ ५. यदि रूपादन्यो घट स्यात्स[4] भूपनिरपेक्षो गृह्येत। न हि गोभ्यो व्यतिरिक्तो देवदत्तो गोव्यतिरेकेण न गृह्यते। तद्वद्घटोऽपि रूपनिरपेक्षो गृह्येत। न च गृह्यत इत्यतो रूपव्यतिरिक्तो घटो नास्ति। यदा च नास्ति कथमविद्यमान[5] स्तद्वत्तया गृह्यते। न ह्यविद्यमानो वन्ध्यातनयो गोमानिति व्यपदिश्यते। एवं रूपवान घट इत्यपि न युज्यते। अन्यत्वासम्भावादेव च रूपघटयोराधाराधेयकल्पनाया अपि नास्ति सिद्धिरिति।

§ ६. न विद्यते घटे रूपं न रूपे विद्यते घटः॥ रूपघटयोरन्यत्वे सति घटे रूपमिति स्यात्कुण्ड इव दधि[6]। रूपेऽपि घट इति स्यात्कट इव देवदत्तः। न चैतत्सम्भवतीति नास्ति घट स्वभावतः। यस्य च नास्ति स्वभाव उपलभ्यते च तदलातचक्रादिवत्स्वभावशून्यम्। यथा च घटः स्वभावतो नास्ति तथा सर्वभावा अपि स्वाभावतो मृग्यमाणा न सन्तीति सिद्धा भवत्यलातचक्रा[7]दिप्रख्यता भवस्य ॥२॥

---

१. T. सम्भवति।
२. S.;T.।
३. T. तथाहि।
४. T.;S. स्वरूप···।
५. T.;S. असम्विद्यमान।
६. T. कुण्डे कुण्डदधिवत्।
७. T. चक्रनिर्माणादि।

§ ७. अत्राहुरेके । यद्यपि रूपघटयो [ रन्यत्वं न सम्भवति तथापि भावघ][1] टयोरन्यत्वमस्ति । यस्मादन्य एव घटोऽस्माक[2]मन्यैव[3] च सत्ता । सत्ता हि नाम महासामान्य[4] घटश्च विशेषः । द्रव्यं[5] सत्तायोगात्सदिति व्यपदिश्य इति ।

तान् प्रत्युच्यते—

**वैलक्षण्यं द्वयोर्दृष्ट्वा भावादन्यो घटो यदि ।**
**न भावोऽपि घटादन्यो किमेवं न भविष्यति ॥३॥**

§ ८. घटादिद्रव्याणामनुप्रवृत्तिलक्षणत्वात्सामान्यं भावः । व्यावृत्तलक्षणत्वाच्च घटो विशेषलक्षण इति । यदि तयो वैलक्षण्यं भावघटयोर्दृष्ट्वा भावादन्यो घटो भवत्येवमेव वैलक्षण्याद्भावोऽपि किमर्थं घटादन्यो[6] न भविष्यति । ततश्चान्य बुद्धिध्वनि प्रवृत्ति[7]निमित्तमन्यत्वम परमनुप्रवृत्तिलक्षणं न कल्पयितव्यम् वैलक्षण्यादेवान्यबुद्धिध्वनिप्रवृत्ति सिद्धेः । कल्प्यते चापरमन्यत्व[8]मिति । नास्ति तर्हि[9] भावघटयोर्वैलक्षण्यापेक्षमन्यत्वम् । ततश्च यदुक्तं[10] ।

वैलक्षण्यं द्वयो दृष्ट्वा भावादन्यो घट

§ ९. इति तन्न । यथा च भावोऽनुप्रवृत्तिलक्षणत्वाद्घटादन्यत्स्यात् । न च तस्यान्यत्वस्यापरमन्यध्वनिप्रवृत्ति निमित्तमस्ति । यदि तदन्यत्वानामपर्यवमान दोषः स्यात् । अथ विनैवान्यत्वेनान्यबुद्धिरन्यत्वे भवति । तद्वदेवान्यत्रापि सम्भाव्यतामित्यलमन्यत्वेनाकिञ्चित् करेण कल्पितेन । असति चान्यत्वे नास्ति कुतश्चित् कस्यचिदन्यत्वमिति सिद्धम् । अपि चेदं चिन्त्यते । किम्भूतायाः

---

१. ।
२. अस्माकं दर्शने ।
३. T.; S. अन्यथैव ।
४. न्यावेश-हरिभद्रवृत्ति ( Gos), पृ०२९—तत्र परं सत्ता भावो महासत्ते ति चोच्यते । परसामान्यमित्यर्थः प्रशस्तपादभाष्य-न्यायकन्दली, पृ०३११, ३१३.
५. T. *तस्य द्रव्यं;* घटश्च विशेषो द्रव्यं । *तस्य सत्तायोगात्* ।
६. T. S. वैलक्ष्याद्घटादपि किमर्थं भावोऽन्यो ।
७. T. अन्यबुद्धिध्वनिमित्तं ।
८. T. अन्यत्वम् ।
९. T. अन्यत्वमिति नास्ति । तर्हिभावा···T.···अन्यत्वमथभावघटयोरन्यत्वं नास्ति । ततः···।
१०. T. विचार्यमाणे ।

सत्ताया अन्यत्वेन योगोऽस्तु ।[1] किमन्यभूताया अनन्यभूताया वा यद्यन्यभूताया-स्तदा व्यर्थोऽन्यत्वेन योगः । अथानन्यभूतायाः । एवमपि विरुद्धेनान्यत्वेन योगादन्यत्वेन योगो न प्राप्नोति । अन्यत्वाभावाच्च घटादन्यो भाव इति न युज्यते । ततश्च लोके विपर्यासं प्रमाणीकृत्य घटस्वरूपमेव सद्बुद्धिध्वनिप्रवृत्ति-निमित्तत्वाद्भाव इति व्यवस्थाप्यते । तस्य च रूपादिचतुर्धा विचार्यमाणस्य[2] नास्ति स्वभाव इति तत्त्वविदपेक्षयालातचक्रादिवत्स्वभावशून्यो घट इति सिद्धम् ॥३॥

३२६

§ १०. अत्राह । विद्यत एव घटो गुणाश्रयत्वात् । न ह्यसन् गुणाश्रयो दृष्टः । भवति च गुणाश्रयो घटः । एको घटो द्वौ घटाविति । एकत्वादयो गुणपदार्थ संगृहीता घटश्च[3] द्रव्यम् । द्रव्याश्रियत्वं च गुणानां सम्भवतीति । अतो गुणाश्रय-त्वादस्त्येव घट इति । अत्रोच्यते । त्वन्मतेन ।

**एको यदि घटो नेष्टो घटोऽप्येको न जायते ।**
**न चायं समयोर्योगस्तेनाप्येको न जायते ॥४॥**

§ ११. पदार्थ भेदाद्यद्येको घटो न भवतीति मन्यसे घटोऽपि तर्ह्येको न भवति । यथैकत्वमे[4]कसंख्या घटो न भवत्येवं द्रव्यत्वेनैकसंख्यायाः पृथग्भूतत्वाद्घटो ऽप्येको न भवति । द्वित्वा[5]दिति भावः । अपि चास्य[6] घटस्यैकरूपस्य वैकसंख्या[7] परिकल्प्यते[8]ऽनेकरूपस्य वा । यद्येकरूपस्य तदा व्यर्थैवैकत्वकल्पना । अथानेक-रूपस्य तदापि विरुद्धत्वादयुक्तैव । तस्माल्लोके घटस्वरूपस्यैवासन्निहितार्थान्तर-स्यैक [त्व] कल्पना विज्ञेया । अथ द्रव्याश्रियिणो गुणा इति कृत्वैकत्वयोगाद्घट एवको भवति न त्वेकत्वं घटो[9] भवतीति । अत्रोच्यते

§ १२. न चायं समयो र्योगस्तेनाप्येको न जायते ॥ [10]योगो नाम समयोरेव

---

१. T. न स्वीकरोति ।
२. T. घटश्च ।
३. T.; S. घटाश्च ।
४. T. यथैकत्वमिदमेकसंख्या ।
५. T. दित्वादिवत ।
६. T. अपि चास्य ।
७. T. चैकसंख्या ।
८. T. परिकल्प्ये वानेक ।
९. T. S. व्यर्थं ।
१०. T. योगो नाम समयोरेव न विषमयोः । यथा योगो दिष्ट इत्युभयोरपि भ्रात्रो र्भ्रातृत्वसम्बन्ध इति न किञ्चिदनुचितमिव । एकवटी तु न सम्भौ

न विषमयोः । तत्रैक गुणो दृष्टो घटः[1] । द्रव्यगुणयोश्च समता यस्मान्न भवति तस्मात्तयो र्योग एव न भवति । योगाभावात् तत्र यदिष्टमेकत्व योगाद्घट एकीको भवतीति तन्न । यदि चात्र योगो दृष्टस्तदैकेनापि घटस्य योगः स्याद्घटेनाप्येकस्य[2] । स च नैनं सम्भवतीति[3] योग एवानयो र्नोपपद्यते[4] । योगाभावाच्च[5] नैवैको घटो भवतीति न घटोऽप्येक इति । तदत्र पूर्वार्द्धेन कारिकाया योगमभ्युपेत्य दूषणमुक्तम् । उत्तरार्द्धेन तु योगसम्भवे दूषणमुक्तम् । अपिशब्दश्च दूषणकारणसमुच्चयार्थो द्रष्टव्यः ॥४॥

**३३०**

§ १३. अपि चेदमयुक्ततरं परसमये दृश्यते यद्द्रव्याश्रयिणो गुणा व्यवस्थाप्यन्ते न गुणाश्रयिणो विशेषगुणाः । युज्यते च गुणानामपि गुणाश्रयित्वम् । इह यत्परिणामो घटस्तदाश्रयिणापि[6] रूपेण तावतैव भवितव्यम् । ततश्च द्रव्यवद्रूपस्यापि महत्वं प्राप्नोतीति ।

*** यावद्द्रव्यं यदा रूपं तदा रूपं महन्न किम् ।**
**समयो जायते बाध्यः प्रतिपाद्यपरो[7] यदि ॥५॥**

§ १४. यदा यावद्द्रव्यं यावान् द्रव्यस्यायामविस्तारात्मकः सन्निवेशस्तावद्रूपं रूपस्यापि तावानेवायामविस्तारात्मकः सन्निवेश इति परेणाभ्युपगम्यते[8] तदा नियतमणुमहति द्रव्ये रूपेणापि तत्राणुमहता भवितव्यम् । तत्किं नु[9] खल्वत्र कारणं यद्द्रव्यवद्रू[10]पस्याणुमहत्त्वे नेष्येते । अथ स्याद्रूपं गुणोऽणुत्वं महत्त्वमपि च गुण एव । न च गुणे गुणस्य सन्निवेशो भवतीति समय एषोऽस्माकम् । ततश्च यद्यपि यावद्द्रव्य रूपमपि तावदेव तथापि सिद्धान्तविरोधभयाद्रूपस्याणुत्वमहत्त्वे न स्त इति । उच्यते ।

---

घट एवैकत्वयोगादेकत्वे च घटायोगात् । गुणा द्रव्याश्रयिणीत्यभ्युपगमात् ।

१. T.; S. घटश्च द्रव्यम् ।
२. T. तदा घटस्यापि ऐकेन योगो स्पर्शस्याप्यनेकेनयोगः स्यात् ।
३. T.; S. भवतीति ।
४. T. न भवतीति ।
५. T. न स्वीकरोति ।
६. T. न तत्र शब्दोऽयं वर्तते ।
७. T. 'अपरो' इत्यस्य तात्पर्यो "न परः" ।
८. T. सा-अभ्युपगमकाले ।
९. T. न ।
१०. T.; S. द्रव्यरूपस्य ।

§ १५. समर्थो बाध्यते बाध्यः प्रतिवाद्यपरो यदि ॥ यदि हि तव स्वयूथ्य एव प्रतिवादी स्यात्तं निवर्तयितुं युक्तं तव सिद्धान्ताभिधानम् । तस्य तं बाधितुं सामर्थ्यात्[1] । यदा तु प्रतिवादी परस्तं प्रति सिद्धान्तविरोधोद्भावनमकिञ्चित्करं सिद्धान्तनिराकरणप्रवृत्तत्वा[2]त्तस्य युक्तिलोकविरोधोद्भावनं तु तं प्रति न्यायस्त-द्वारेण तस्य निवर्तयितुं शक्यत्वात् । तस्मादपरिहार एवायं यदिदमागमविरोधो-द्भावनमिति स एवाविचलो दोष इति नास्ति भावघटयोरन्यत्वम् । तदत्र सत्तान्यत्व प्रतिषेधनान्येषामपि घटत्वादीनां सामान्यविशेषाणां प्रतिषेधो विज्ञेयः संख्यावत्सामान्यगुणानां[3] महत्ववद्विशेषगुणानामिति ॥५॥

२२१

§ १६. अत्राह । उक्तो भावस्य [4]घटादिभ्योऽन्यत्वप्रतिषेधः । घटस्य तु स्वभावाप्रतिषेधादस्त्येव स्वरूपतो घटाख्यो भाव इति । अत्रोच्यते[5] ।

*** लक्षणेनापि लक्ष्यस्य यत्र सिद्धिर्न विद्यते ।**
**संख्यादिव्यतिरेकेण तत्र भावो न विद्यते ॥६॥**

§ १७. इह घटसत्वयो व्यावृत्त्यनुवृत्तिलक्षणं ब्रुवता घटस्य व्यावृत्तिलक्षणं व्यवस्थापितं परेण । तदमुना लक्षणेनापि लक्ष्यस्य नास्ति सिद्धिः । न हि व्यावृ-त्तिमात्रेण शक्यं वस्तुस्वरूपं निर्धारयितुं यल्लक्ष्यतया सेत्स्यति । एकस्तावद्गुण-त्वाद्घटो न भवति । अणुर्महदिति रूपादयश्च गुणत्वादेव घटाख्या न भवन्ति । [6]सत्तापि द्रव्यगुणकर्मसु[7] सामान्याद्घटो न भवति । तदयं संख्याणुमहद्रूपादिभ्यो व्यावर्तमान इत्थं स्वभाव इति न शक्यं व्यवस्थापयितुम् । तदेवं यत्र परवादिपक्षे लक्षणेनापि लक्ष्यस्य घटस्वरूपस्य नास्ति सिद्धिस्तत्र पक्षे संख्यादिव्यतिरेकेण सिद्धस्वरूपेण[8] घटाख्यो भावो न विद्यते । ततश्च स्वभावशून्यो घट इति सिद्धम् ।

§ १८. अथ वा[9] संख्यादयो घटस्य लक्षणम् । तैर्लक्ष्यमाणत्वाद्घटो लक्ष्यः । तस्य लक्षणेनापि [10]पृथक्स्वरूपसिद्धि[11] रशक्या[12] कर्त्तुम् । संख्यादिव्यतिरेकेण तत्स्वरूपस्यानुपलभ्यमानत्वात् । यदि हि तल्लक्ष्यं स्वरूपं लभते तदा नियतं

---

१. T.; S. तद्बाधितुमसामर्थ्यात् ।
२. T. चित्तवत् ।
३. T.; S. विशेषाणां
४. T. S. घटादिभ्यो ।
५. T. उच्यते ।
६. T. तत्सत्तापि ।
७. T. द्रव्यगुणकर्मणां ।
८. T. स्वरूपेण ।
९. T. एकधा ।
१०. T. न तत्र शब्दोऽयं वर्तते ।
११. T. स्वरूपसुसिद्धि ।
१२. T. नास्ति ।

संख्यादिव्यतिरेकेण गृह्येतेदं तत्संख्या[1]दिव्यतिरिक्तं घटस्वरूप[2]मिदं पुनरस्य संख्यादिकं[3] लक्षणमिति न चैतदेवमित्यतो

**लक्षणेनापि लक्ष्यस्य यत्र सिद्धिर्न विद्यते।**
**संख्यादिव्यतिरेकेण तत्र भावो न विद्यते॥**

इति नास्ति स्वभावतो घटः ॥६॥

३३२

§ १९. उक्तस्तावल्लक्ष्यलक्षणयोरन्यत्वप्रतिषेधः। येषां तु रूपादिभिर्घटस्यैक्यमिति सिद्धान्तस्तत्प्रतिषेधायेद मुच्यते—

*** घटस्य न भवेदैक्यमपृथक्त्वाद्धि लक्षणैः।**
**एकैकस्मिन् घटाभावे बहुत्वं नोपपद्यते॥७॥**

§ २०. रूपादीनि खलु नानालक्षणानि येषां तैरपृथक्त्वं[4] घटस्येष्टम्। तेषां[5] रूपादिभिर्लक्षणैरपृथक्त्वाद् घटस्यैक्यं नोपपद्यते। बहुभिरनन्यत्वात्। स्यात्त्वमतम्। यदि घटस्यैक्यं न भवति, हन्त बहुत्वं प्राप्तमिति। अत्रोच्यते। यस्माद्रूपादिष्वेकैकस्मिन् घटस्याभावो दृष्टस्तस्माद्बहुत्वमपि नास्तीति ॥७॥

३३३

§ २१. अत्राह। यदि रूपादिभिलक्षणैरपृथक्त्वाद्घटस्यैक्यं नास्ति तेषां परस्परसंयोगाद्घटस्यैक्यं भविष्यतीति। अत्रोच्यते—।

*** न ह्यस्पर्शवतो नाम योगः स्पर्शवता सह।**
**रूपादीनामतो योगः सर्वथापि न युज्यते॥८॥**

§ २२. तत्र स्पृष्टिः स्पर्शः कायेन्द्रियग्राह्यता। [7]स्पर्शोऽस्यास्तीति स्पर्शवत्। स्प्रष्टव्येन रूपरसगन्धानामस्पर्श[8]वतां योगः संयोगः संस्पर्शो न सम्भवति यथा घटस्याकाशेन। यत एतदेवं "रूपादीनामतो योगः" सर्व-

---

१. T.; S. तत्संख्या।
२. T. स्वरूपेण।
३. T. संख्यादिव्यतिरिक्तं।
४. T.; S. पृथक्त्वं।
५. T. तेषां दर्शने।
६. T.; S. अपृथक्त्वं
७. T. सोऽस्यास्तीति।
८. S. अस्पर्शवता।

प्रकारं न सम्भवति । यदा[1] च न सम्भवति तदान्योन्य संस्पर्शकृताद्रूपादीनां विशेषात्समुदायनिबन्धनो घट इति यदुक्तं तन्नयुक्तम् ॥८॥

३३४

§ २३. अथ विनाप्यन्योन्यसंस्पर्शेन तत्समुदाय एव घट इति स्यात् । एतदपि नास्ति । यस्मात्[2]

* घटस्यावयो रूपं तेन तावन्न तद्घटः ।
यस्मादवयवी नास्ति तेन नावयवोऽपि तत् ॥८॥

§ २४. रूपादिसमुदय घटस्य प्रत्येकं रूपादयोऽवयवभूतत्वाद् घटव्यपदेश-भाजो न भवन्ति । घटोऽवयवी अवयवाश्च रूपादयः इति रूपं तावदवयवत्वद्घटो न प्राप्नोति[3] । यथा च रूपमेवं गन्धादयो वाच्याः । ननु च रूपस्यावयवत्वादस्ति तद्व्यवयवी नाम कश्चित् । न ह्यवयविनिरपेक्षा अवयवा युज्यन्त इति । उच्यते । इह रूपादीनां प्रत्येकं घटत्वाभावे कुतः कश्चिदवयवी । न हि रूपादिव्य-तिरेकेणावयवी नाम परिच्छेत्तुं पार्यते । न चापरिच्छिद्यमानस्वरूपस्य सत्त्वम-वस्थातुं शक्यमित्यसन्नवयवी । यस्माच्चावयवी नास्ति तस्माद्रूपमवयवत्वेनापि न सम्भाव्यत इति न स्त एवावयवावयविनौ ॥९॥

३३५

§ २५. इतश्च रूपादिसमुदायो न घटः । यस्मात्—

* सर्वेषामपि रूपाणां रूपत्वमविलक्षणम् ।
एकस्य घटसद्भावो नान्येषां किं नु कारणम् ॥१०॥

§ २६. सर्वेषामपि रूपाणामिति रूपस्कन्धसंगृहीतत्वाद्रूपगन्धादयो रूपाणी-त्युच्यन्ते ।[4] तानि रूपाणि घट इव पटादिष्वपि सन्ति । न च तानि घटादिभेदेऽपि स्वलक्षणं व्यभिचरन्ति । सर्वत्रैव तुल्यलक्षणत्वात् । तत्र यथैकस्य रूपस्य घटत्वेनावस्थानं तथान्यस्यापि [5]पटादिसम्बन्धिनो रूपस्य कस्माद् घटत्वेनावस्थानं नेष्यते । युज्यते तु तस्यापि घटत्वेनावस्थानं लक्षणाभेदाद् घटावस्थितरूपादिवत्[6] । एवं त्वनभ्युपगमे कारणमेव[7] न सम्भवति । ततश्च सर्वेषामेव घटत्वं प्राप्नोति । यथा च घटादीनामभेदप्रसङ्ग एवं गन्धादीनामप्यभेद प्रसङ्गं[8] प्राप्नोति । एक-स्माद् घटादनन्यत्वात् ॥१०॥

---

१. T. यदैवं ।
२. T. सा० तथाहीत्यर्थः ।
३. T. भवति ।
४. T. न तत्र "उच्यन्ते" इति शब्दो विद्यते ।
५. T. कम्बलादि; S. घटादि ।
६. T. घटत्वावस्थितरूपादिवत् ।
७. T.;S. करणमेव ।
८. T.; S. अभेदः ।

३३६

§ २७. अथ मन्यसे यद्यपि घटादन्यत्वमेषां [नास्त्येव तथापि ][1] रूपस्य रसादिभ्यो भेदोऽस्ति । तस्मादभेदप्रसङ्गाभाव इति । एतदप्ययुक्तमिति प्रतिपादयन्नाह—

**रूपमन्यद्रसादिभ्यो न घटादिति ते मतम् ।**
**स्वयं यस्तैर्विना नास्ति स न्यासो रूपतः कथम् ॥११॥**

§ २८. यदि भिन्नेन्द्रियग्राह्यत्वाद्रसादिभ्यो रूपमन्यद्व्यवस्थाप्यते घटादपि तद्रूपमन्यदिति किं न व्यवस्थाप्यते । रूपादन्येभ्यो रसादिभ्यस्तस्या व्यतिरिक्त[2]त्वाद्रसादिस्वात्मवद्रूपादन्य एव प्राप्नोति । न चान्यत्वमिष्यत इत्ययुक्तमेतत् ॥११॥

३३७

§ २९. यदा चैवं रूपादीना घटकारणत्वं न सम्भवति तदा नियतम्—

**घटस्य कारणं नास्ति स्वयं कार्यं न जायते ।**
**रूपादिभ्यः पृथक्कश्चिद्घटस्तस्मान्न विद्यते ॥१२॥**

§ ३०. रूपादिभ्यतिरेण कार्यभूतस्य घटस्यानुपलभ्यमानत्वान्नास्ति रूपादिव्यतिरिक्तो घट इति सिद्धम् ॥१२॥

३३८

§ ३१. अथ मन्यसे नैव हि रूपाद्युपादानो घटः । किं तर्हि । स्वावयवानि कपालानि कारणान्यपेक्ष्य घटस्य कार्यत्वं कपालानां च कारणत्वमिति । एतदप्ययुक्तमित्युद्भावयन्नाह[3]—

**घटः कारणतः सिद्धः सिद्धं कारणमन्यतः ।**
**सिद्धिर्यस्य स्वतो नास्ति तदन्यज्जनयेत्कथम् ॥१३॥[4]**

§ ३२. यदि घटकारणानि कपालानि प्रतीत्य घटः सिध्यति ता[5]नीदानीं कपालानि किमपेक्ष्य सिध्यन्ति । न हि तावत्तानि स्वभावसिद्धानि निर्हेतुकत्वप्रसङ्गात् । अथ तेषामप्यन्यत्कारणमिष्यते । न तर्हि कपालानां स्वरूपसिद्धिरस्ति । तेषामपि कारणान्तरशर्करिकापेक्षत्वात् । येषां च कपालानां स्वतः

---

१. T.; P. न स्वीकरोति ।
२. T.; P. व्यतिरिक्तत्वात् ।
३. T. असारमित्याह ।
४. MV. पृ० २६ ।
५. T. तदा ।

सिद्धिर्नास्ति कथं तान्यन्यद् स्वरूपतः साधयिष्यन्तीत्यसन् घटः। योऽयं[1] घट प्रतिषेधक विधिरेव[2] एव सर्वकार्याणामसिद्धौ[3] योज्यः[4] ॥१३॥

३३९

§ ३३. अत्राह। समुदितानां रूपादीनां घटाभिधानान्न रूपादिबहुत्वेऽपि घटबहुत्वप्रसङ्ग इति। तदप्ययुक्तं समूहस्यैवासत्वात्। तथा हि—।

*** समवायेऽपि रूपस्य गन्धत्वं नोपपद्यते।**
**समूहस्यैकता तेन घटस्येव न युज्यते ॥१४॥**

§ ३४. समुदिता अपि रूपादयो न समुदायावस्थाः स्वं स्वं लक्षणं विजहति। ततश्च यथा[5] समुदायावस्थायां रूपस्य स्वरूपापरित्यागाद्[6] गन्धत्वं न सम्भवत्येवमनेकाश्रयस्य समूहस्यैकत्वं न सम्भाव्यते। स हि समुदायो रूपादिभ्यो न व्यतिरिक्तस्ते च रूपादयः परस्परतो भिद्यन्ते। रूपादिभ्यश्चाव्यतिरिक्तसमुदायः कथमेकः स्यात्। दृष्टान्तमाह घटस्येवेति। यथा

घटस्य न भवत्यैक्यमपृथक्त्वाद्विलक्षणैः[7]। रित्युक्तं[8] तथेहापि[9]
समूहस्यास्तिनैकत्वमपृथक्त्वाद्विलक्षणै[10] रिति। एवं।
समूहस्यैकता तेन घटस्येव न युज्यते ॥१४॥

३४०

§ ३५. ततश्च समूहस्यासम्भवाद्रूपादिसमूहेऽपि घट कल्पना न युक्ता। यथोपवर्णितेन च विचारेण—

*** रूपादिव्यतिरेकेण यथा कुम्भो न विद्यते।**
**वाय्वादिव्यतिरेकेण तथा रूपं न विद्यते ॥१५॥[11]**

§ ३६. रूपादिव्यतिरेकेण यथा कुम्भो न सिद्ध एवं कुम्भप्रज्ञप्त्युपादाना अपि रूपादयो वाय्वादिमहाभूतचतुष्टय व्यतिरेकेण न युज्यन्ते। निर्हेतुकत्वप्रसङ्गात् ॥१५॥

---

१. T. यः;S. यतश्चायं
२. T. न तत्र 'एव' शब्दो वर्तते।
३. T. असिद्धवपि।
४. तुलनार्थं द्रष्टव्यम्-शून्यतासप्तति XV, २७.८.५।
५. T.; S. न स्वीकरोति
६. T. स्वरूपपरित्यागात्; स्वरूपेण परित्यागात्।
७. S. पृथक्त्वाद्विलक्षणैः।
८. कारिका दृष्टव्या, ३३२ (१४.७)।
९. T.; S. तथापि।
१०. T.; S. पृथक्त्वादिलक्षणैः।
११. MV. पृ० ७१

३५१

§ ३७. यथा च वाय्वादिव्यतिरेकेण रूपगन्धादेरसम्भव एवं महाभूताना-मन्योन्यव्यतिरेकेण सिद्ध्यभावात् स्वरूपसिद्ध्यभाव[1]मुद्भावयन्नाह—

*** अग्निरेव भवत्युष्णमनुष्णं दह्यते कथम् ।**
**नास्ति तेनेन्धनं नाम तद्दृतेऽग्नि र्न विद्यते ॥१६॥**

§ ३८. इहाग्निर्दग्धा भूतत्रयं दाह्यम् । तदेत[2]दिन्धनाख्यं[3] भूतत्रयमग्निरेव दहति नान्यः । इन्धनमेव च दह्यते नान्यत् । तत्रेन्धनं यद्यग्निरुष्णमपि दहति तदाग्निरेव तदुष्णं भवति नेन्धनम् । अनुष्णस्यापि दाहासम्भवादनुष्णमपि नेन्धनम् । तदेवं सर्वथापि दाह्यस्यासम्भवान्नास्तीन्धनं[4] नाम यद् भूतत्रयात्मकं स्यात् । यदा चैवमग्नि व्यतिरेकेणेन्धनं नापरं सम्भवति तदेन्धनाभावे निर्हेतुकोऽप्यग्निर्न सम्भवतीति तद्दृतेऽग्नि र्न विद्यते ॥१६॥

३५२

§ ३९. अत्राह । अनुष्णात्मकमेवेन्धनं काठिन्यादिरूपत्वात् । तच्चाग्नि स्वभावेनाग्निनाभिभवादुष्णं भवति । उष्णं च सद्दह्यते इति । एवमपि कल्प्यमान इन्धनाख्योऽर्थः[6]—।

*** अभिभूतोऽपि यद्युष्णः सोऽप्यग्निः किं न जायते ।**
**अथानुष्णः[7] परोऽप्यग्नौ भावोऽस्तीति न युज्यते ॥१७॥**

§ ४०. यद्यग्निनाभिभूत इन्धनाख्योऽर्थोऽनुष्णस्वभावोऽप्युष्णो भवतीति कल्प्यते सोऽप्यग्निरस्तूष्णरूपत्वात् ततश्च स एवेन्धनाभावः[8] । "अथानुष्णः परोऽप्यग्नौ भावोऽस्तीति न युज्यते ॥"

---

१. T.; S. रूपादिसिद्ध्यभावं ।
२. T. तद् ।
३. T. महाभूतत्रयं ।
४. T. S. नास्तितेनीन्धनं ।
५. तुलनार्थं द्रष्टव्यम् —MK., x, अग्नीन्धनपरीक्षा ।
६. T. सोऽर्थः ।
७. अथानुष्ण ।
८. T. ततश्च इन्धनाभावः ।

§ ४१. अथाभिभूतोऽप्यसावर्थोऽनुष्ण एवेष्यते स[1] तर्ह्यग्नेः परोऽपि भाव इन्धनाख्यं भूतत्रयमुष्ण विरुद्धत्वादनुष्णस्वभावमन्नावस्तीति न युज्यते। ततश्च भूतत्रयरहितमग्निमात्रमेव स्यात्। न चैषां महाभूतानामन्योन्यं विनाभावः। यदि स्यात् सिद्धान्तविरोधश्च स्यात्[2]। अग्नेश्चापरस्य पदार्थस्येन्धनाख्यस्याभावान् निर्हेतुत्वश्चाग्नेः स्यादित्युक्तमेतत् ॥१७॥

## ३४३

§ ४२. अथ मन्यसे तेजो द्रव्यपरमाणौ भूतत्रयस्याभावात् द्विनापीन्धने-नास्त्येवाग्नि रिति। उच्यते—।

> * इन्धनं यद्यणोर्नास्ति तेनास्त्यग्निरनिन्धनः।
> अणुरेकात्मको नास्ति स्यात् तस्या पीन्धनं यदि ॥१६॥

§ ४६. ततश्च स एव[3] निर्हेतुकत्वदोषप्रसङ्गः[4]। इति एव चाहेतुकत्व[5] दोष-प्रसङ्गाद् वैशेषिकाणामिव स्वयूथ्यानाम[6]युक्तो द्रव्यपरमाणवभ्युपगमः। वैशेषिक परमाणुवादश्च नवम् एव प्रकरणे निषिद्धत्वान्न पुनर्निषिध्यते अथाग्ने[7]रहेतुकत्व प्रसङ्गभीत्याणावपीन्धनभावः[8] परिकल्प्येत ततः[9] "अणुरेकात्मको नास्ति स्यात्तस्यापीन्धनं यदि।" यद्यणोरिन्धन मस्तीति कल्पयते न तर्हि तेजद्रव्य परमाणुरेकरूपोऽस्तीत्यभ्युपेयम् ॥१८॥

## ३४४

§ ४४. न च केवलं परमाणोरेवैकात्मकस्याभावोऽष्टानां द्रव्यनां महात्पाद-नियमादपि खलु तदन्यस्यापि पदार्थस्य—

> * तस्य तस्यैकता नास्ति यो यो भावः परीक्ष्यते।
> न संति तेनानेके ऽपि येनैकाऽपि न विद्यते ॥१६॥

---

१. T. न तत्र शब्दोऽयं वर्तते।
२. T. न चैषां महाभूतानामन्योन्यं विनाभावस्तस्य सिद्धान्तविरोधात्।
३. T. तदर्थक एव।
४. T.; S. हेतुक दोषः।
५. T. S. हेतुकदोषप्रसाङ्गात्।
६. वैभाषिकसौत्रान्तिकादीनामित्यर्थः।
७. T.; S. यथाग्ने।
८. T.; इन्धनस्वभावः।
९. T.; S. न स्वीकरोति

§ ४५. यथा भूतानामेकात्मकत्वं नास्ति तदितरसद्भावात्[2] । एवं भौतिकमपि[3] नास्ति भूतैर्विना हेतुकत्व प्रसङ्गात् । एवं चित्तेन विना चैत्ता न सम्भवन्ति नापि चैत्तैर्विना चित्तम् । तथा लक्षणैर्जात्यादिभिर्विना लक्ष्यं रूपादिकं नास्ति । नापि लक्ष्येण विना निराश्रयं लक्षणं सम्भवन्ति । यतश्चैवमेकस्य पदार्थस्य कस्यचित् सिद्धि र्नास्ति तदेककानां समुदायाभावे सत्यनेकसिद्धिरपि दूरोत्सारितेत्याह—न सन्ति तेनानेकेऽपि येनैकोऽपि न विद्यते ।।

एकस्याप्यसिद्धौ[4] सत्यां समूदितानामपि नास्ति सिद्धिः ।।१६।।

३४५

§ ४६. अथ स्यात् । स्वयूथ्यं प्रत्येवैतद्दूषणमुपपद्यते सहोत्पादनियमाभ्युपपद्यने सहोत्पादनियमाभ्युपगमात् । परं प्रति तु नैदं दूषणं नित्यानां पृथिव्यादिपरमाणूनां तदितरभावसद्भाववियुक्ता नामस्तित्वेनाभ्युपगमादिति । तत्रप्ययुक्ततामुद्भावयन्नाह—

* भावास्त्रयो न सन्त्यन्ये तत्रैकोऽस्तीति चेन्मतम् ।
त्रित्वं येनास्ति सर्वत्र तेनैकत्वं न विद्यते ।।२०।।

§ ४७. एतदप्यसम्यक् । किं कारणम् । त्रित्वं येनास्ति सर्वत्र तेनैकत्वं न विद्यते ।।परस्यापि हि न कश्चिदेको नाम पदार्थोऽस्ति । यस्मात्तत्रापि पृथिवीपरमाणौ द्रव्यमेकत्वसत्त्वं चेत्येतत् त्रितयमस्ति । तथा गुण गुणत्वं सत्त्वत्वञ्चेति । यस्मात्त्रितयमस्ति तस्मान्न कश्चिदेको नाम पदार्थोऽस्ति तथा साङ्ख्यस्य[6] त्रिगुणात्मकं सर्वमित्येकः कश्चित्पदार्थो नास्तीति न कश्चिदयुक्त[7] दूषणमतिवर्त्तते[8] ।।२०।।

३४६

§ ४८. अपि चायं दूषणमार्गः सर्वेषामेव वादिनां पक्षनिराकरणाय विदुषा प्रयोक्तव्य इति शिक्षयन्नाचार्य । आह—।

* सदसत् सदसच्चेति सदसन्नेति च क्रमः ।
एष प्रयोज्यो विद्वद्भिरेकत्वादिषु नित्यशः ।।२१।।

---

१. T. महाभूतानां ।
२. T.; S. तदितरस्मिन्नितरसद्भावात् ।
३. S. भौतिकमपि केवलं ।
४. T.; S. सिद्धौ ।
५. T. अनेक ।
६. T. सांख्यस्यापि ।
७. T. कश्चित् ।
८. T.; S. इति वर्तते ।

§ ४९. [1]एकत्वमन्यत्वमुभयं नोभयमित्येकत्वादयः । एतेष्वेकत्वादिषु पक्षेषु वादिना व्यवस्थितेषु सदसत्त्वाद्युपलक्षितो दूषणक्रमः स्वधिया[2] यथाक्रममवतार्यः । तत्र सत्कार्यवादिनः कार्यकारणयोरेकत्वमिति पक्षः । तस्य हि[3] कारणात्मना सत् कार्यं व्यवस्थितमेव तत् कार्यात्मना विपरिणमते । न ह्यसच्छक्यं कर्त्तुम् । यदि ह्यस[4]दुत्पद्येत तदा सर्वतः सर्वसंभवः स्यात् । न च सर्वतः सर्वसम्भवो दृष्टः । क्षीरादेरिव प्रतिनियतदध्यादिदर्शनात् । तस्य वादिनः[5] कार्यकारणयोरेकत्वाभ्युपगमात्सदेव कार्यमुत्पद्यत इत्येवमेकत्वपक्षः । तस्मिन्नेकत्वपक्षे सत्कार्यवादपरामर्शेन[6] नित्यं दूषणमभिधेयम् । तच्चोक्तं—

स्तम्भादीनामलङ्कारो गृहस्यार्थे निरर्थकः ।
सत्कार्यमेव यस्येष्टम्··· ·· ··· ··· ··· ··· ॥

इत्यनेन ।[7] तथा

सम्भवः क्रियते यस्य प्राक् सोऽस्तीति न युज्यते ।
सतोयदि भवेज्जन्म जातस्यापि भवेद्भव ॥[8]
धर्मो यद्यकृतोऽप्यस्ति नियमो जायते वृथा ।
अथ [कार्यं किञ्चिदपि सत्कार्यस्य न सम्भवः ॥[9] इत्युक्तम्][10]

एवं विद्वद्भिः सत्कार्योपदर्शितं दूषणमेकत्वपक्षे प्रयोज्यम् ।

§ ५०. असत्कार्यवादिनो हि कार्यकारणयोरन्यत्ववादिनः । ते हि सदुत्पत्ति निरर्थेति मन्यमाना असदेव कार्यमुद्यत इतिप्रतिपद्यन्ते । तेषामन्यत्व पक्षेऽप्यसत्कार्योपदर्शितं दूषणमभिधेयम् । तच्च इत्युक्तम् ।[11] "स्तभादीनामलङ्कारो गृहस्यार्थे निरर्थकः । यस्यासत्कार्यमेव च ॥ इत्युक्तम्

§ ५१. ये तु कार्यकारणयोरेकत्वमन्यत्वं चेति कल्पयन्ति ते सदसत्कार्यवादिनः । ते हि देवदत्तस्य जीवात्मत्वं व्यवस्थित देवदत्तात्मत्व त्वव्यवस्थितमुत्पद्यत इतीच्छन्ति । तथा च मञ्जरीकेयूरादीनां सुवर्णात्मत्वं व्यवस्थितं मञ्जरीकेयूरात्मत्वं त्वव्यवस्थितमुत्पद्यत इति प्रतिपद्यते । तेषामेकत्वान्यत्वोभयपक्षस्य सदसत्कार्यवाद प्रतिषेधोपदर्शितं दूषणमभिधेयम् । तच्च "सत्कार्यमेव

---

१. T. आत्मत्वमेकत्वं ।
२. T. सुधिया ।
३. T. तथाहि दर्शने ।
४. S. ह्यसन्; T. न तत्र शब्दोऽयं वर्तते ।
५. T. वादिनः दर्शने ।
६. T. सा० अधिकारद्वारा अधिकारमुखेन वा ।
७. ११,१५ ।
८. ११,१० ।
९. ११,१२ ।
१०. T. ।
११. ११,१५ ।

यस्येष्टम्" इत्यादिनोक्तम्[1] वादद्वयपक्षदोष एकस्मिन् पक्षे प्रयोज्य इति विशेषः ।

§ ५२. येषां तु दर्शने घटादीनामभावेन स्वहेतुभ्योऽन्यत्वमेकत्वं चानभिला-प्यं भावद्रव्यं च सद्धेतुकं[2] तेषां सदसद्वाद निराकरणद्वारा सदपि न भवत्यसदपि न भवतीति विचारेण दूषणमभिधेयम् । तच्चोभयासम्भवे तन्निषेधेन नोभयं भवतीति यदेदमुभयं न सम्भवति तदा कस्य निषेधेन नोभयं भवतीति कल्प्यते इत्यर्थ इत्यनेनोक्तमेव । एवं च यथाक्रमं ।

**सदसत् सदसच्चेति नोभयं चेति च क्रमः ।**
**एष प्रयोज्यो विद्वद्भिरेकत्वादिषु नित्यशः ॥**

§ ५३. अन्ये तु व्याचक्षते । एकत्वान्यत्वादिनैव क्रमेण भावानां प्रतिषेधो-ऽथवा क्रमान्तरेणापीति चेत् । उच्यते

**सदसत् सदसच्चेति नोभयं चेति च क्रमः ।**
**एष प्रयोज्यो विद्भिरेकत्वादिषु नित्यशः ॥**

§ ५४ सच्च । असच्च । सदपि च सतोऽभावोऽसच्च । न सन्न चासत् । इत्ययं क्रमो विद्वद्भिरेकत्वादिषु चतुर्षु पक्षेसु नित्यशः प्रयोज्यः । तत्र सादित्यात्मेत्यर्थः । असदित्यनात्मेत्यर्थः । सच्च सतोऽभावोऽसच्चेत्यात्माप्यात्मना ऽभावोऽनात्मापीत्यर्थः । न सन्न चासदिति नात्मापि न चानात्मापीत्यर्थः । एकत्वादिष्वित्येकत्वमन्यत्वमुभयं नोभयमिति ।

§ ५५ तत्र द्वयो र्बहूना वैकत्वमनेकत्वमुभयमनुभयं वा भवति । तत्र येषां पटशुक्लयोरेकत्वमिति पक्षस्तेषा मदित्ययं क्रमो विषयतः काललक्षणतश्च प्रयो-ज्यः । तत्र तावद्विपयतः । यदि पटशुक्लयोरेकत्वं यत्र यत्र शुक्लस्तत्र तत्र पटेनापि भवितव्यं । यत्र यत्र च पटस्तत्र तत्र शुक्लेनापि भवितव्यम् । अथ यत्र यत्र शुक्लो न तत्र तत्र पटो न च यत्र यत्र पटस्तत्र तत्र शुक्लस्तदा पटशुक्लयोरेक-त्वमिति यदिष्यते न तदुपपद्यते । विषय भेदात् । कालादपि । तत्र कालस्त्रिविधिः अतीतोऽनागतो वर्तमानश्च । तत्रातीतऽतीतावस्थायामेव पूर्वजातः शुक्लो दृष्टः । यदि पटशुक्लयोरेकत्वं तदा यदि शुक्लः पूर्वजातः, पटेनापि पूर्वजातेन भवितव्यम् । अथ पट पश्चाज्जातः, शुक्लेनापि पश्चाज्जातेन भवितव्यम् । यदि शुक्ले पूर्वजाते वर्त्तमानः पटः पश्चाज्जायते यत् पूर्वजातं यच्च पश्चाज्जातं न तयोरेकत्वम् । उत्पत्तिक्रमभेदात् । अन्यच्च यदि पटशुक्लयोरेकत्वं तदा शुक्ले पटो विलीयेत् । पटेऽपि च शुक्लो विलीयेत् । यदा शुक्लः शुक्ले विलीयेत न पटः पटेऽपि पट

---

१. ११. १५ ।

२. अस्पष्टम् ।

एव विलीयेत न शुक्लस्तत्र पटशुक्लयोरेकत्वमिति यदिष्यते तन्न भवति। विलयाविलययोर्भेदात्।

§ ५७. अन्यच्च। शुक्ल इत्युक्ते शुक्ल इत्येवाह न घट इति। पट इत्युक्ते च पट इत्येवाह न शुक्ल इति। यस्माच्छुक्ल इत्युक्ते शुक्ल इत्येवाह पट इत्युक्तेऽपि च पटमेवाह न शुक्लमिति तस्मान्न तयोरेकत्वम्। उक्तानुक्तयो र्भेदात्। लक्ष्यलक्षणयो र्भेदाच्च। इह लक्षणं शुक्लरूपम्। लक्ष्यः पटः। यदि तयोरेकत्वं तदा यदि शुक्लो लक्षणं पटोऽपि लक्षणमेव स्यात्। यदि पटो न लक्षणम् शुक्लोऽपि न लक्षणं स्यात्। यदि शुक्ल एव लक्षणं न पटः पट एव च लक्ष्यो न शुक्लस्तत्र पटशुक्लयोरेकत्वमिति यदिष्यते तन्न भवति। लक्ष्य लक्षणयो र्भेदात्। यथा पटशुक्लयोरेकत्वं प्रतिषिद्ध तथा सर्वेषां भावानामेकत्व प्रतिषेधो विस्तरशोऽभिधेयः।

§ ५८. अत्राह। पटशुक्लयोरेकत्वप्रतिषेध उक्तेऽन्यत्वं वक्तव्यम्। उच्यते। यदि पटशुक्लयोरन्यत्व तदा गुणो द्रव्याधेय इति शुक्लो घटो न भवेत्। यथा यदि यज्ञदत्तो देवदत्तस्य भ्राता न भवेद् देवदत्तोऽपि यज्ञदत्तस्य भ्राता न भवेत्। एव पटोऽपि शुक्लो न भवेत्।

§ ५९. यदि शुक्लयोगात् पटः शुक्ल इत्योच्यते। तत्राप्युच्यते। यदि शुक्लयोगात् पटः शुक्लः स्यात् किमयं पटः शुक्लयोगाच्छुक्ललक्षणं प्राप्नोत्यथ न प्राप्नोति। यदि तावच्छुक्ललक्षणं प्राप्नोति। पटस्तेन शुक्ल एव स्यात्पटत्वं चास्य हीयेत। अथ शुक्ललक्षणं न प्राप्नोति। शुक्ललक्षणा-प्राप्त्यायोगसत्त्वेऽपि पटः शुक्लो न भवति। तत्र शुक्लयोगेन पटः शुक्ल इति यदिष्यते तन्न भवति। यथा पटः शुक्लो न भवति तथा ये पटस्य विशेषा नीलः पीतो रक्तो रक्तपीतः कपिलः कपोतवर्णः कृष्णो दीर्घो ह्रस्वः कोमलः काठन इत्यादयस्तेभ्योऽपि पटोऽन्य एवेति सर्वसम्भवाभावः। सर्वसम्भवाभावे च पट एव न भवति। यथा पटो न भवति तथा सर्वेऽपि भावाः। गुणविशेषा हि तत्तेभ्यो भिन्ना एवति सर्वसम्भवा भावः।

§ ६०. अत्राह। यदि सदसतोरेकत्वमन्यत्वं च प्रतिषेध्यमुच्यते उभयपक्षः सम्यग्वक्तव्यः। उच्यते। यस्य पटशुक्लयो रेकत्वमन्यत्वं चेति पक्षस्तस्यैकत्व-मन्यत्वं च पूर्ववचनैरेव प्रतिषेधत्वेन व्याख्यातम्।

§ ६१. यस्य पक्षो नोभयं तस्यापि प्रतिषेधः संक्षिप्योच्यते। यदि पटशुक्लयो-र्नैकत्वं न चान्यत्वमुभयलक्षणाप्राप्तेः शुक्लोऽपि शुक्ल एव न भवत्यशुक्लोऽपि न भवति। पटोऽपि पट एव न भवत्यपटोऽपि न भवति। तस्मादुभय लक्षणा

प्राप्तस्य शुक्लस्य किमिति शुक्ल इत्यभिधानं न कृष्ण इति। यस्मात्तस्य शुक्ल इत्यभिधानं न कृष्ण इति तस्माच्छुक्ल एव। लक्षणद्वयाप्राप्तस्य च तस्य पटस्य किमिति पट इत्यभिधानं न घट इति। यस्मात्तस्य पटस्य पट इत्येवाभिधानं न घट इति तस्मात्पट एव। तथा च शुक्ल एव पट एव च सिध्यति। अवश्यं च तयोरेकत्वेनान्यात्वेन वा भवितव्यम्। एकत्वे सति पुनरप्येकत्वप्रतिषेधक्रम एवा भिधेयोऽन्यत्वे त्वन्यप्रतिषेधक्रमः। तथा सर्वस्यापि भावस्य प्रतिषेधक्रमो विस्तारशोऽभिधेय इति ॥२१॥

३४७

§ ६२. अत्राह। यद्येवमसिद्धे नास्ति भावानां स्वभावः कयोपपत्त्या वादिनो भावान् कल्पयन्ति। न तत्र काचिदुपपत्ति। किन्तु—

**संतानदृष्टिदोषे हि नित्यो नाम भवेद्यथा।**
**सामग्रीदृष्टिदोषे हि भावो नाम भवेत्तथा ॥२२॥[1]**

§ ६३. यथा प्रदीपाग्निशिखाया प्रतिक्षणं विनश्यन्तां पूर्वापरयोः क्षणयो र्हेतुफलसम्बन्धेऽविच्छेनावस्थिते हेतुप्रत्ययसामग्रीसद्भावे सन् सन्तानो जायते तथा सर्वेषां सस्काराणामुत्पादानन्तर भग्नाना स्वतो यथावद्धेतुप्रत्ययसामग्री सद्भावे भावाश्रययो र्हेतुफलयोः सम्बन्धस्याविच्छेदेनावस्थानमनादि प्रवर्तते। तस्मात्तस्य सन्तानस्य यथावस्थितस्वभावदर्शने नियतं सन्दिग्धानां विपरीतनिश्चयानां बाह्यानामृषीणां पूर्वनिवासमनुस्मरतामिहं क्षणभङ्गाप्रत्यक्षेण स्कन्धपरम्परासन्तानस्य नियतं दर्शनमहं परो वेति च युज्यते नित्यो भाव इति मतिः।

§ ६४. तथा तां तां सामग्रीं प्रतीत्य भूतभौतिकचित्तचैत्तलक्ष्यलक्षणाद्यात्मकं तदुपादानकं तृण धरणी द्रव्यादिसामग्रीकं गृहादि रूपगन्धादि सामग्रीकं घटादि भावसमग्री (?) मात्माकाशादि च भवति। सामग्रीतः पृथग्भूतो लक्षणसिद्धो धर्मो भूतभौतिकचित्तचैत्तघटादिः। प्रतिबिम्बप्रतिश्रुत्कादिवत्ततस्ततः पृथक् पृथग् लौकिकं विपर्यासं प्रमाणं कृत्वा लोकप्रतिपादनायोपादाय प्रतीत्य वा स्वसामान्यलक्षणं प्रज्ञप्तिमात्रं क्रियते। तेषामपि जातौ सामग्र्येव जायते सामग्र्येव निरुध्यते। तस्मात्सा सामग्री यथावन्न ज्ञायते दृश्यते चेति दोषेण वादिप्रभृतयो रागस्वभावेन परिनिष्पन्नं कल्पयन्तो विपर्यासमात्रादविद्याभावमेव प्रतिपद्यन्ते ॥२२॥

---

१. V. यथा कुदृष्टितो हेतो नित्यता नाम जायते।
कुदृष्टितस्तथा स्कन्धे भावत्वं नाम जायते ॥

२७८

§ ६५. यद्येवं भावाभावादस्माकं भावदर्शनं विपरीतं तथापि भावानभ्युपगमे भावेन विना दर्शन भवेत् । तच्चात्यन्तमयुक्तं दर्शनादर्शनविरोधादिति चेत् । उच्यते । भावो नास्तीति न वयं ब्रूमः । प्रतीत्यसमुत्पादवादात् । किं ते भाववादः । न । प्रतीत्यसमुत्पादवादादेव । कस्ते वाद इति चेत् । प्रतीत्यसमुत्पादवादः । क पुनरर्थः प्रतीत्यसमुत्पादस्य । निःस्वभावोऽर्थः । स्वभावेनानुत्पन्नोऽर्थः । मायामरीचि प्रतिबिम्ब गन्धर्वनगरनिर्माणस्वप्नसदृशस्वभावकार्योत्पादोऽर्थः । शून्यतानात्मर्थः । तथा हि— ।

**प्रतीत्य सम्भवो यस्य स स्वतन्त्रो न जायते ।**
**न स्वतन्त्र मिदं सर्वं स्वयं तेन न विद्यते ॥२३॥**[१]

§ ६६. इह यस्य स्वरूपं स्वभावश्च स्वतन्त्रमपरायत्त च तस्य स्वत एव सिद्धया न प्रतीत्यसमुत्पादः । संस्कृतास्तु सर्वे प्रतीत्यसमुत्पन्नाः । एवं यस्य भावस्य प्रतीत्यसमुत्पादः स न स्वतन्त्रः । हेतुप्रत्ययाभ्यामुत्पादात् । न स्वतन्त्रमिदं सर्वम् ।तस्माद्यस्य भावस्याधिपति र्न [स] स्वभावेन विद्यते । तस्मादिहप्रतीत्यसमुत्पन्नस्य स्वतन्त्रस्वरूपविरहात् स्वतन्त्रस्वरूपरहितोऽर्थः शून्यतार्थः । न सर्वभावाभावोऽर्थः । तस्मादिह प्रतीत्य समुत्पन्नं मायावत् । संक्लेशव्यवदानहेत्वपवादात्तदभावदर्शनं विपरीतम् । निःस्वभावत्वादभाव दर्शनमपि विपरीतम् । तस्मादेव भावसस्वभाववादिना प्रतीत्य समुत्पादाभावः शाश्वतोच्छेददृष्टिश्च दोषः ।

§ ६७. अथ यद्यस्वतन्त्रार्थः प्रतीत्यसमुत्पादार्थस्तर्हि को भवतास्माकं विरोधः कश्च भवतोऽस्माकं विशेष इति । उच्यते । अयं विशेषो यद्भावान्यथातर्कितमुक्तं च प्रतीत्य समुत्पादं न वेत्ति । यथा व्यवहाराव्युत्पन्नो बालकुमारः प्रतिबिम्बस्य सत्यतयाध्यारोपणेन यथावदवस्थितस्वभावशून्यतापाकरणात्सस्वभावत्वप्रतीतौ प्रतिबिम्बस्य कल्पनां न जानाति भवानपि तथा प्रतीत्यसमुत्पादाभ्युपगमेऽपि प्रतिबिम्बसमं प्रतीत्यसमुत्पादं स्वभावेन शून्यताभूतमपि स्वरूपेण यथावदवस्थित नावगच्छति निःस्वभावत्वस्याग्रहणादसत्स्वरूपस्य च सत्स्वरूपत्वेनाध्यारोपितस्य ग्रहणात् । उक्तमपि च [भावान्] न जानाति । निःस्वभावत्वस्याकथनादभावस्वरूपस्य कथनाच्च । तस्यादेवं तर्कितमुक्तं यथात्मात्मान-

---

१. V. प्रतीत्य सम्भवो यस्य स स्वतन्त्रो न जायते ।
अस्वतन्त्रमिदं सर्वं तेनात्मा नैव विद्यते ॥

मन्यं च वक्ष्यति [भवान्] तस्मादिहास्माकं महति धर्मरागेऽवस्थानाच्छास्त्रकार-स्य नायमारम्भो निरर्थकः ॥२३॥

३४९

§ ६८. विरोधेऽपि च यस्मान्नास्ति स्वरूपस्योत्पाद तस्मादेव—

**विना फलेन भावानां समवायो न विद्यते ।**

**सोऽसमवाय आर्याणां समवायः फलाय यः ॥२४॥**[1]

§ ६९. यदि भावानां प्रवृत्तिः स्वाभाविकी स्यात्ते नित्याः स्युः फलनिर-पेक्षाश्च । स्वभावो हि फलनिरपेक्षः । नैको भावोऽनिरोधेऽपि स्वल्पमपि फलं साधयितुं शक्नोतीति सामग्र्याः साध्येन फलेनान्योन्यं समवायो भवति । फल-निमित्तस्तु यः समवायः स तत्स्वभावदर्शिनामार्याणामसमवायः सत्यमेव स नाभिमतो ज्ञेयोऽर्थः ॥२४॥

३५०

§ ७०. अतएव विज्ञानं भावस्वरूपमध्यारोपयति । संक्लेशवतोऽज्ञानव-शाद्भावेषु रागवतः [ पुरुषस्य ] संसारप्रवृत्तिबीजस्य सर्वथा निरोधात्संसार-निवृत्तिर्व्यवस्थितेति प्रतिपादयन्नाह—

**बीजं भवस्य विज्ञानं विषयास्तस्य गोचराः ।**
**दृष्टे विषयनैरात्म्ये भवबीजं निरुध्यते ॥२५॥**[2]

**इति योगाचारे चतुःशतकेऽन्तग्राहप्रतिषेधभावना-**
**सन्दर्शनं चतुर्दश प्रकरणम् ॥**

§ ७१. यथोक्तेन क्रमेण विषयस्य निःस्वभावत्वदर्शनाद्ग्रहेतोर्भवबीजभूतस्य विज्ञानस्य सर्वथा निवृत्तेः श्रावकाणां बुद्धानामनुत्पादधर्मकथनसमर्थानां बोधि-सत्त्वानां च संसारनिवृत्ति र्व्यवस्थिता । तथागतज्ञानोद्भवबीजं बोधिचित्तं तु तत् तेषां न निवर्तते । सर्वेषां तथागतज्ञानलाभस्यावश्यकत्वात् । ये तु तथाविधं बोधिचित्तं नोत्पादयन्ति तेऽपि पश्चादवश्यमुत्पाद्य बोधिसत्त्वचर्ययानुत्तर ज्ञानायारम्भं कुर्युः । इदं चार्यसद्धर्मपुण्डरीकसूत्रादौ मृग्यम् ॥२५॥

———

१. V. विना कार्येण भावेषु समवायो न विद्यते ।
कार्यार्थः समवायो यः स आर्यस्यासमन्वितः ॥

२. V. भवबीजं हि विज्ञानं विषयास्तस्य गोचराः ।
दृष्ट्वा विषयनैरात्म्यं भवबीजं निरुद्ध्यते ॥

# पञ्चदशं प्रकरणम्

## संस्कृतार्थप्रतिषेधभावनासन्दर्शनम्

३५१

§ १. अत्राह । विद्यत एव संस्कृतं स्वभावेन तल्लक्षणोत्पादादि सद्भावात्[1] । खरविषाणादि तु नास्ति । न हि तस्य संस्कृतलक्षणमस्ति । संस्कृतस्य तु संस्कृतलक्षणमुत्पादाद्यस्ति । तस्मादस्ति संस्कृतमिति । उच्यते—

**असदन्ते जायते चेत् तेनासज्जायते कुतः ।**
**सदेवान्ते जायते चेत् तेन सज्जायते कुतः ॥१॥**[2]

§ २. यदि तस्य लक्षणमतिरिक्तं स्याद्विद्यमानमपि संस्कृतं न विद्येत । कथं कृत्वेति । इहोत्पादोऽयं संस्कृतं भावमुत्पादयति चेद्विद्यमानं वा संस्कृतमुत्पादयति । तत्र तावद्यस्यासत्कार्यवादस्तस्य बीजावस्थायामङ्कुराभावाद्धेतुप्रत्ययसामग्र्या बीजस्यान्तात्क्षणादङ्कुरो जायते । तस्मात्तस्य वादिनः असदन्ते जायते चेद् इति पक्षः । न तु युज्यतेऽसत उद्भवः खरविषाणादेरप्युत्पादप्रसङ्गात् । तस्मात् तेनासज्जायते कुतः इत्युक्तम् । तेनेत्यसत्त्वं हेतुः कुत इति न सम्भवति । असत्त्वादसतो नोत्पाद इत्यर्थः । अथैतद्दोषभयात्सत्कार्यवादे सत एवोत्पाद इष्यते । तथा सति "सदेवान्ते जायते चेत्तेन सज्जायते कुतः ॥

§ ३. यद्युत्पादादतिप्राग् बीजावस्थायामेवाङ्कुरोत्पादः कल्प्यते तदा नोत्पादः । सद्भावाद् [एव] । अथ सत उत्पादः परिकल्प्यते तदोत्पादानवस्थाप्रसङ्गः । तस्य पुनरुत्पादाद् बालपक्षः स्यात् । न च स सम्भवतीति न सतोऽप्युत्पादः ॥१॥

---

१. तीणि 'मानि भिक्खवे' उपपादो पञ्ञायति वयो पञ्ञायति ठितस्स अञ्ञथत्त' पञ्ञायति, महावग्ग, पृ० १४५. (poussion).

२. V. अभावाच्चेद्भावादन्यस्तदा भावः कुतो भवेत् ।
दृष्टं चेद्भावतो जन्म तदा भावः कुतो भवेत् ॥

३५२

§ ४. अन्यच्च

फलेन नाश्यते हेतुस्तेनासन्नैव जायते ।
न सिद्धिरस्ति सिद्धस्य तेन सन्नापि जायते ॥२॥[1]

§ ५. यस्माज्जायमानेनाङ्कुरेण बीजं नाम हेतुर्नाश्यते तस्यादसन्नैवाङ्कुरो बीजाज्जायत इत्यपि न युज्यते । यथा यव गोधूमादिष्वसन्तस्ते शाल्यङ्कुरा विकारेणापि न जायन्ते उद्भूते तैले तिलादिवदङ्कुरोत्पादे तद्बीजं नश्यति । तस्मान्नासज्जायते । "नसिद्धिरस्ति सिद्धस्य तेन सन्नापि जायते ।" सिद्धोह्यङ्कुरो न पुनः सिध्यतीति न सतोऽप्युत्पादः ।।२।।

३५३

§ ६. उत्पादकालासम्भवादप्युत्पादो न भवतीत्युद्भावयन्नाह—

जातिस्तदा न भवति न जातिरन्यदापि च ।
तदान्यदा चेज्जातिः कदा जाति र्भविष्यति ।।३।।[2]

§ ७. यदाङ्कुरोऽयमात्मभावं लभते तदा सिद्धरूप इति नास्य जातिः सम्भवति । यदायमसिद्धरूपस्तदा [अपि] अस्य जाति र्न युज्यते असिद्धस्यासद्भावेनाश्रिता जातिर्नाम न सम्भवतीत्यन्यदा जाति र्न सम्भवति । किञ्चित्सिध्यति किञ्चित्तु न सिध्यतीतीहाप्युभयोः पक्षयोरुक्तदोष प्राप्ति र्न तदा स्वपरयो जाति सम्भवति । यदैवं कालांशत्रयेऽपि जाति र्न सम्भवति तदा तत्प्रकारान्तरासम्भवात्कदापि जाति र्न भवति । यत्रास्योत्पादः स कालो नास्तीत्यभिप्रायः ।।३।।

३५४

§ ८. अत्राह दुग्धं दधि भावेन जायते । इदमपि न युज्यते । दुग्धस्य दधिभावासम्भवात् । दुग्धभावेनावस्थितस्य दुग्धस्य तावत्तदात्मनोत्पत्ति र्न भवति । तस्य तस्मिन्दुग्धात्मना सद्भावात् । तस्मादेवं सति ।

---

१. V. हेतोर्विनाशः कार्येण तेनाभावो न जायते ।
निष्पन्नान्नैव निष्पत्ति र्भावोऽप्येवं न जायते ।।

२. V. ततो भावो न भवति नान्यतोऽपि स जायते ।
ततोऽन्यतो न चेज्जन्म तदा जन्म कुतो भवेत् ।।

**तत्रैव तस्य भावस्य यथा जाति र्न विद्यते ।**
**तथान्यस्यापि भावस्य तत्र जाति र्न विद्यते ॥४॥**[1]

§ ९ यथा दुग्धस्वभावेनावस्थितस्य दुग्धस्य जाति र्न सम्भवति । तथा दुग्धादन्यस्य दधिभावस्यापि जाति र्न सम्भवति । यस्माद् दुग्धे दधनि भूते दुग्धं दधीति न व्यपदिश्यते । यदा दधि तदा न तद्दुग्धम् । अपि च यदा तद्दुग्धं तदा न तद्दधीति दुग्धं दधि जायत इति न युज्यते ॥४॥

**३५५**

§ १० इतोऽपि न संस्कृतस्योत्पादः । तथाहि— ।

**आदिमध्यावसानानां प्रागुत्पत्ते र्न सम्भवः ।**
**प्रवृत्तं कथमेकैकं सत्यभावे द्वये र्द्वयोः ॥५॥**[2]

§ ११ आदिमध्यावसानानां प्रागुत्पत्ते र्न सम्भवः । इहादिमध्यावसानान्युत्पादस्थितिभङ्गाः । ते तावदुत्पादप्रागवस्थायां सत्स्वरूपेण न विद्यन्त इति प्रागुत्पत्तेः संस्कृतं न सम्भवति । अथोत्पत्तिकाले गृहीतजन्मनः स्थितिकाले तिष्ठितो भङ्गकाले भङ्गो भवतीति मन्यते तदपि न युज्यते । तथाहि—

प्रवृत्तं कथमेकैकं सत्यभावे द्वयो र्द्वयोः ॥

§ १२ इहोत्पादकाले स्थितिभङ्गयो र्द्वयोरभावात् स्थितिभङ्गविरहितस्य संस्कृतस्याभावान्नास्त्युत्पादः । तथा स्थितिकाले भङ्गकाले च द्वयोर्द्वयोरभावादेकैकस्य प्रवृत्ति र्न सम्भवति । तदभावाच्च नास्ति संस्कृतम् ॥५॥

**३५६**

§ १३ इतश्च न युक्तः संस्कृतस्योत्पादः । यतः—

**अभावे परभावस्य स्वभावो नैव विद्यते ।**
**उभाभ्यां स्वपराभ्यां तदुत्पादो नैव विद्यते ॥६॥**[3]

---

१. V. यथा तस्यैव भावस्य तस्माज्जाति र्न विद्यते ।
भावस्यापि तथान्यस्य तस्माज्जाति र्न विद्यते ॥

२. V. आदि र्मध्यं तथान्तश्च जन्मनः प्राग्न वर्तते ।
द्वयोरभावे प्रारब्धमेकैकं जायते कथम् ॥

३. V. येन भावाद्विनान्यस्मात् स्वयं भावो न जायते ।
तेन स्वश्च परश्चेति द्वयो र्नूनं न सम्भवः ॥
तुलना—अविद्यमाने स्वभावे परभावो न विद्यते MK. १.३

§ १४ इह घटस्य स्वतः सिद्धं स्वरूपं नास्ति कपालापेक्षणात् । कपालानामपि तेषां नास्ति स्वभावः । शर्करापेक्षणात् । तस्मादेवमसत्यन्यभावे कपाले नास्ति घटस्य स्वभावः । तथा कपालानां कपालस्वभावाभावे तेषां घटमपेक्ष्यान्यत्वमपि न भवति । यस्मादेवं स्वभावं विना कस्यचिदप्यन्यत्वं नास्ति तस्मादुभयत उत्पादो न सम्भवति । अन्यच्च स्वरूपासिद्धेरन्यतोऽपि न सम्भवतीति नास्त्युत्पादः ॥६॥

३५७

§ १५ अन्यच्च । किमयमुत्पाद[१] उत्पत्तुः पूर्वं वा पश्चाद्वा युगपद्वानुबद्धः । तत्र यदि पूर्वम् । न युज्यते । आश्रयाभावात् । अथ पश्चात् । तदपि न युज्यते । अजातस्यासत्त्वादुत्पादवैयर्थ्याच्च । अथ युगपत् । तदा द्वयमप्युपकारनिरपेक्षम् । तस्मादेवं सति— ।

**पूर्वं पश्चाच्च युगपद्वक्तुं खलु न शक्यते ।**
**तस्माद्घटस्य जातेश्च युगपन्नास्ति सम्भवः ॥७॥**[२]

§ १६ यस्मादुत्पत्तुरुत्पादस्य च क्रमकथनं न सम्भवति तस्माद्घटस्य जातेश्च युगपन्नास्ति सम्भवः ॥ यदा सद्भाव एव नास्ति तदा घटो जायत इति न युज्यते ॥७॥

३५८

§ १७ अत्राह । अस्त्येव घटस्योत्पादः । यद्ययं नोत्पद्येत नास्य तदा जीर्णं रूपं भवेत् । दृश्यते चास्य हानिलक्षणं जीर्णं रूपम् । तस्माज्जीर्णरूपसद्भावे नास्त्येवोत्पादः । उच्यते । भवेदुत्पादो यदि जीर्णमिति किञ्चिद् भवेत् । न पुनः सम्भवति । कथमिति चेत् । इह यदि जीर्णमिति किञ्चित्स्यात् पूर्वमेव तज्जातं पश्चाद्वा जायते । उभयथापि न जायत इति प्रतिपादयन्नाह—

---

न स्वतो जायते भावः परतो नैव जायते ।
न स्वतः परतश्चैव जायते जायते कुतः ॥२१. ।१३.
न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥१.१.
स्वतो वा परतो वापि न किञ्चिद्वस्तु जायते ।।मा० का०, V.२२

१. T. अनुत्पादः

२. V. पूर्वं परं च युगपद्वक्तुमेव न शक्यते ।
घटस्य जन्मनश्चातो युगपन्नैव सम्भवः ॥

**नैव जीर्णं पूर्वजातं पूर्वजातत्वहेतुना ।**
**पश्चात्सवश्च जातं चेत्पश्चाज्जातं न वर्तते ॥८॥**[1]

§ १८. जीर्णस्य यज्जीर्णत्वं तद्यदि लोके वस्तुनः पूर्वजातं कल्प्यते घटस्य पूर्वं जाताया अवस्थाया जीर्णत्वं न युज्यते । तदा तस्या नूतनेति व्यपदेशात् । पश्चाज्जातायाश्चावस्थाया अविकलायाः पश्चाज्जातत्वेन नूतनत्वम् । कुतो जीर्णत्वम् । यदि पूर्वं जाता सा साम्प्रतं जीर्णेति । किं [सा] सैवान्या वा । यदि सा सैव तदा नूतनाया अवस्थाया अविनाशान्न सा जीर्णा । अथान्या । सापि तद्वज्जातेति नूतनैवेति न जीर्णा । तस्मादेवं सति जीर्णत्वाभावाद्दर्शित उत्पादो न सम्भवति ॥८॥

३५९

§ १९. इतोऽपि नास्त्युत्पादः । न हि स कालत्रयेऽपि युज्यते । तदेव प्रतिपादयन्नाह—

**वर्तमानस्य भावस्य तस्मादेव न सम्भवः ।**
**नाना गतात्सम्भवोऽस्ति नातीतानपि विद्यते ॥९॥**[2]

§ २०. वर्त्तमानोऽर्थः । स खलु तस्मादेव न सम्भवति । हेतुफलयोरयौगपद्यात् । यौगपद्यभावेऽपि हेतुफलभावानुपपत्तेः ।"नानागतात्सम्भवोऽस्ति ।"

अनागतस्यासद्भावेन निरात्मकत्वात् । नातीतादपि सम्भवो विद्यते । अतीतस्याप्यसद्भावात् । यदा कालत्रयेऽपि सम्भवो नास्ति तदा नास्ति स्वरूपेणोत्पाद इति स्थितम् ॥९॥

३६०

§ २१. अन्यच्च । यदि तेषां भावानां स्वभावेन सद्भावस्तदा स्वभावस्यानिवृत्ते र्जाता भावाः स्वभावेनानुद्भूतत्वादुद्भवाभावात्कुत आगच्छन्ति । निरुद्धस्वभावत्वेऽपि भूत्वा सद्भावाभावात्क गच्छन्ति । न चेदं सम्भवति । उक्तं हि—

---

१. V. पूर्वस्य पूर्वजात्वाल्लाभः कोऽपि न विद्यते ।
पश्चात्सञ्जायमानोऽपि पश्चाज्जातो न विद्यते ॥

२. V. अनागतान्न भवति नातीतादपि जायते ।
वर्तमानस्य भावस्य तस्मादेव न सम्भवः ॥

भगवता—एवं खलु भिक्षव उत्पद्यमानं न कुतश्चिदागच्छति निरुध्यमानं न क्वचिद् गच्छति[1]। एवं मार्यहस्तिकक्ष्यसूत्रेप्युक्तम्[2]—

यदि कोचि धर्माण भवेत्स्वभावः, तत्रैव गच्छेय जिनः सश्रावकः।
कूटस्थधर्माण सिया न निर्वृती, न निष्प्रपञ्चो भुवि जातु पण्डितः ॥[3]

तस्मादेवं यस्यार्थस्य— ।

**उत्पन्नस्यागति र्नास्ति निरुद्धस्य गतिस्तथा।**
**एवं सति कथं नैव भवो मायोपमो भवेत् ॥१०॥**[4]

§ २२. ततो नूनं नास्ति स्वभावः। यदि तस्य स्वभावो नास्ति किमस्तीति चेत्। उच्यते। यत्संक्लेशव्यवदानहेतुनिबन्धनं कृतकं रूपं प्रतीत्यसमुत्पन्नं तदस्ति मायाकृतगजतुरङ्गादिवत्। तत्त्व विपर्यस्तैर्बालैः सस्वभावमेव कल्प्यते। आर्यैस्तु मायामरीचिवन्निःस्वभावोऽर्थो यथावत्परिच्छिद्यते। यथोक्तं सूत्रे

सत्वो नरो मानव जात युज्यते।
जातो मृतोऽस्मिन्न च कोचि जायति।
मायैव धर्मा हि स्वभावशून्या
ज्ञातुं समर्थास्तु न भोन्ति तीर्थिकाः॥

इति। आचार्योऽप्यार्यज्ञानमपेक्ष्य विचारफलमुद्भावयन्नाह
एवं सति कथं नैव भवो मायोपमो भवेत्॥

§ २३. इति। प्रतीत्यसमुत्पन्नं हि यथावद्दृष्टं मायिकसदृशं वन्ध्यापुत्र इव नास्ति। यद्यनेन विचारेणोत्पादस्य सर्वथा प्रतिसिद्धत्वात्संस्कृतं सर्वथा नोत्पद्यत इति प्रतिपिपादयिषितं तदा तन्मायावदेव न जायते। वन्ध्यापुत्रादिभिरुपमायां तु प्रतीत्यसमुत्पादाभावप्रसङ्गभयान्न तैरुपमीयते। अपि तु तदविरुद्धैर्मायादिभिः।

---

१. परमार्थशून्यता, बोधिचर्यावतारपञ्जिकाया (पृ० ५८१) मुद्धृतः।
२. उद्धृतम्--MV. ३८८, ५१४; SS. पृ० १३३, ४०४; SS. पृ० ६७; MVT. ६५-७५
३. उद्धृतम्--MV. ३८८, ५१४;
४. V. उत्पन्नस्यागति र्नास्ति निरुद्धस्य तथा गतिः।
भवो मायाप्रतीकाशः कथमेवं न जायते॥

तस्मान्माया कृतस्येव भवस्याऽवस्तावलोकनेऽसारसंसारसर्वरागक्षयादिमुक्ति र्भविष्यतीतीह न किञ्चदाचार्यस्यायुक्तम् । इह प्रतीत्यसमुत्पादानपवादेन लौकिक सर्वव्यवस्थाया अविनाशे यथावत्सम्यगवगमान्मोक्षः सिध्यतीति ॥१०॥

३६१

§ २४. एवं संस्कृतं मायाकृतमिवोक्त्वा तल्लक्षणान्यपि न सद्रूपाणीति प्रतिपादयन्नाह –

* उत्पादस्थितिभङ्गानां युगपन्नास्ति सम्भवः ।
क्रमशः सम्भवो नास्ति सम्भवो विद्यतेकदा ॥११॥

§ २५. अन्योन्य विरोधात्तावदुत्पादस्थिति भङ्गानामेकस्मिन् क्षणे न सम्भवः । अमशोऽपि नास्ति सम्भवः । द्वयोर्द्वयोरभाव एकैकस्यासम्भवात् । क्रमयौगपद्याभ्यामन्यत्र सिद्धे हेत्वन्तरानवलोकनादुक्तं "सम्भवो विद्यते कदा ॥"

३६२

§ २६. अन्यच्च । उत्पादादीनामेषां संस्कारस्कन्धान्तर्गतत्वाद् संस्कृतत्वम् तस्मान्नियतं तेषामप्यन्ये संस्कृतलक्षणैरेकान्तेन भवितव्यमिति प्रतिपादयन्नाह— ।

उत्पादादिषु सर्वेषु सर्वेषां सम्भवः पुनः ।
तस्मादुत्पादवद्भङ्गो भङ्गवद् दृश्यते स्थितिः ॥१२॥[1]

§ २७. उत्पादादिषु संस्कृतत्वे नाभ्युपगतेषुवुत्पादस्थितिभङ्गेषु सर्वेषां सम्भवो भवेत् । पुनः सम्भवे चोत्पादस्योत्पादान्तरं भवेत् । यथोत्पादस्योत्पादान्तरन्याय [ स्तथा ] तस्माद्उत्पादवद्भङ्गः । भङ्गस्यापि संस्कृतत्वेन लक्षणत्रयप्रयोगः । तस्माद् भङ्गस्यापि भङ्गान्तरसद्भावाद् भङ्गस्य भङ्गो भवेत् । तेषामप्यन्ये तेषामप्यन्य इत्यनवस्था । अनवस्थायां च सर्वेषां भावानामसिद्धे नं सन्ति स्वभावेन संस्कृतलक्षणानि ॥१२॥

३६३

§ २८. अपि च । एषां लक्षणानां सम्भवे लक्ष्यादभिन्नरूपेणाभिन्नरूपेण वा लक्षणकर्मणि प्रवृत्तिः । तत्र तावत् —

---

१. V. उत्पादादिषु सर्वेषु पुनः सर्वस्य सम्भवः ।
तस्मादुत्पादवद् भङ्गो दृश्यते भङ्गवत्स्थितिः ॥

**लक्ष्यं चेल्लक्षणादन्यल्लक्ष्यस्या नित्यता कुतः ।**
**चतुर्णामथवा व्यक्तं सद्भावो नैव विद्यते ॥१३॥**[1]

§ २९. यथा शीतोष्णसुखदुःखादीनामेकैकस्याभावादन्यत्वं वर्तते, तथा लक्ष्यमपि लक्षणाद् भिन्नं प्रवर्तते चेदनित्यत्वं न भवेत् । संस्कृतं च विनानित्यत्वं न सम्भवतीति नास्यान्यत्वं युक्तम् । अथास्य दोषस्य परिजिहीर्षया लक्ष्यलक्षणयोरन्यत्वं कल्प्यते तदायमपरो दोषः । तथाहि "चतुर्णामथवा व्यक्तं सद्भावो नैव विद्यते ।।" यदि लक्षणत्रयं लक्ष्यं चैकमेवाभ्युपगम्यते तदा लक्षणत्रयं लक्ष्यं चेति चत्वारोऽपि भावा न भवेयुः । कथमिति । इहैकयाभ्युपगमे लक्ष्यं न युज्यते । लक्ष्यमपि च लक्ष्यं न युज्यत इति चत्वार्यपि न भवति । अपि च स्वरूपासिद्धया तत्त्वमन्यत्वं च नाभ्युपगन्तव्यम् ।।१३।।

३६४

§ ३०. अत्राह । सन्त्येवोत्पादादयस्तेषां निमित्तहेतुसद्भावात् । इहाङ्कुरादयस्तां हेतुसामग्री प्रतीत्योत्पद्यन्त इति तदभिज्ञा व्याचक्षते । यद्युत्पादादयो न स्युर्हेतुसामग्री व्यर्था स्यात् । न तु व्यर्था । तस्मात्सन्त्येवोत्पादादयः । उच्यते । स्युरुत्पादादयो यदि किञ्चित्कुतश्चिदुत्पद्येत । न तु सम्भवतीति प्रतिपादयन्नाह— ।

*** न भावाज्जायतो भावोऽभावोऽभावान्न जायते ।**
**नाभावाज्जायतेऽभावोऽभावो भावान्न जायते ।।१४।।**[3]

§ ३१. भावस्तावत्सिद्धरूपोऽङ्कुरो भावादविकृताद्बीजाज्जायत इति न सम्भवति । न ह्यविक्रियमाणस्य बीजस्य जनकत्वं युज्यते । न च सिद्धस्याङ्कुरस्य भावस्य रूपं पुनरपि जायत इति युक्तम् । अभावादपि न जायते । अभावादग्निदग्धे बीजे फलजनकशक्तिरभाव उत्पत्तिलक्षणवतो भावस्य पुनरप्युत्पादो न भवतीत्यभावान्न जायते । अभावादप्यभावो न जायते । न ह्यभावात्किञ्चिदुत्पत्तुं शक्नोति । अभावस्य वन्ध्यापुत्रादिवदुत्पादासम्भवान्नभावादप्यभावो

---

१. V. भिन्नं चेल्लक्षनाल्लक्षणं लक्ष्यस्यानित्यता कुतः ।
चतुर्णामिपि तद्व्यक्तं सत्स्वभावो न विद्यते ।।

२. मूलमाध्यमिक कारिका ,७ — लक्ष्य ,लक्षण, भाव, अभावश्च ।

३. V. भावो न जायते भावाद्भावोऽभावान्न जायते ।
न भावो जायतेऽभावादभावो भावतो न च ।।
तुलनार्थ – माध्यामिककारिका, २१. १२

जायते। भावादप्यभावो न जायते। उक्तदोषवत्प्रसङ्गात्। तथा च भावादप्यभावो न जायते। यदा भावादभावश्च भावोऽभावश्च न जायते तदा जाति नैं सम्भवतीति कोऽस्ति हेतुप्रत्ययसामग्र्याभावः तुच्छोऽयम् ॥१४॥

३६५

§ ३२. इतोऽपि नास्ति भावो। उत्पादभङ्गयोरयुक्तत्वात्। इहोत्पादो भावस्य स्वभावार्थोऽभावस्य वा स्वभावार्थः कल्प्यते। एवं भङ्गोऽपि कल्प्यते चेद् भावस्या-भावस्य वा कल्प्यते। सर्वथापि न सम्भवतीति प्रतिपादयन्नाह—

**भावो नैव भवेद्भावोऽभावो च भवेन्न भावो।**
**भवेद्भावो नाभावो भावोऽभावो भवेन्न च ॥१५॥**

§ ३३. तत्र भाव इति जातो लब्धात्मभावोऽर्थः। स पुनरपि भावो न भवेत्। पुनरपि न जायेत सत उत्पादवैयर्थ्यात्। एवं च "भावो नैव भवेद्भावः।" अभा-वोऽपि भावो न भवेत्। अभाव इत्यसन् कथं भावो भवेत्? वन्ध्यापुत्रस्याप्युत्पाद-प्रसङ्गात्। एवं सत्यभावोऽपि भावो न भवेत्। एवं तावद्भावस्य न भावो न चा-भावो भवेदिति न सम्भवत्युत्पादः। भङ्गोऽप्यस्य न सम्भवति। कथमिति। अभावस्-तावन्नाभावो भवेत् न ह्यसतः खरविषाणस्येवाभावः। तस्मादभावो नाभावो भवेत्। भावोऽपि नाभावो भवेत्। परस्परविरोधात्। अभावाभावे भङ्गाभावः। उत्पादभङ्गाभावे च नास्ति संस्कृतमिति सिध्यति। यथोक्तं भगवता—

संस्कृतऽसंस्कृतसर्व विविक्ता, नास्ति विकल्पन तेषमृषीणाम्।
सर्वगतीषु असंस्कृत प्राप्ता, दृष्टिगते हि सदैव विविक्ता ॥[1]

इति ॥१५॥

३६६

§ ३४. अत्राह। जातो न जायतेऽजातोऽपि न जायते। निषिद्धो हि भावा-भावयो र्जातिः। किं तर्हीति चेत्। जायमानोऽर्थो जायते। इदमपि न युक्तमिति प्रतिपादयन्नाह—।

*** जायमानार्द्धजातत्वाज्जायमानो न जायते।**
**अथवा जायमानत्वं सर्वस्यैव प्रसज्यते ॥१६॥**[2]

§ ३५. "जायमानार्द्धजातत्वाज्जायमानो न जायते"। यदि ह्यस्य किञ्चिज्जातं किञ्चिदजातं तज्जायमानं तर्ह्येवं न तज्जायमानम्। जाताजातानुप्रवेशेन नापर-स्तृतीयो जायमानस्य कालाकारः। तस्मादसत्त्वेन जायमानो न जायते। यद्यभय-

---

१. MV. पृ० १७९।    २. MV. पृ० ८०।

रूपं जायमानम् । तस्मादेव तस्य यत्किञ्चिज्जातं तज्जातान्तर्गतत्वान्न जायते । भावो न जायत इत्युक्तः । अथ यदि जाताजातयो र्जायमानत्वं कल्प्यते । तथा सत्यतीतानागतयो र्जायमानत्वं स्यादिति प्रतिपादयन्नाह

§ ३६. "अथवा जायमानत्वं सर्वस्यैव प्रसज्यते ।।" इत्युक्तम् । प्राप्तजन्मव्यापारो जातो नावतिष्ठत इत्यतीत एव भवति । अजातोऽनागतो भवति । तस्मादेवेह जायमानस्य जातिः कल्प्यते । अथवा कालत्रये सर्वमेव जायमानान्तर्गतमथवा न किमपि जायमानमस्तीति स्थितम् ।।१६।।

३६७

§ ३७. अपि च । यो जायमानो भावो वर्तत इति परिकल्प्यते स किं जायमानात्मना कार्य उत जायमानात्मनाऽकार्यः । उभयदर्शनेऽपि दोष इति प्रतिपादयन्नाह—

**जायमानात्मना कार्यो जायमानो न जायते ।**
**जायमानात्मनाऽकार्यो जायमानो न जायते ।।१७।।**[१]

§ ३८. यो जायमानस्वभावः स तदात्मना व्यवस्थिते र्न कार्यः । यो जायमानात्मनाऽकार्यः सोऽपि न जायमानो भवेत् । जायमानात्मनाऽभूतत्वात् । यो जायमानात्मना कार्यः सोऽप्यजायमान इव जायमानो न भवतीति न जायमानः । जायमानाभावाच्च जायमानो न जायते ।।१७।।

३६८

§ ३९. अत्राह । अस्त्येक स जायमानोऽर्थोऽतीतानागतयो र्मध्येऽवस्थानात् । इहातीतानागतयो र्मध्ये जायमानो नाम विद्यते । यदि न विद्येत किमपेक्ष्यातीतानागतयो र्व्यवस्था स्यात् । तत्सद्भावे हि सोऽनागतोऽर्थोऽनागतो नाम अतिक्रान्तश्च सोऽतीतो नामोच्यते । ततो जायमानापेक्षणादेव तत्कालद्वयं युज्यते । उच्यते ।

**अन्तरेण विना यस्य द्वयस्यास्ति न सम्भवः ।**[२]
**जायमानो न तस्यास्ति स्यात्तस्याप्यन्तरं यतः ।।१८।।**

§ ४० यस्य वादिनो[३]ऽन्तरेण विना मध्यं विनातीतानागतस्य द्वयस्य नास्ति सम्भवः [तस्य][४] जायमानो नास्ति । कथं कृत्वा । "स्यात्तस्याप्यन्तरं यतः ।" यथा जायमानस्यातीतानागतान्तर्वर्तित्वमेवं तस्यापि जायमानस्य जाता-

---

१ V. जायमान स्वरूपेण जायमानो न जायते ।
जायमानास्वरूपेण जायमानो न जायते ।।

२. V.

३. T. वादिनो दर्शने

४. T.; S. विच्छेो वर्तते

जातरूपस्य मध्येन भवितव्यं यदपेक्ष्य जाताजातव्यवस्थानं स्यात् । तच्चैतदशक्यं जाताजातयोरन्तरा तृतीयं जायमानं नाम व्यवस्थापयितुम् । सर्वत्रैव जाताजातयोरन्तरा जायमानकल्पनानवस्थाप्रसङ्गात् ॥१८॥

३६९

§ ४१. अत्राह ।[1] नैवार्द्धजातो जायमानो यतो यथोपवर्णितदोषप्रसङ्गः स्यात् । किं तर्हि । यस्य निरोधेन[2] जातः पदार्थो भवति स जात[3]प्रागवस्थारूपोऽर्थो जायमान इत्युच्यत[4] इति तदेव प्रतिपादयन्नाह—।

* जायमाननिरोधेन जात उत्पद्यते यतः ।
ततोऽन्यस्यापि सद्भावो जायमानस्य दृश्यते ॥१९॥

यस्माज्जायमाननिरोधेन जातः पदार्थो भवति तस्मादर्थजातव्यतिरेकेणाप्यस्त्येव जातमानः पदार्थ इति ॥१९॥

३७०

§ ४२. अत्रोच्यते —

जातो यदा तदा नास्ति जायमानस्य सम्भवः ।
जात उत्पद्यते कस्माज्जायमानो यदा तदा ॥२०॥

§ ४३. "जातो यदा तदा नास्ति जायमानस्य सम्भवः । यदा तवदयं पदार्थो जात इत्युच्यते तदा जायमानो[5] नास्ति । जायमानासम्भवाच्च जात इत्येव[6] नास्ति येन[7] जातेन जायमानोऽनुमीयेत । अथ जातोऽपि जायमानः स्यात्तस्य तद्युत्पादासम्भवो जायमानत्वादिति प्रतिपादयन्नाह "जात उत्पद्यते कस्माज्जायमाने यदा तदा ॥"

यदा जात एवार्थो जायमान इत्युच्यते तदा स जायमानोऽर्थः कस्मादुत्पद्यत इति परिकल्प्यते । सिद्धत्वादुत्पाद परिकल्पोऽस्य न युक्त इत्यभिप्रायः । ततश्च जायमानो जायत इति न युज्यते ॥२०॥

३७१

§ ४४. अत्राह । जन्माभिमुखत्वादजातोऽपि[8] जायमानो जात इत्युच्यते । ततश्च जात एव जायमानो न चास्योत्पादवैयर्थ्यमिति । एवमपि यदि ।

---

१. T. अत्राह यस्य ।
२. T.; S. निरोधे ।
३. T.; S. जातः ।
४. T. इति ।
५. ?. जायमानं ।
६. T; S. एवं ।
७. T.; S. अतो ।
८. T. अजातोऽपि पदार्थोऽयं ।

*** अजातो जात इत्येव[1] जायमान कृतः[2] किल।**
**भेदाभावाद्घटो[3]ऽभावस्तदा किं न विकल्प्यते ॥२१॥**

§ ४५ अजातो जात इत्येव जायमान कृतः किल। यद्यजात एव जायमानः पदार्थो जन्माभिमुख्यात्परेण जात इति कल्पितो[4] जाताजातयोः "भेदाभावाद्घटोऽभावस्तदा किं न विकल्प्यते॥" जातावस्थ एव हि पदार्थो घट इत्यभिधीयते। जाताजातयोश्चैक्यात् प्रागभावेन जातोऽपि घटोऽभाव एवेति स्यात्। न चैतत्सम्भवतीत्ययुक्तमेतत् ॥२१॥

**३७२**

§ ४६ अथापि स्यात्। नैव जायमानाजातयो भेदाभावः। उत्पत्तिक्रियया-विश्यमानो हि पदार्थो जायमान इति। उच्यते। स च[5]

*** अनिष्पन्नोप्यजातात्तु जायमानो बहिष्कृतः।**
**तथापि जायतेऽजातो[6] यतो जाताद्बहिष्कृतः ॥२२॥**

§ ४७ अनिष्पन्नोऽप्यजातात्तु जायमानो बहिष्कृतः। यद्यप्यनागतादनिष्पन्न-रूपोऽपि पदार्थो जायमानो बहिर्व्यवस्थितः। "तथापि जायतेऽजातो यतो जाता-द्बहिष्कृतः॥" यथाऽजाताज्जायमानो बहिष्कृतः क्रियावेशादेवं जातादपि बहिष्कृत एवा[7]निष्पन्नरूपत्वात्। ततश्चाजात एव जायत इत्यापन्नमिति नास्ति जायमानो[8] नाम ॥२२॥

**३७३**

§ ४८. न च केवलं जाताद्बहिर्भूतत्वादजात एव जायते। इतश्चाजात एव जायते। [9]यस्मात्परस्य—।

**नासीत्प्राग् जायमानोऽपि पश्चाच्च किल विद्यते।**
**तेनापि जायतेऽजातो नाभूतो नाम जायते ॥२३॥**

§ ४९. [10]नासीन्नाभूदित्यर्थः। योऽसाविदानीं जायमानत्वेन व्यपदिश्यते स नासीत्[11]। [12]वर्तमानावस्थायाः प्रागतीते[13] काले स जायमानोऽर्थोऽविद्यमानोऽपि पश्चात्किल जायमानो भवति। अतोप्यजात एव जायमानो भवति जनिक्रिया-वेशकाले। ततश्चास्याजातत्वेनाभूतत्वम्। न चाभूतस्यालब्धात्मभावस्य निरा-

---

१. T; S. इत्येवं।
२. T.; S. कुतः।
३. S. घटाभावाद् घटो।
४. T. एवं सति जाताजातयोः।
५. T. न तत्र "स च" शब्दो।
६. S. जातो।
७. T. एव सः।
८. S. जायमानं।
९. T. तथाहि।
१०. S. आसीच्छब्दश्चिरानुक्रान्ताभिधायी।
११. T. जायमानावस्थायाः, प्राक्कुत्रापि नास्तीति।
१२. S. प्राक्शब्दस्तु अवधिवचनः।
१३. T. "वर्तमानावस्थायाः प्राक्" इति तत्र न वर्तते।

अथा[1] अग्निक्रिया प्रवर्तितुमुत्सहत इत्याह नाभूतो नाम जायते इति ॥२३॥

३७४

§ ५०. अपि च ।

*** जायतेऽस्तीति निष्पन्नो नास्तीत्यकृत उच्यते ।**
**जायमानो यदा नास्ति[2] तदा को नाम स स्मृतः ॥२४॥**

§ ५१. अस्तीत्यनेन निष्पन्न उच्यते । निष्पन्न एव हि पदार्थोऽस्तीति जायते । अस्तीति भवतीत्यर्थः । नास्तीत्यनेनाप्यकृतोऽनिष्पन्न उच्यते । तदेत-दवस्थाद्वयं विरहय्य "जायमानो यदा नास्ति तदा को नाम स स्मृतः ॥"

इत्थमयं पदार्थो भवतीति जायमानावस्थो भावो यदा न शक्यते व्यपदेष्टुं तदासावनिर्धार्यमाण स्वरूपत्वादसन्नेवेति युक्त[3]मवसातुम् ॥२४॥

३७५

§ ५२. तदेवं यथोपवर्णितेन विचारेण जायमानस्यासम्भवात् ।

**कारणव्यतिरेकेण यदा कार्यं न विद्यते ।**
**प्रवृत्तिश्च निवृत्तिश्च तदा नैवोपपद्यते ॥२५॥**

**इति योगाचारे चतुःशतके संस्कृतार्थप्रतिषेध-**
**भावनासन्दर्शनं पञ्चदशं प्रकरणम् ।**

§ ५३. यदा कारणात्पृथग्भूतं कार्यं विचार्यमाणं न सम्भवति तदा निराश्रया-प्रवृत्तिः कार्यस्योत्पादो निवृत्तिश्च कारणस्य विनाशश्च न विद्यते । यथोक्तं भगवता—

सत्वो नरो मानव जात युज्यति, जातो मृतोऽस्मिन्न च कोचि जायति ।
मायेव धर्मा हि स्वभावशून्या, ज्ञातुं समर्थास्तु न भोन्ति तीर्थिकाः ॥

इति विस्तारः । तथा —

**संक्रान्तिजन्ममृत्युश्चासंक्रान्तिजन्ममृत्यवः ।**
**जानाति य इदं तेन समाधिर्नैव दुर्लभः ॥**

इति । ][4] तदेवं परीक्ष्यमाणा भावाः स्वभावसिद्धा न भवन्तीति सैव[5] मायो-पमताव[6] शिष्यते[7] — भावानाम् ॥२५॥

---

१. T. न तत्र शब्दोऽयं वर्तते ।
२. T.; S. भावास ।
३. T. अशक्यं ।
४. T.; S. न स्वीकरोति ।
५. S.; T. सैवं ।
६. S. मायापमता गत्वा ।
७. T. अवशिष्यते एकैकाशः ।

# षोडशं प्रकरणम्

## गुरुशिष्यविनिश्चयभावनासन्दर्शनम्

३७६

§ १. इदानीं[1] समनुक्रान्तैः पञ्चदशभिः प्रकरणैः शास्त्रकार्यं परिसमाप्य शास्त्रारम्भप्रयोजनं दुर्वादाशेष[2]परिहारं चोपदर्शयन् षोडशं प्रकरणमारभते— ।

*** केनचिद् हेतुना शून्यमशून्यमिव दृश्यते ।**
**तस्य प्रकरणैः सर्वैः प्रतिषेधो विधीयते ॥१॥**

§ २. नानवधीर्य यथार्थां शून्यतां कश्चिच्छक्तः संसारे सङ्कमवधूय निर्वाणस्पृहा[3]-मुत्पादयितुम् । स च शून्यता[4]र्थो जगता[5]मतीवोत्रासकरत्वादप्रियावेदननिपुणपुरुषेण राज्ञः प्रिय[6]भार्यामरणक्रमावेदन सौमनस्योत्पादनवत् कयापि युक्त्या विदुषामव-तीर्यः[7] । अहङ्कारममकारस्नेह[8]विपर्यस्तो लोकोऽनित्य एव वस्तुनि क्षणभङ्गादर्शनात्[9] संस्कारमात्रप्रवाहस्य सम्यगर्थानवसायाच्छून्यतादर्शनाविबन्धभूतां नित्यतामवधार्य प्रत्यवतिष्ठमानो जगदशून्यमेव प्रतिपन्नः । तदस्याशून्यता[10] प्रतिषेधाय प्रथमप्रक-रणारम्भ इत्यादि योज्यम् । स्वभावविरहितार्थं श्चात्र शून्यतार्थं इत्यसकृदावेदितम् । तदेवं केनचिद्धेतुना स्वभावरहितमपि वस्त्वेवाशून्यं येषा ख्याति तेषां तस्यासद्ग्राह-हेतोः सर्वैः पञ्चदशभिरपि प्रकरणैः प्रतिषेधो विधीयते ॥१॥

३७७

§ ३. यद्येवमर्थमेषां प्रकरणानामारम्भो नन्वत एवाशून्यत्वं सिद्धं भावानाम् । तथाहि । एषां प्रकरणानां वक्ता तावद् भवानस्ति । प्रकरण[11] [ । नामभिधेयोऽ-शून्यता ][11] हेतुर्व्यावर्तको हेतु[12]रस्ति । वचनं चेदं प्रति विशिष्टार्थकृतावधि ध्वनि समुदायरूपं पञ्चदशप्रकरणात्मकमस्तीति वक्तृवाच्यवचनाना सद्भावाद् सिद्धमशून्यत्वं भावानामिति व्यर्थ एव भवतः सर्वप्रकरणप्रारम्भपरिश्रमायास इति प्रतिपादयन्नाह

---

१. T.; S. न स्वीकरोति ।
२. T.; S. कृत्वान्यशेषपरिहारं ।
३. T. निर्वाणरतिं ।
४. T. स च सर्वधर्मस्वभावशून्यता ।
५. T. जगतां आत्मात्मीयाभिनिवेश-पाशवशीकृतानामश्रुतवताम् ।
६. T. भार्यामरणक्रमा ... ।
७. T. विदुषामवतार्या ।
८. T. अहङ्कारममकारग्राहविपर्यस्त ।
९. T.; S. क्षणभङ्गदर्शनात् ।
१०. T. शून्यतादर्शन...
११. T.; S. विच्छेदो वर्तते तत्र ।
१२. T. हेतुरपि ।
१३. T. न तत्र 'प्रति' इति शब्दो विद्यते ।

* यदा वक्तास्ति वाच्यं च न शून्यमिति युज्यते ।
यं प्रतीत्योद्भवेत् सर्वं स त्रिष्वपि न विद्यते ॥२॥[1]

§४. "यदा वक्तास्ति वाच्यं च न शून्यमिति युज्यते" । च शब्दो वचनसंग्रहार्थः । यदा भवान् वक्तास्ति । वाच्यं पञ्चदशभिः प्रकरणैं र्व्युत्पाद्योऽर्थोऽस्ति । भवतो वचनं च शून्यताप्रसाधकमस्ति तदा सर्वे भावः सिध्यन्ति । नास्ति वन्ध्यापुत्रः । यस्यार्थस्य वक्ता न युज्यते तस्य वचनमपि विध्यते । तस्य वचनेन व्युत्पाद्यो-ऽर्थोऽपि न विद्यते । भावानां त्वेतत्रितयसद्भावात् सिध्यति सस्वभावत्वम् । उच्यते । नैतद्युक्तम् । कथमिति चेत् । एवम्—"यं प्रतीत्योद्भवेत्सर्वं स त्रिष्वपि न विद्यते ॥"

§ ५. स्वभाव इति वाक्यशेषः । इह यो वक्ता सोऽप्यस्माकं दर्शनं प्रतीत्यसमुत्पन्नः कर्तृत्वेन व्यवस्थाप्यते । वचनं वाच्यं च प्रतीत्य वक्ता प्रज्ञप्यते नावचनः[2] । यदैवं तदा नास्ति वक्तुः स्वभावाः । ततश्च वाच्यवचनयोरपि नास्ति वक्तृस्वरूपम् । यदि स्याद् व्यर्थ एव स्यात्पुरुषः । ततो नास्ति तत्र वक्तुः स्वभावो रूपं वा । तस्माच्छून्यम् । तथा वाच्यमपि वक्तारं वचनं च प्रतीत्य प्रज्ञपयिष्यते । स्वभावो नास्तीत्यादिति च वचनेऽपि योजयितव्यम् । तस्मात् तेषा त्रयाणामपि स्वभावस्त्रिष्वपि न विद्यत इति सिध्यत्येव वक्तृवाच्यवचनानां स्वभावशून्यत्वम् । तस्माददोषः ।

३७८

§ ६. अत्राह । यदि सर्वं शून्यं तदेन्द्रियार्थयोः सर्वथाभावाज्जगत्खरविषाणवदापद्येत । सत्यरूपौ चैताविन्द्रियार्थाविति सस्वभावा एव सर्वे भावाः । अत्रोच्यते—।

यदि शून्यस्य दोषेणाशून्यमेव हि सेत्स्यति ।
किमशून्यस्य दोषेण शून्यमेव न सेत्स्यति[3] ॥३॥

§ ७ यदि शून्यस्य दोषेणाशून्यमेव हि सेत्स्यति । एवं तर्हि तद्व्यतिरेकमुखेन भवतः ।"किमशून्यस्य दोषेण शून्यमेव न सेत्स्यति ॥"

---

१. V. यदा वक्तास्ति वाच्यं च न शून्यं नाम युज्यते ।
यः प्रतीत्यसमुत्पादः स त्रिष्वपि न विद्यते ॥

२. नावाच्यववचनः ।

३. V. शून्यस्य दोषेण यदा शून्यं सिद्धं भविष्यति ।
अशून्य दोषेण कुतः शून्यत्वं नैव सेत्स्यति ॥

यदि जगच्छून्यं न भवेत्तदा तदविपरीत स्वभावेनावस्थानान्नित्यमजातम-निरुद्धं च भवेत् । न चैवं भवति । प्रतीत्योपलम्भात् । एवमशून्यदोषेण भवतः शून्यतार्थः किं न सेत्स्यति । शून्यतावादापकरणारम्भेण स्वपक्षसिद्धिरपि न युज्यते ॥३॥

३७९

§ ८. पक्षान्तराभ्युपगमवादेनावश्यम्— ।

**वारणं परपक्षस्य सिद्धिः पक्षस्य चात्मनः ।**
**प्रीतिश्चेद्दूषके पक्षे विद्यते किं न साधके ॥४॥**[1]

§ ९. "वारणं परपक्षस्य सिद्धिः पक्षस्य चात्मनः ।" द्वयोर्नाम भवतः शून्यतावादनिराकरणारम्भस्य प्रवृत्तेः । "प्रीतीश्चेद् दूषके पक्षे विद्यते किं न साधके ॥"

दूषके पक्ष इव भवतो यः साधकः पक्षस्तत्रापि प्रीति र्भवेत् । तस्माद्यदीह सर्वं साध्यसमं न स्यात्स्वपक्षसाधनाय तावत्किञ्चिदप्युपपत्ति र्वाच्या । शून्यतावादे तु सर्वं साध्यसमम् । तस्मात्स्वपक्षसिद्धि सामर्थ्यहीनपक्षग्रहणं दृश्यते । पक्षानासक्तमध्यमकमार्गे प्रविष्टस्य तु भवतो दर्शनादर्शनाविरोधाद्विरोधस्यापि स्थापनं न सम्भवति ॥४॥

३८०

§ १०. अथ तावद्भवान्मन्यते शून्यतावादो पक्षोऽय न परीक्षोचित इति नास्ति । तस्मादस्याभाव एव सिद्धेः पक्षान्तरभावान्निराकर्तृणां सिध्येदस्माकंपक्ष इति । तदपि नास्ति ।

**अस्ति यन्न परीक्षायां पक्षः स न भवेद्यदि ॥**
**एकत्वादि त्रयं सर्वमपि पक्षस्ततो न हि ॥५॥**[2]

§ ११. यथास्माकं पक्षः परीक्षायामभावान्नास्ति तथा वादिनामेकत्वान्यत्वानभिलाप्यपक्षा अपि विचारे न सन्तीति तेऽपि पक्षा नैव स्युः । तस्मात्परीक्षायां सर्वेऽपि पक्षा न भवन्तीति न युक्तो भवतः पक्षपरिग्रहः[3] ॥४५॥

---

१. V. अन्यपक्षनिषेधेन स्वपक्षः सिद्धिमान् यदि ।
दुष्टे पक्षे स्वपक्षोऽयं सिद्धिं किं नाम नाप्नुयात् ॥

२. V. निग्रहे सति येनायं पक्षो नाम न जायते ।
एकत्वादि त्रयं सर्वं तेन पक्षो न जायते ॥

३. द्रव्यत्वं, एकत्वं, सत्त्वं चेति त्रयो भावाः (३८५), वृत्त्यनुसारेण तु एकत्व, अन्यत्व, अनभिलाप्यश्च (३४६); एकत्वं, अन्यत्वं, उभयं, नोभयं, चेत्येकत्वादयः, लङ्कावतार, पृ० १७६; सर्वं भो गौतम एकत्वं सर्वं अन्यत्वं सर्वं उभयत्वं सर्वं अनुभयत्वम् ॥

३८१

§ १२. अत्राह। भवता शून्यतयैकत्वादयः सर्वे पक्षा अयुक्ता उक्ताः।

**व्यर्थस्तत्र शून्यहेतुर्यत्र प्रत्यक्षतो घटः।**
**इहान्यसमयोद्भूतो हेतुरन्यत्र सन्न हि ॥६॥**[१]

§ १३. व्यर्थस्तत्र शून्यहेतुर्यत्र प्रत्यक्षतो घटः। यत्र घटः प्रत्यक्षेणोपलब्धः पक्षस्तत्र शून्यहेतुर्निरर्थकः। असन् वन्ध्यापुत्रो न कस्यचित्प्रत्यक्षः। घटस्त्वयं प्रत्यक्षः। तस्मात्प्रत्यक्षहेतोरपाकरणाय शून्यताहेतु र्न युज्यत इति चेत्। ननु पूर्वं घटप्रत्यक्षस्यापाकृतत्वादस्त्यस्माकं तेन विरोधः। घटप्रत्यक्षत्वं भवतापि कृतं न मया। तस्माद्घटो भवतो न प्रत्यक्षः। अस्माकं तु घटस्य प्रत्यक्षत्वान्नेदं युक्तमिति चेत्। नेदमस्ति।

§ १४. "इहान्यसमयोद्भूतो हेतुरन्यत्र सन्न हि॥" इह शून्यतायुक्तिवादे समयादन्यत्र प्रसिद्धो हेतुर्नाभ्युपगम्यते। अन्यसमयतत्त्वस्यायुक्तत्वेन प्रतिपिपादयिषितत्वात्। यत्र वादिनां दर्शनं समं तत्र द्वयोरभ्यर्थस्याभ्युपगमाद्युक्तिमेव प्रामाण्यम्। युक्तिवादे सोपपत्तिकोऽर्थः सिद्धान्तः परिगृह्यते। तस्मादिहान्यसमयप्रसिद्धेन हेतुना बाधाऽसम्भवेन प्रतिक्षेपान्न वैयर्थ्यं हेतोः ॥६॥

३८२

§ १५. अथोक्तशून्यतावादिना भवतोक्ते शून्यताभावेऽशून्यतानिरपेक्षः शून्यताभावोऽपि न भवतीति सर्वे भावाः सस्वभावाः सिध्यन्तीति मतम्। उच्यते। यदि शून्यता नाम स्वरूपसिद्धं किञ्चित्स्यात् स्युर्भावाः सस्वभावाः। न त्वस्तीति प्रतिपादयन्नाह—

**अशून्येन विना शून्यं कुतः खलु भविष्यति।**
**कथं विनैवेतरेण प्रतिपक्षो भविष्यति ॥७॥**[२]

§ १६. यद्यशून्यं नाम कश्चिद्भावः स्यात् स्यात्तदा तत्प्रतिपक्षभूतं किञ्चिच्छून्यो भावः। अशून्यस्य तु सम्भव एव नास्ति। अहेतुकस्य कस्याप्याकाशकुसुमस्यैव सद्भावा सम्भवात्। यदा नाशून्यस्य सम्भवस्तदा प्रतिपक्षं शून्यमपीतरेणाशून्येन विना न सम्भवति। तथा हि। असन् कुक्कुरः कपेः प्रतिपक्षो न भवति। सर्वत्र हि विरुद्धमर्थान्तरमन्तरेण विरुद्धमर्थान्तरं न सम्भवति। तस्माद-

---

१. V. घटः प्रत्यक्षतो दृष्टः शून्य हेतु निरर्थकः।

२. V. अशून्येन विना शून्यसम्भवो जायते कथम्।
इतरेण विना तस्य सहायो जायते कथम् ॥

शून्येन विना शून्यं न भवति । तेन विना च शून्यं किञ्चिदस्तीति सिद्धम् । यथोक्तं

शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः ।।
येषां तु शून्यता दृष्टिस्तानसाध्यान् बभाषिरे ।।[१]

भगवताप्युक्तं[२]

§ १७. तद्यथापि नाम काश्यप कश्चिदेव पुरुषो ग्लानो भवेत् । तस्मै वैद्यो भैषज्यं दद्यात् । तस्य तद्भैषज्यं सर्वदोषा[३]नुच्चाल्यकोष्ठगतं न निर्गच्छेत् । तत्किं मन्यसे, कश्यप, अपि नु स ग्लानपुरुष[४]स्तस्माद् ग्लान्या परिमुक्तो भवेद्यस्य तद्भैषज्यं सर्वकोष्ठगतान् दोषानुच्चाल्य कोष्ठगतं न निःसरेत्[५] ? आह । नो भगवन्[६] । गाढ[७]तर च तस्य पुरुषस्य तद्ग्लान्यं भवेद्यस्य तद्भैषज्यं सर्वदोषानुच्चाल्य[८]कोष्ठगतं न निःसरेत् । भगवानाह । एवमेव काश्यप सर्वदृष्टिगतानां शून्यता निःसरणं यस्य खलु पुत्रः काश्यप शून्यतादृष्टिस्तमहमचिकित्स्यमिति वदामीति ।।६।।

३८३

§ १८. अत्राह । यद्यपि शून्यं नाम किञ्चिदपि नास्तीति नास्ति शून्यतापक्षस्तथाप्यपक्षोऽपि पक्षत्वेन परिगृहीत इति पक्ष एव भवति । विपक्षनिरपेक्षस्य पक्षस्याभावाच्च भवेद्विपक्षः । पक्षविपक्षयोः सद्भावाच्च सर्वे भावाः सिध्यन्ति । इदमपि न युज्यत इति प्रतिपादयन्नाह—

**अपक्षः पक्षरूपः स्यात्पक्ष एव भवेद्यदि ।**
**एवमभावेऽपक्षस्य को विपक्षो भविष्यति ।।८।।**[९]

§ १९. अपक्षः पक्षरूप स्यात्पक्ष एव भवेद्यदि । यद्यपक्ष एव स्यात् । तत्वेवं सति न सम्भवति । विपक्षाभावात् । विपक्षाभावाश्च सर्ववादिप्रत्याख्यानेन प्रदर्शितः । अपि च यदा । एवमभावेऽपक्षस्य को विपक्षो भविष्यति ।। पक्षाभावाद्विपक्षोऽपि नास्तीति त्यज्यतामाग्रहः ।।८।।

---

१. बोधिचर्यावतार, पृ० ४१४;
सुभाषित संग्रह, पृ० २५-२६
२. काश्यप परिवर्त, पृ० ९७.
३. T. सर्वरोगान्
४. I. ग्लानः
५. KP गतो
६. Kp. भगवान्
७. Kp. गाढतरश्च ।
८. Kp. स कोष्ठगतं
९. V. पक्षे सत्येव पक्षस्यापक्षो रूपं भविष्यति ।
असत्यपक्षे को नाम तद्विपक्षो भविष्यति ।।

३८४

§ २०. अत्राह। अस्त्येव भावानां स्वभावः। विशेषरूपोपलम्भात्। तथा हि—

अग्निरुष्णः कथं नु स्याद्यदि भावो न विद्यते।
उष्णोऽग्निरपि नास्तीति प्रागेव वारणं कृतम् ॥९॥[1]

§ २१. "अग्निरुष्णः कथं नु स्याद्यदि भावो न विद्यते।" तस्माद्विशेषोपलम्भादस्त्येव भावाना स्वभावः। उच्यते। इदमपि न युक्तम्। यतः

"उष्णोऽग्निरपि नास्तीति प्रागेव वारणं कृतम् ॥" उष्णस्वभावोऽग्निः प्राक्[2]

अग्निरेव भवत्युष्णमनुष्णं दृश्यते कथम्।
नास्ति तेनेन्धनं नाम तद्दतेऽग्निर्न विद्यते ॥[2]

इत्यत्र निवारितः। तस्माद्विशेषाभावान्नास्ति भावरूपम् ॥९॥

३८५

§ २२. अन्यच्च यदि।

भावदर्शनतो भावाभावो नाम निवार्यते।
एवं पक्षचतुष्कस्य को दृष्टो दोषवर्जितः ॥१०॥[3]

§ २३. भावदर्शनतो भावाभावो नाम निवार्यते यदि भावस्य सद्भावोलम्भात्तदभावनिवारणं युक्तमुपदर्श्यते भावस्याभावोपलम्भाद् भाववारणमपि किं न भवेत्। अनेनैव क्रमेण—

सदसत् सदसच्चेति सदसन्नेति च क्रमः।
एष प्रयोज्यो विद्वद्भिरेकत्वादिषु नित्यशः ॥

इति तत्रोक्तम्[4]। तस्मादेवं पक्षचतुष्टयेऽपि दोषदर्शनात् कस्यापि पक्षस्य परिग्रहो न युक्तः ॥१०॥

३८६

§ २४. इतोऽपि पक्षपरिग्रहो न युक्तः।

अणोरंशोऽस्ति नास्तीति विचारोऽत्रापि वर्तते।
तस्मात्साध्येन साध्यस्य सिद्धिर्नैवोपपद्यते ॥

---

१. ३४१. (१४.१६)
२. V. भाव एव यदा नास्ति वह्निरुष्णः कथं भवेत्।
उष्णोऽग्निरपि नास्तीति कस्य नाम विपर्ययः ॥
३. V. दृष्ट्वैव भावं भावस्याभावो नाम विपर्ययः।
दुष्टे पक्षतुरीयांशे प्रहाणं यस्य दृश्यते ॥
४. ३४६ (१४.२१)।

इति पूर्वमुक्तेः[१] । तस्मादनेन क्रमेण विचारेऽतिसूक्ष्मस्य ।

**यत्राणोरपि सद्भावो नास्ति तत्र कथं भवः ।**
**अभावोऽपि च बुद्धानां तस्मादेव न युज्यते ॥११॥[२]**

§ २५. "यत्राणोरपि सद्भावो नास्ति तत्र कथं भवः ।"

परमाणुमात्रस्यापि यत्र सत्यं स्वरूपं नास्ति तत्र कथं भव उत्पद्यते ? भावोत्पत्तिः सर्वथा नास्तीति तत्रानुत्पाद एव । निराभासगोचरकसर्वभाव तत्त्वयथावदवगमसूर्यकिरणनिकरापाकृताखिलाविद्यातिमराणां निविडाज्ञान-तिमिररात्रिनिद्राविपर्यस्तजगदुल्लासोद्बोधनतत्पराणां बोधौ सम्यगभिसम्बुद्धा-नाम् । "अभावोऽपि च बुद्धानां तस्मादेव न युज्यते ॥" तस्मादेव च तत्त्वज्ञानमपेक्ष्य कश्चिदपि भावो नोपलभ्यत इति [ यथा ] भाव एवमभावोऽपि नाभिमतः । अथवा स्वभावेनाजातत्वादभावोऽपि न सम्भवतीति । अभावोऽपि च बुद्धानां श्रावकप्रत्येकबुद्धानुत्तरसम्यक्सम्बुद्धानां नाभिमतः ॥ ११ ॥

३८७

§ २६. परिप्रेक्षयावश्यमयमद्वयवादः सर्वत्र प्राप्नोतीति निश्चेतव्यम् । तथा हि-

**सद्भावोऽन्यस्य कस्य स्यात् स्यात्सर्वमद्वयं यदि ।**
**तवापि यदि तद्युक्तं निन्दतोऽन्यः किमुच्यते ॥१२॥[३]**

§ २७. यत्राद्वयमद्वयवादस्तत्राप्राप्तस्य कस्य भावस्य भावस्वरूपं भवेत् । ये तावद्भावा नित्यास्तेषां स्वरूपेण सद्भावो नास्तीति सद्भावासद्भावकल्पना परीक्षितुं न शक्या । सद्भावासद्भावकल्पनाप्रवृत्तिहेतोर्नित्यस्य भावस्याभावात् । ये भावा उत्पत्तिमन्तस्तेषामपि नित्यं स्वरूपं नास्तीति स्वभावलक्षणप्रतिकूल-लक्षणानां स्वभावेन सद्भावासद्भावकल्पना व्यवस्थापयितुं न शक्यते । तस्मा-द्युक्तिगम्यत्वेन नीते स्फुटेऽर्थे वादिनः स्वबुद्धिविपर्यासकल्पितं द्वयवादं विहाया-द्वयवादमिमं स्वबुद्धौ स्थापयितुमर्हन्ति । अथ कयाप्युपपत्त्यायमर्थो न सिध्येत् । ननु च ये नास्माकमपि मनः प्रत्ययां भवेत्तदुच्यताम् । न तु काचिद्यथोक्तार्थ-विरुद्धोपपत्तिर्वक्तुं शक्यते । तस्मादुक्तोपपत्तित एव तवाप्यन्तद्वयप्रहाणे युक्ते किं वादान्तरेण ॥१२॥

---

१. ३०५ (१३-५)

२. V. यदणोरपि सद्भावस्ततोऽभाव कथं भवेत् ।
बुद्धानां जात्वभावोऽपि तस्मादेव प्रसज्यते ॥

३. V. सर्वस्य चेन्न द्वितीयः कस्यान्यः सन् भविष्यति ।
मतं चेद् भवतोऽप्येतद्विजितोऽन्यो भवेत् कथम् ॥

३८८

§ २८. यस्मात्स्वपरसमयपरिकल्पितानां लौकिकलोकोत्तराणां भावानाम-द्वयरूपमिहाविभक्तं तस्मादेव—

**अभावे सर्वभावानां विभागो नैव युज्यते।**
**सर्वद्रव्याणि यः पश्येत् स भवेन्न विभाजकः ॥१३॥**[1]

§ २९. हेतुप्रत्ययजातत्वात्स्वभावेन कृतकत्वप्राप्तेर्भावानां यः स्वभावः स निर्हेतुक एव। निर्हेतुकत्वे च सत्वं न सम्भवतीति भावविप्रतिषेधं प्रतीत्य भावस्याभाव एव स्वभावो भावस्याभावात्। तस्मादयं स्वभावः सर्वेषामभिन्न-रूप इति सर्वे भावाः स्वभावेनाजाता एकरूपा अद्भुताभावास्वभावरूपाः। यथा घटगृहक्षेत्रादिषु भिन्नेष्वपि सर्वत्र निरावरणत्वसामान्यादरूपमात्रमाकाशं भिन्न-स्वरूपं न भवति, यथा च भावा यथा त्वं सर्वे संस्कृता अनित्या एव, सर्वे साश्रवा दुःखा एवेत्यादि न भिन्नमेवं यः सर्वेषां द्रव्याणां दृष्टा [सो] पि द्रव्याणां भेदं व्यवस्थापयितुं न शक्नोति। अतएव—

भावस्यैकस्य यो द्रष्टा द्रष्टा सर्वस्य स स्मृतः।
एकस्य शून्यता यैव सैव सर्वस्य शून्यता ॥

इति पूर्वमुक्तम्[2]। अतएवोक्तं[3] भगवता

भावानभावानिति यः प्रजानाति
स सर्वभावेषु न जातु सज्जते।
यः सर्वभावेषु न जातु सज्जते
स आनिमित्तं स्पृशते समाधिम् ॥ इति १३ ॥

३८९

§ ३०. अन्यच्च। परकल्पनायाः पूर्वं त्यागेनापि यथोक्तोऽर्थो वाभ्युप-गन्तव्योऽनुयुक्तपरीक्षया परिहारो वा वक्तव्यः। अथ मन्यते—यस्य किञ्चिदपि सम्भवति युज्यते तस्य परिहारः। यस्य तु सर्वेषां भावानामभावस्तस्यवाच्य-वचनवक्तृणां प्रतिपाद्य-प्रतिपादकप्रतिपत्तृणां च सर्वथाभावात्कथं परिहारो वक्तव्यः। तस्मान्न परिहार उक्त इति। यद्येवं—

३८९

**नाभावात्परपक्षस्य परिहारः किलोच्यते।**
**साध्यते न स्वपक्षोऽपि निवर्त्यो हेतुना कुतः ॥१४॥**

---

१. V. अभावे सर्वभावानां विभागो नैव युज्यते।
भावेऽपि सर्वभावानां स विभागो न जायते ॥

२. १६१ (८, १६)    ३. M.V. पृ. १३३, २६१, २७७

§ ३१ यदि परस्य सर्वभावादपरिहारस्त्वया कयापि युक्त्या शून्यताहेतु-निराकृतस्तव स्वपक्षः किं न साध्यते । न चासिद्धिरभ्युपगन्तुं युज्यत इति नेदं भवति ॥ १४ ॥

३६०

§ ३२. यच्च ।

**सुलभो दूषको हेतुरिति लोकेऽभिधीयते ।**
**परपक्षस्य दोषः किं वक्तुमेव न शक्यते ॥१५॥**[1]

§ ३३. सुलभो दूषको हेतुरिति लोकेऽभिधीयते । तदपि न युक्तम् । यदि दूषको हेतुःस्यात्तदा सुलभत्वात्स तवाप्यस्तीति त्वयापि—

"परपक्षस्यदोषः किं वक्तुमेव न शक्यते ।"

त्वया परपक्षस्य दूषणमुद्भावयितुं न शक्यत इति दूषको हेतु र्न सुलभः ॥१५॥

३६१

§ ३४. अथ विनाप्युपपत्तिम्—

**एकेनास्तीतिमात्रेण भावाश्चेत्तत्वतो भवेत् ।**
**नास्तीतिमात्रेणैकेनाभावोऽपि न हि किं भवेत् ॥१६॥**[2]

§ ३५. यथा तवास्तीति वचनमात्रेणायं भावस्तत्वतोऽस्तीति स्थाप्यते एवं मम नास्तीति वचनमात्रेणापि परमार्थतो भावो नास्तीति किं न व्यवस्थाप्यते । तस्मादावयोर्वादिद्वयापाकारणात्कृत्रिमसर्वप्रपञ्चोऽद्वयवादोऽयं मध्ये समुच्छ्रितः॥१६॥

३६२

§ ३६. अत्राह । यदि परमार्थतो भावो न स्यात्तदेहासतः सदिति नाम न स्यात् । न ह्यसतो वन्ध्यापुत्रस्य सन्निति नामेह युज्यते । उच्यते ।

**सदिति यत्कृतं नाम तेनासन्नैव जायते ॥**
**सदिति यत्कृतं नाम तेनसन्नैव जायते ॥१७**[3]**॥**

---

१. V. यद् दुष्टोऽधिगतो हेतुरिति भाषापि लौकिकी ।
येन दोषोऽन्यपक्षस्य वक्तुमेव न शक्यते ॥

२. V. सन्नाममात्रेण यदा भावः कश्चिद् भविष्यति ।
अभावः किं न भवति सोऽप्यसन्नाममात्रतः ॥

V. B. अस्तीति मात्रेण यदि भावो विद्यत तत्वतः ।
नास्तीति मात्रेण कथमभावोऽपि भवेन्न हि ॥

अथवा चोनीग्रन्थाधारेण—

सन्नाममात्रेणैकेन स्याद्भावस्तत्वतो यदि ।
किं सन्नाममात्रेणैकेनाभावोऽपि नो भवेत् ॥

३. V. सदर्थो यन्न प्रथितस्तेनाभावो न जायते ।
अस्तीति यस्मान्न कृतं तेन भावो न जायते ॥

§ ३७. सदिति यत्कृतं नाम तेनासन्नैव जायते। अथैवम्

यन्नामासदिति कृतं तेन सन्नैव जायते।
नामानि नामिनो नैव स्वभावमनुकुर्वते॥

न हि तानि नामिनो भावस्य स्वरूपेण कालेन वा सम्प्रयुक्तानि पूर्वं पश्चाच्च तेषामभीष्टत्वात्। तथाहि। सुलोचने काण इति अल्पायुषि दीर्घायुरिति तस्करे देवरक्षित इत्यादीन्यर्थप्रतिकूलानि नामान्युपलभ्यन्ते। तस्मात्

"सदिति यत्कृतं नाम तेन सन्नैव जायते॥" एकधात्वन्यः पाठः "नैवासदिति यन्नाम कृतं तेन न सद्भवेत्।" यदि सतः सदिति नामकरणाद्भावः स्वभावेन सन्नैव कल्प्यते युक्त्या विचारेऽसत्त्वेनासतोऽसदिति नामकरणात् सत्वप्रतिषेधः किमिति न निश्चीयते। अस्य सद्भावकल्पनावदसद्भावोऽपि युक्तं प्रज्ञापयितुम्॥१७॥

३१३

§ ३८. अत्र केचिदाहुः। शब्दास्तावन्नार्थस्वरूपमभिदधति यद्यभिदध्युस्तदाग्निरुष्ण इत्युक्ते मुखप्रदाहो भवेत्। घट इत्युक्ते मुखं पूर्णं भवेत्। तस्मादस्माकमर्थस्वरूपास्पर्शिभिः शब्दैर्बाह्यवाचकेन लौकिकेन सङ्केतेन सर्वमस्तीत्युच्यते। अत्रोच्यते।

**कथितं लौकिकेनेति सर्वं चेल्लौकिकं भवेत्।**
**को भवेत्तत्त्वतो भावः स केन लौकिको भवेत्॥१८॥**[1]

§ ३९. यदि सद्वस्तुनः सस्वभावत्वस्वरूपास्पर्शिभिः शब्दैरभिधीयमानं लौकिकं तत्स्वरूपं भवेत् [तदा] तत [एव] स्वरूपेण सद्भावात्स परमार्थ एव भवेन्न तु लौकिकः। अथ तस्य लौकिकत्वमेवास्ति न स्वभावस्तदा तस्य लौकिकस्य परमार्थत्वमेव सिध्यति। परमार्थदर्शनाच्च योगिनः संसारान्मुच्येरन्निति युक्तम्॥१८॥

३१४

§ ४० अत्राह। यद्यपि त्वया सामान्यत उच्यते तथापि भावापाकरणात् तवाभाव एव भवति। उच्यते। नेदं वचनं मदाशयमतिक्रान्तम्। यदि मम भावप्रतिषेधादस्तित्वविरुद्धं नास्तित्वमभ्युपगम्यते तदा [वक्तव्यं न प्रतिषेधेन सर्ववाद निराकरणं साध्यते अभाववादस्यातिक्षुद्रैरभ्युपगमादिति प्रतिपादयन्नाह—

**अभावात्सर्वभावानामभाव एव चेद्भवेत्।**
**सत्येवं सर्वपक्षाणामभावो नैव युज्यते॥१९॥**[2]

---

१. V. उक्तत्वात् सर्वलोकेन लोको यदि भविष्यति।
तस्मादेव हि यो भावः स लोको जायते कथम्॥

२. V. असत्वात् सर्वभावानामभावो यदि विद्यते।
तथा च सर्वपक्षेषु भावोऽसन्नैव युज्यते॥

३६५

§ ४१. भावसद्भावे हि तत्र तन्निषेधादभाववादो भवेत्। यदा तु यथोक्तेन न्यायेन भाव एव न सम्भवति तदा—

**भावाभावादभावस्य सम्भवो न भविष्यति।**
**अभावो हि विना भावं कुतो सिद्धो भविष्यति ॥२०॥**[1]

§ ४२. भावाभावादभावस्य सम्भवो न भविष्यति। कुतो भावाभाव इति चेत्। अभावाभावात्। कुतोऽभावाभाव इति चेत्। एवम् "अभावो हि विना भावं कुतः सिद्धो भविष्यति।"

भावस्यान्यथालक्षणो विनाशो ह्यभाव इति लोक उच्यते। स च भना एकान्तेन विचारे नास्तीति कस्याभावादभावः सम्भविष्यति। यदाभावो न सम्भवति तदा भावप्रतीतिरभावमपेक्षत इति स नास्ति। अभावोऽपि न सिध्यति ॥२०॥

३६६

§ ४३. अत्राह। अहेतुकस्य भावस्यासिद्धेरवश्यं त्वया शून्यतासाधनाय हेतुः प्रदर्शयितव्यः। हेतुसद्भावाच्च न सर्वेषां भावानां शून्यता। हेतुवदन्येषामपि सद्भावात्। उच्यते। यदि—

**शून्यता जायते हेतो र्भवेत्तेन न शून्यता।**
**प्रतिज्ञा हेतुतो नान्या तेन हेतुर्न विद्यते।२१॥**[2]

§ ४४. हेतोः पूर्वं शून्यता न भवतीति। पश्चाद्भवतीति। शून्यतायाः कृतकत्वम्। कृतकं च मायागजप्रपञ्चवद्विसंवादकम्। शून्यता त्वक्षरसामान्यरूपेति न विसंवादकेति शून्यता न हेतुसाध्या। अथ ज्ञापकं हेतुमभिप्रेत्योक्तम्। तथापि हेतुर्न सम्भवति। कथमिति। इह हेतुरिति कस्याश्चित्प्रतिज्ञायाः साधकं वचनम्। यदि तस्याः प्रतिज्ञाया स हेतुस्ततोऽन्यः स्यात्। तथा सति पक्षधर्मो न भवतीति प्रतिज्ञातार्थानवगम इति हेतोः प्रतिज्ञाया अन्यत्वं न भवेत्। यदान्यो न भवति तदान्यत्वाभावात्प्रतिज्ञायाः स्वरूपवदयं हेतुर्न भवतीति हेतुर्न विद्यते। तस्मात्सिद्धं भावानां निःस्वभावत्वम् ॥२१॥

---

१. V. अभावत्वादभावस्य भवाऽस्तीति न विद्यते।
अभावत्वादसन्भाव इति सिद्धिर्भवेत् कथम् ॥

२. V. शून्यं प्रमाणतो जात-मतः शून्यं न विद्यते।
प्रतिज्ञान्या न प्रमाणाप्रमाणं तन्न विद्यते ॥

३६७

§ ४५. अत्राह। यद्यपि हेतोरभावाद्धेतुसाध्ययोर्नाशून्यता ननु च शून्यता दृष्टान्तस्तावदस्ति। तत्सद्भावाच्च तद्वदन्येषामपि भावानां भावो भवेत्। उच्यते। स चेत् दृष्टान्तः कल्प्यते हेत्वर्थेनासम्बद्ध एव कल्प्यते सम्बद्धो वा। यदि तावत्सम्बद्धः। हेतोर्दूषणेनैव निराकरणम्। अथासम्बद्धः। तदा तयोः प्रतिज्ञातार्थं सिद्ध्यसामर्थ्यादेव न किञ्चित्क्रियते। [ ततश्च ] किं तेन कल्पितेनेति प्रतिपादयन्नाह—

**यदस्ति शून्यदृष्टान्तस्तेन शून्यं न चेद्भवेत्।**
**आत्मापि काकवत्कृष्ण इति वक्तुं तु शक्यते ॥ २२ ॥**[1]

§ ४६. यदि हेत्वर्थासम्बद्धाद्दृष्टान्तादर्थसिद्धिर्मन्यते तदा काकस्य कृष्णदृष्टान्तेनात्मापि कृष्णो भवेत्। न चेदं सम्भवतीति न युज्यते दृष्टान्तो भावाभावात् ॥ २२ ॥

३६८

§ ४७. यदि हेतुरप्यभावे दृष्टान्तोऽपि नास्ति [तदा] सर्वेषामपि भावानामभावे तवेदं शास्त्रकारवचनं कस्यार्थस्य साधनाय। उच्यते। यदि नियमेन परीक्षायां कस्यचिद्भावस्य स्वभाव, उपलभ्येत [तदा] तादृश [एव] अभ्युपगमो भवेत्। शून्यतादृष्टिस्तु विपरीतैवेति प्रतिपादयन्नाह—

**को गुणः शून्यतादृष्ट्या स्याच्चेद्भावः स्वभावतः।**
**बन्धः कल्पनया दृष्टेः सैवेह प्रतिषिध्यते ॥२३॥**[2]

§ ४८. "को गुणो शून्यतादृष्ट्या स्याच्चेद्भावः स्वभावतः।" शून्यतोपदेशो हि तत्वप्रतिपादनाय। तत्त्वं च स्वभावः स्वरूपम्। यदि कस्यचिद् भावस्य सद्भावः स्यात्तदा तत्वं परामर्शो भवेदिति मोक्षप्रार्थिनस्तद्दर्शनमेव शोभनं न तु शून्यतादर्शनम्। स हि तदा न गुणो [ पि ] तु ] केवलमेवापवादप्रवृत्तत्वाद्दोष एव। यदा निःस्वभावानां भावानां विपर्यासेन सस्वभावत्वं दृश्यते तदा लोकस्याभिनिवेशहेतु र्भवति। भावाध्यवसायहेतुक कर्मक्लेशतोजन्मप्रबन्धोत्पादेन ततः संसारप्रवेशः। तदा निःस्वाभावानां भावानां निःस्वभावत्वप्रकाशकं शास्त्रमिदमारोपापवादप्रहाणद्वारा निःस्वभावत्वं दर्शयति। लोकोऽपि भावानां निःस्वभावत्वमभ्युपस्य प्रतिबिम्बनिर्माणमायादिष्विवभावाभिनिवेशे तद्धेतुककर्मक्लेशक्षयाद्रागादिसकलबन्धच्छेदेन विमुक्तो

---

१. V. यस्माच्छून्यस्य दृष्टान्तस्तेन शून्यं न जायते।
काको यथा तथात्मापि कृष्णो वक्तुं न शक्यते ॥

२. V. स्वभावतश्चेद्भावोऽस्ति शून्य दृष्ट्या हि को गुणः।
दृष्टो विबन्धो ज्ञानेन तदेवात्र निरुध्यते ॥

भवति । तस्माच्छास्त्रमिदं भावानां निर्मूलस्वभावत्वमात्रं दर्शयति ।

§ ४९. यथोक्तं भगवता शून्याः सर्वधर्मा निःस्वभावयोगेन । निर्निमित्ताः सर्वधर्मा अप्रणिधानयोगेन । प्रकृतिप्रभास्वराः सर्वधर्माः प्रज्ञापरिमितापरिशुध्येति ।।[१] एवं

यः प्रत्ययैर्जायति स ह्य जातो, न तस्य उत्पाद् सभावतोऽस्ति ।

यः प्रत्ययाधीन स शून्य उक्तो, यः शून्यतां जानति सोऽप्रमत्तः ।।[२] इति

अपि चेह प्रतीत्यसमुत्पादस्य नासम्भव इत्याह— बन्धः कल्पनया दृष्टः सैवेह प्रतिषिध्यते ।।

कल्पना ह्यभूतस्वभावमर्थमारोपयति । तेन सत्वानां बन्धमुपलभ्य संसार-दुःखच्छेदाय तमर्थं निवर्तयितुं महाकारुणिकाः सत्वदुःखदुःखितास्तथागता बोधिसत्वाश्च प्रतीत्यसमुत्पादाविरुद्धं भावानां निःस्वभावत्वमात्रं दर्शयन्ति । एवमिदं समासतो बुद्धवचनार्थ इत्याचार्येणानेन शास्त्रेण व्याख्यातम् ।।२३।।

३६६

§ ५०. ये तु यथावस्थित प्रवचनार्थस्य यथावदनवबोधेन किञ्चिद्भावं वास्तवरूपं कञ्चिच्चावास्तवं परिदीपयन्ति तेषां कल्पनां विपर्यासं च प्रतिपादयन्नाह—।

**एकं सदसदेकं च नेदं तत्त्वं न लौकिकम् ।**
**तेनेदं सदिदमसद्वक्तुमेव न शक्यते ।।२४।।**[३]

§ ५१. यदा लौकिको भावो वक्तुमिष्यते तदा बाह्याध्यात्मिकभेदेन स्कन्ध-पञ्चकमपि लौकिकीं कल्पनां प्रमाणं कृत्वाभ्युपगन्तव्यम् । यदा तु लोकोत्तरं तत्त्वं व्याख्यातुमिष्यते तदार्थज्ञानमपेक्ष्य स्कन्धपञ्चकमपि स्वभावशून्यं व्याख्येयम् । ततोऽन्यत्र यद्युक्तमिष्यते यच्च युक्तं नेष्यते वादिना [ तत् ] तत्त्वं लौकिकं वा नेष्यते । येनैतदेवं "तेनेदं सदिदमसद्वक्तुमेव न शक्यते ।।"

यदि चित्तचैतसिकानि स्युस्तदा घटपटादयोऽपि स्युः सकललोकप्रसिद्धेः । अथ ते घटपटादयो विचारे न स्युस्तदा चित्तचैतसिकान्यपि न स्युरुभयोरपि युक्तिविरहात् । एवं सतीदं सदिदमसदिति "वक्तुमेव न शक्यते" ।।२४।।

---

१. तुलनार्थम्—अष्टसाहस्त्रिका प्रज्ञापारमिता, पृ० ४०५,
MV. पृ० २३८, २७८, ४४४, ५०४

२. MV. पृ० २३९, ४९१, ५००, ५०४, BCp. पृ० ३५५, सुभाषित संग्रह, पृ० २१

३. V. सदेकमेकं नामास्तत्त्वं लोकोऽपि नैवयत् ।
तेनेदं सदसद्वेति वक्तुमेव न शक्यतं ।।

५००

§ ५२. अत्राह । यद्यपि मया तव परिहारः कर्तुं न शक्यते तथापि करिष्यन्ति के चित्तव परिहारम् । तद् भविष्यन्ति हि तथागतशासनेऽभियुक्ताः । उच्यते । मिथ्येयं तवाशा । तथा हि ।

**सदसत्सदसच्चेति यस्य पक्षो न विद्यते ।**
**उपालम्भश्चिरेणापि तस्य वक्तु न शक्यते ॥२५॥**[1]

**योगाचार चतुःशतके गुरुशिष्यविनिर्णयसन्दर्शनं षोडशं प्रकरणम् ॥१६॥**

§ ५३. सति हि पक्षपरिग्रहेऽन्यथासिद्धे महता कालेन चिरेण तस्य दूषणं सम्भवति । यस्य तु सदसदुभयपक्षप्रहाणेन पक्षपरिग्रह एव नास्ति तस्य सदसदुभयपक्ष प्रहाणाच्चिरेणापि दूषणं वक्तुं न शक्यते । आकाशस्य रूपवत्वं साम्प्रतं न सम्भवतीति चिरेणकालेन सम्भावयितुं न शक्यते । एवं वादिभिरपि तदाश्रयपक्षत्रयासम्भवाच्छून्यतावाददूषणं चिरेणापि वक्तुं न शक्यते । पण्डितैर्हि शून्यतावाददूषणमाकाशचित्राय: प्रतिमयोरिति वदवगन्तव्यम् ।

§ ५४ यथा नभसि सूर्यकिरणसमूहेन निरस्तैस्तिमिरैश्चिरेणापि कालेन स श्यामीकर्तुं न शक्यते एवं गम्भीरोदाराचिन्त्यप्रतीत्यसमुत्पादभावनावगमसूर्य-किरणेन सकलवादिसमयतिमिराणि निरस्यन्त इत्यवगन्तव्यम् । अपि चोच्यते । यथेहासहशः सूर्यश्चिरं महान्तं तिमिरसमूहमुन्मूलयनुन्मीलयत्येव जगदर्थकराद्वय-सूर्योऽपि सदसदादिसमयतिमिरमुन्मूलयति ।

**तार्किक समयतमोवृतबुद्धेजुरधुनेदमुन्मील्य ।**
**लब्धैः पुण्यैःपूर्णं पश्यतु तत्त्वंजनोऽत्र धीनेत्रः ॥२५॥**

आचार्यदेवपादीये बोधिसत्वयोगाचारे चतुःशतके गुरुशिष्यविनिर्णय-भावनासन्दर्शन नामकस्य षोडशप्रकरणस्य वृत्तिः ।

**चतुःशतकवृत्तिराचार्यचन्द्रकीर्तिपादकृता सम्पूर्णा**

---

१. M V. १६; सुभाषित संग्रह, पृ० २७

# प

# रि

# शि

# ष्टा

# नि

# परिशिष्टानि

## १. आर्यदेवस्य तन्नामनोपलब्धग्रन्थभागाः

### १. चतुःशतिका[1]

१.२१. शत्रुवत् यान्ति ते काला नियमेन क्षणादयः ।
सर्व्वथा तेन ते रागः शत्रुभूतेषु तेषु मा ॥२१॥

१.२२. विप्रयोगभयाद्गेहान्न निर्गच्छसि [ दुर्म्मते ] ।
[ विविच्य ] नाम कर्तव्यं कुर्म्याद्दण्डेन को बुधः ॥२२॥

२.७. शरीरं सुचिरेणापि सुखस्य स्वं न जायते ।
परेणाभिभवो नाम ,स्वभावस्य न युज्यते ॥३२॥

२.८. अग्र्याणां मानसं दुःखमितरेषां शरीरजम् ।
दुःखद्वयेन लोकोयमहन्यहनि हन्यते ॥३३॥

२.६. कल्पनायाः सुखं वश्यं वश्याद्दुःखस्य कल्पना ।
अतोस्ति किञ्चित् सर्व्वत्र न दुःखाद्वलमन्तरम् ॥३४॥

२.१०. कालो यथा यथा याति दुःखवृद्धिस्तथ तथा ।
तस्मात् कडेवरस्यास्य परवद्दृश्यते सुखम् ॥३५॥

२.११. व्याधयोऽन्ये च दृश्यन्ते यावन्तो दुःखहेतवः ।
तावन्तो न तु दृश्यन्ते नराणां सुखहेतवः ॥३६॥

२.१२. सुखस्य वर्द्धमानस्य यथा दृष्टो विपर्ययः ।
दुःखस्य वर्द्धमानस्य तथा नास्ति विपर्ययः ॥३७॥

३.२३. प्रतिनासिकया तुष्टिः स्याद्धीनाङ्गस्य कस्यचित् ।
रागोऽशुचिप्रतीकारे पुष्पादाविष्यते तथा ॥७३॥

---

१. डॉ० हरप्रसादशास्त्रीमहोदयेन प्रकाशितायाः चतुःशतिकायाः शेषकारिका-भागोऽयम् ।

३.२४. शुचि नाम न तद्युक्तं वैराग्यं यत्र जायते ।
न च सोऽस्ति क्वचिद्भावो नियमाद् रागकारणम् ॥७४॥

३.२५. अनित्यमशुभं दुःखमनात्मेति चतुष्टयम् ।
एकस्मिन्नेव सर्वाणि सम्भवन्ति समासतः ॥७५॥

४.१. अहं ममेति वा दर्पः सतः कस्य भवेद् भवे ।
यस्मात् सर्व्वेऽपि सामान्या विषयाः सर्व्व देहिनाम् ॥७६॥

४.२. गणदासस्य ते दर्पः षड्भागेन भृतस्य कः ।
जायतेऽधिकृते कार्य्यमायत्तं यत्र तत्र वा ॥७७॥

४.१४. ऋषीणां चेष्टितं सर्व्वं कुर्वीत न विचक्षणः ।
हीनमध्यविशिष्टत्वं यस्मात्तेष्वपि विद्यते ॥८६॥

४.१५. पुत्रवत् पालितो लोकः पुरतः पार्थिवैः शुभैः ।
मृगारण्यीकृतः सोऽद्य कलिधर्मसमाश्रितैः ॥९०॥

४.१६. छिद्रप्रहारिणः पापं यदि राज्ञो न विद्यते ।
अन्येषामपि चौराणां तत् प्रागेव न विद्यते ॥९१॥

४.१७. सर्व्वस्वस्य परित्यागो मद्यादिपु न पूजितः ।
आत्मनोऽपि परित्यागः किं मन्ये पूजितो रणे ॥९२॥

४.२३. विप्रोऽपि कर्म्मणा शूद्रः केन मन्ये न जायते ॥९८॥

४.२४. पापस्यैश्वर्य्यवद्राजन् संविभागो न विद्यते ।
विद्वान्नाम परस्यार्थे कः कुर्य्यादायतोवधं ॥९९॥

३.२५. दृष्ट्वा समान् विशिष्टांश्च परांश्छक्तिसमन्वितान् ।
ऐश्वार्यजनितो मानः सतां हृदि न तिष्ठति ॥१००॥

५.१. न चेष्टा किल बुद्धानामस्ति काचिदकारणा ।
निःश्वासोऽपि हितायैव प्राणिना संप्रवर्त्तते ॥१०१॥

---

## २. चित्तविशुद्धिप्रकरणम्[1]

(म) हायाने सुविस्पष्टमुक्तमेतत् सुविस्तरम् ॥६॥

धर्म्मपुद्गलनैरात्म्याच्चित्तमात्रं जगौ मुनिः ।
ततोऽपि सर्व्वमुत्पन्नं गमकं सुनिराकुलम् ॥७॥

भावग्रहप्रभावेण (प्रहाचेण) गृहीतान् प्रति चोदितम् ।
आगमेऽपि हि सुव्यक्तं विस्तरं करुणात्मना ॥८॥

मनःपूर्व्वङ्गमा धर्म्मा मनः श्रेष्ठं मनोजवाः ।
मनसा च प्रदुष्टेन भाषते वा करोति वा ॥९॥

स्वपिता भिक्षुणादिष्टः शीघ्रं गच्छति प्रेरितम् ।
आयुष्य च मृते तस्मिन्नानन्तर्य्येण गृह्यते ॥१०॥

स्वग्लानेनार्हतादिष्टः स्वगलं परिपीडितम् ।
उपस्थायकभिक्षुः स मृते तस्मिन्न दोषभाक् ॥११॥

अन्यसङ्गीनि चाल्यन्तु मारयन् दोषमश्नुते ।
इत्युक्तं विनये व्यक्तं न दोषोऽदुष्टचेतसाम् ॥१२॥

न स्तूपखलणे दोषस्तत् संस्कारधिया मतम् ।
केवलं पुण्यराशिः स्यादुखानन्तर्य्यकारिणाम् ॥१३॥

उपानयुगल दत्वामुने मूर्ध्नि शुभाशयात् ।
अपनीय तथा चान्यं राज्यं फलमवाप्नुतः ॥१४॥

तस्मादाशयमूला हि पापकर्म्मव्यवस्थितिः ।
इत्युक्तमागमे यस्मात् नापत्तिः शुभचेतसाम् ॥१५॥

स्वाधिदेवतयोगात्मा जगदर्थकृतोद्यमः ।
भुञ्जानो विषयान् योगान् मुच्यते न चलिष्यति ॥१६॥

यथैव विषतत्त्वज्ञो विषमालोक्य भक्षयन् ।
केवलं मुच्यते नासौ रोगमुक्तश्च जायते ॥१७॥

---

१. डॉ० हरप्रसाद शास्त्री महोदयेन (JASB, P. 175, 1898) प्रकाशितम् ।

मायामरीचिगन्धर्व्वनगरस्वप्नसन्निभम् ।
जगत् सर्व्वं समालोक्य किं कथं केन भुज्यते ॥१८॥

बाला मज्जन्ति रूपेषु वैराग्यं यान्ति मध्यमाः ।
स्वभावज्ञा विमोच्यन्ते रूपस्योत्तमबुद्धयः ॥२०॥[1]

विचिन्त्य समयं सर्व्वं देवतापूजनाविधिम् ।
शुद्धमालोक्य निःशङ्कं भोक्तव्यं मन्त्रचोदितम् ॥२१॥

शोध्य बोध्यं तथा दीप्यं अङ्कुरत्रययोगतः ।
अनामाङ्गुष्ठवक्त्राभ्यां प्रीणयेच्च तथागतान् ॥२२॥

यत् सत्यमिति बालानां तन्मिथ्या खलु योगिनाम् ।
कायेनैव तु सम्प्राप्तं न बद्धो न च मुच्यते ॥२३॥

संसारं चैव निर्व्वाणं मन्यन्ते तत्त्वदर्शिनः ।
न संसारं न निर्व्वाणं मन्यन्ते तत्त्वदर्शिनः ॥२४॥

विकल्पा हि महाग्राहः संसारोदधिपातकः ।
अविकल्पा महात्मानो मुच्यन्ते भवबन्धनात् ॥२५॥

शङ्काविषेण बाध्यन्ते विषेणैव पृथक्जनाः ।
तामेवोत्खाल्य निर्मूलं विचरेत् करुणात्मकः ॥२६॥

यथैवः स्फटिकः स्वच्छः पररागेण रज्यते ।
तथैव चित्तरत्नन्तु कल्पनारागरञ्जितम् ॥२७॥

प्रकृते कल्पनारागैं विविक्तं चित्तरत्नकम् ।
आदिशुद्धमनुत्पन्नं निजरूपमनाविलम् ॥२८॥

तत्तद्यत्नेन कर्त्तव्यं यद्यद्बालविगर्हितम ।
स्वाधिदैवतयोगेन चित्तनिर्मलकारिणा ॥२९॥

रागाग्निविषसंयुक्ता योगिनां शुद्धचेतसा ।
कामिताः खलु कामिन्याः काममोच्यफलावहाः ॥३०॥

यथा स्वगरुडं ध्यात्वा गारुडिको विषं पिवन् ।
करोति हि विषं साध्यं न विषेणाभिभूयते ॥३१॥

१. विंशतिमो श्लोको मूलप्रत्यां न विद्यते ।

द्वादशयोजनव्यासं चक्रं वै शिरसि भ्रमत् ।
बोधिचित्तमनुत्पाद्य आपनीलमिति श्रुतिः ॥३२॥

बोधिचित्तं समुत्पाद्य सम्बोधौ कृतचेतसा ।
तन्नास्ति यन्न कर्तव्यं जगदुद्धरणाशया ॥३३॥

आदिशुद्धमनुत्पन्नं निःस्वभावमनाविलम् ।
जगत् भावेन संपश्यत् न बद्धो न च मुच्यते ॥३४॥

विचिन्त्य विधिवद्योगी देवतागुणविस्तरम् ।
रागयेत् रागचित्तेन रज्यते न च मुच्यते ॥३५॥

किं कुर्मः कलया लभ्या विचित्रा भावशक्तयः ।
विषाज्जातो यथा कश्चिद्विषेणैव तु निर्विषः ॥३६॥

कर्णाज्जलं जलेनैव कण्टकेनैव कण्टकम् ।
रागेणैव तथारागमुद्धरन्ति मनीषिणः ॥३७॥

यथैव रजको वस्त्रं मलेनैव तु निर्मलम् ।
कुर्या द्विजस्तथात्मानं मलेनैव तु निर्मलम् ॥३८॥

यथा भवति संशुद्धो रजोनिघृष्टदर्पणः ।
सेवितस्तु तथाविज्ञैः दोषाद्दोषविनाशनः ॥३९॥

लोहपिण्डो जले क्षिप्तो मज्जत्येव तु केवलम् ।
पात्रीकृतं तदेवान्यं तारयेत् तरति स्वयम् ॥४०॥

तद्वत् पात्रीकृतं चित्तं प्रज्ञोपायविधानतः ।
भुञ्जानो मुच्यते कामं मोचयत्यपरानपि ॥४१॥

दुर्विज्ञैः सेवितः कामः कामो भवति बन्धनम् ।
स एव सेवितो विज्ञैः कामो मोक्षप्रसाधकः ॥४२॥

प्रसिद्धं सहसालोक्य क्षारं विषनाशनम् ।
तदेव फणिभिः पीतं सुतरां विषवर्द्धनम् ॥४३॥

जले क्षीरं यथाविष्टं हंसः पिबति पण्डितः ।
सविषान् विषयांस्तद्वद् भुक्तमुक्तश्च पण्डितः ॥४४॥

यथैव विधिवद्भुक्तं विषमप्यमृतायते ।
दुर्भुक्तं घृतपूरादि बालानान्तु विषायते ॥४५॥

इदमेव हि यच्चित्तं शोधितं हेतुभिः शुभैः।
निर्विकल्पं निरालम्बं भाति प्रकृति निर्मलम् ॥४६॥

यथा वह्निः कृशोऽप्येष तैलवृत्यादिसंस्कृतः।
दीपो निर्मलनिस्कम्प. स्थिरस्तिमिरनाशनः ॥४७॥

वटबीजं यथा सूक्ष्मं सहकारसमन्वित।
शाखामूलफलोपेतं महावृक्षविधायकं ॥४८॥

हरिद्राचूर्णसंयोगाद्वर्णान्तरमिति स्मृतं।
प्रज्ञोपाय समायोगाद् धर्मधातुं तथा विदुः ॥४९॥

घृतञ्च मधुसंयुक्तं समांसं विषतां व्रजेत्।
तदेव विधिवद् भुक्तमुत्कृष्टन्तु रसायनम् ॥५०॥

रसस्पृष्टं यथा ताम्र निर्दोषकाञ्चनं व्रजेत्।
ज्ञानवृद्धास्तथा क्लेशाः क्लेशाः कल्याणकारकः ॥५१॥

हीनयानाभिरूढानां मृत्युशङ्का पदे पदे।
सग्रामजयतुन्नेन (स्तु तेषां) दूर एव व्यवस्थितः ॥५२॥

महायानाभिरूढस्तु करुणाधर्मवर्मितः।
कृपानयधनुर्वाणो जगदुद्धारणाशयः ॥५३॥

महासत्त्वो महोपायः स्थिरबुद्धि रतन्द्रितः।
जित्वा दुस्तरसंग्रामं तारयन्त्यपरानपि ॥५४॥

पशवोऽपि हि क्लिश्यन्ते स्वार्थमात्रपरायणाः।
जगदर्थविधातारो धन्यास्ते विरलाः जनाः ॥५५॥

शीतवातादिदुःखानि सहन्ते स्वार्थलम्पटाः।
जगदर्थप्रवृत्तास्ते न सहन्ते कथं नु ते ॥५६॥

नारकाण्यपि दुःखानि सोढव्यानि कृपालुभिः।
शीतवातादिदुःखानि कस्तान्यपि विचारयेत् ॥५७॥

नानिष्टकल्पनां कुर्यान्नोपवासं न च क्रियाम्।
स्नानशौचं न चैवात्र ग्रामधर्मं विवर्जयेत् ॥५८॥

नखदन्तास्थिमज्जानः पितुः शुक्रविकारजाः।
मांसशोणितकेशादि मातृशोणित सम्भवम् ॥५९॥

इत्थमशुचिसम्भूतः पिण्डो ह्यशुचिपूरितः ।
कथं सन् तादृशः कायो गङ्गास्नानेन शुध्यति ॥६०॥

न ह्यशुचिघटस्तोयैः क्षालितोऽपि पुनः पुनः ।
तद्वदशुचि सम्पूर्णः पिण्डोऽपि न विशुध्यति ॥६१॥

प्रतरन्नपि गङ्गायां नैव श्वा शुद्धिमर्हति ।
तस्माद् धर्मधियां पुंसां तीर्थस्नानन्तु निष्फलम् ॥६२॥

धर्मो यदि भवेत् स्नानात् कैवर्तानां कृतार्थता ।
नक्तन्दिवं प्रविष्टानां मत्स्यादीनान्तु का कथा ॥६३॥

पापक्षयोऽपि स्नानेन नैव स्यादिति निश्चयः ।
यतो रागादिबुद्धिस्तु दृश्यते तीर्थ सेविनाम् ॥६४॥

रागो द्वेषश्च मोहश्च ईर्ष्या तृष्णा च सर्वदा ।
पापानां मूलमाख्यातं नैषां स्नानेन शोधनम् ॥६५॥

आत्मात्मीयग्रहादेते सम्भवन्तीह जन्मिनाम् ।
अविद्याहेतुकः सोऽपि अविद्या भ्रान्तिरिष्यते ॥६६॥

रौप्यबुद्धिर्यथा शुक्तौ शुक्तिदृष्टे निवर्तते ।
नैरात्म्यदर्शनात् सापि निर्मूलमवसीदति ॥६७॥

सर्पबुद्धिर्यथा रज्जौ रज्जुदृष्टे निवर्तते ।
सर्पबुद्धिः पुनस्तत्र नैव स्यादिह जन्मनि ॥६८॥

सत्यबुद्धिस्तथाऽत्रापि वज्रज्ञानान्निवर्तते ।
न भूयः सम्भवेत्तत्र दग्धबीज इवाङ्कुरः ॥६९॥

नैरात्म्यशुचिसंसृष्टः पिण्डः प्रकृति निर्मलः ।
तस्य सन्तापनं धर्मः कथं बालै विकल्पितः ॥७०॥

चन्द्रोदयव्ययञ्चापि अपक्षतिथिकल्पना ।
सूर्योदयव्ययेनापि दिवारात्रिव्यवस्थितिः ॥७१॥

पूर्वादिव्यवहाराख्यः शब्दत्रयविकल्पना ।
वारनक्षत्रराश्यादि सर्वलोका विकल्पितम् ॥७२॥

शीतोष्णवर्षणापेक्षं तथैव ऋतुकल्पना ।
स्वकर्मफलभोगोऽयं शुभाशुभशुभग्रहादितः ॥७३॥

अविद्याकर्दमालिप्तं चित्तचिन्तामणिः पुमान् ।
प्रवृत्तः क्षालितुं विद्वान् कोऽविद्यां बृहयेत्पुनः ॥७४॥

न वारतिथिनक्षत्रदेशकालाद्यपेक्षणात् ।
विहरन्निर्विकल्पस्तु निर्निमित्तमशङ्कितः ॥७५॥

यद्यदिन्द्रियमार्गत्वं यायत्तत्तत् स्वभावतः ।
सुसमाहितयोगेन सर्वबुद्धमयं वहेत् ॥७६॥

चक्षुर्विरोचनो बुद्धः श्रवणो वज्रशून्यकः ।
घ्राणश्च परमाद्यस्तु पद्मनर्तेश्वरो मुखम् ॥७७॥

कायः श्रीहेरुको राजा वज्रसत्वश्च मानसम् ।
एवं सम्यक् यदा योगी विचरेत् करुणात्मकः ॥७८॥

सिद्धान्तो निर्विकल्पोऽसौ स्थिरकल्पस्तु धीधनः ।
यथेष्टचेष्टाव्याहारी सर्वभुक् सर्वकृत्तथा ॥७९॥

सर्वकामक्रियाकारी यथारुचिरचेष्टितम् ।
उत्थितो वा निषण्णो वा चंक्रमो वा स्वयन्तथा ॥८०॥

अमण्डलप्रविष्टो वा सर्वावरणवानपि ।
स्वाधिदैवतयोगात्मा मन्दपुण्योऽपि सिद्ध्यति ॥८१॥

अनेन सर्वसौख्यिवं सर्वबुद्धत्वमेव च ।
जन्मनोहैव तत्त्वज्ञः संप्राप्नोति न संशयः ॥८२॥

यथा प्राकृतको लोको योगिलोकेन वाध्यते ।
बाध्यन्ते धीविशेषेण योगिनोऽप्युत्तरोत्तरैः ॥८३॥

महाप्रज्ञा महोपाया महाकृपाविमोक्षतः ।
महायानसमुद्दिष्टं महासत्त्वस्य गोचरम् ॥८४॥

यत्कल्पनामसङ्ख्यायै न प्राप्तं बहुभिर्मतैः ।
जन्मन्यत्रैव बुद्धत्वं प्राप्यते न च संशयः ॥८५॥

महायानस्य माहात्म्यात् पुण्यज्ञानस्य सम्भवः ।
सर्वज्ञत्वपदं रम्यं सद्यो जन्मनि लभ्यते ॥८६॥

आगमश्रुतिचिन्ता तु महायाने तु गृह्यते ।
आशयानुणया भेदाद्यानभेदः प्रकाश्यते ॥८७॥

अन्यत्र बोधिमोक्षोऽयमन्यथा बोधिचारिका ।
अन्या चित्तविशुद्धिश्च फलमन्यदिहेष्यते ॥८८॥

समीपं निर्मलादर्शे चिरं निर्मलचक्षुषः ।
यथा भाति सुविस्पष्टं स्वच्छप्रकृति निर्मलम् ॥८९॥

विधूतकल्पनाजालं चिस्पष्टशुद्धचेतसा ।
योगिनाञ्च तथा ज्ञानं प्रज्ञानिर्मलदर्पणैः ॥९०॥

सूर्यकान्तसमाश्लिष्टसूर्यकान्तमणौ यथा ।
सहसा प्रज्वलत्यग्निः समर्थः स्वार्थसाधने ॥९१॥

अपास्तकल्पनाजालं सूर्यकान्ता निभं मनः ।
प्रज्ञासूर्यांशुसंश्लिष्टं तद्वज्ज्वलति योगिनाम् ॥९२॥

काष्ठद्वयनिघर्षेण यथाज्वलति पावकः ।
आदिमध्यान्तसंशुद्धः स वै वस्तुप्रसाधकः ॥९३॥

प्रज्ञोपायसमायोगाद्योगाद् ज्ञानं तथा विदुः ।
यथैवैकप्रदीपोऽयं वर्त्यन्तर समाश्रितः ॥९४॥

यथा स्थानं यथा स्वार्थं करोत्युच्चैः प्रकाशनम् ।
नानाधिमुक्तिसत्वानां यथाकृत्यमनुष्ठयेत् ॥९५ ॥

निर्दोषं शीतलं हृद्यं सर्वव्याधिविनाशनम् ॥
प्रज्ञाक्षीरमहोपाय त्रिरत्नमथनोत्थितम् ॥९६॥

स्फुरणानन्तमूर्तिस्तु प्रज्ञोपायविभावनैः ।
विधिज्ञा हि यथा कश्चित् क्षीरादमृतमुद्धरेत् ॥९७॥

विशुद्धधर्मधातुः स शुभाशुभ विनाशनः ।
यथा लतासमुद्भूतं फलपुष्पसमन्वितम् ॥९८॥

यथैकक्षणसंबोधिः संभारद्वयसयुता ।
... ... ... ... ... घर्षणाकर्षणादिकम् ।;९९॥

मद्यमासरतो योगी कुर्वनप्युपलभ्यते ॥
.. ... ... ... ...मादर्शः समीक्ष्यते ॥१००॥

महायाने यतोऽद्यापि मन्त्रसामर्थ्यदर्शनात् ।
मातृदुहि तृ सम्बन्ध ... ... ... ... ... ...॥१०१॥

... ... ... ... ...जगदाह तथागतः ।
पञ्च बुद्धात्मकं शुक्रं शोणितञ्चापि तादृशम् ॥१०२॥

तन्मयः खलु पिण्डोऽयं को विप्रः कश्च वान्त्यजः ।
— — — — सर्वं शरीरं खलु भिक्षवः ॥१०३॥

अनित्यं दुःख शून्यञ्च न जाति र्न च जातिवान् ।
कैवर्तीगर्भसम्भूतः कश्चिच्च ... ... ... ... ॥१०४॥

चित्तं यथा सुखं ध्यायन् सम्बुद्धोऽयमनागतः ।
सर्वकामोपभोगोऽस्तु रमथ मुक्ततोऽभयात् ॥११२॥

मा भैष्ठा नास्ति वः पापं समयो दुरतिक्रम; ।
मन्त्रसंस्कृत काष्ठादि देवत्वमधिगच्छति ॥११३॥

किं पुनः ज्ञानवान् कायः कार्यमोह विचेष्टितम् ।
प्राकृततत्वमहङ्कारं परित्यज्य समाहितः ॥११४॥

प्रज्ञोपायविधानेन क्रियामिमाङ्गमाचरेत् ।
पङ्कजातं यथा पद्मं पङ्कदोषै र्न लिप्यते ॥११५॥

विकल्पवासनादोषैस्तथा योगी न लिप्यते ।
अनादिवासना पङ्कं विलिप्तं चित्तरत्नकम् ॥११६॥

प्रज्ञोपायजलेनैव ... ... ... ... ...।
स्वाधिदैवतयोगस्य स्थिरचित्तस्य धीमतः ॥११७॥

मुक्तः कुदृष्टिमेघैश्च भासते चित्तभास्करः ।
... ... ... ... ... सहसा कल्पनाघटे ॥११८॥

प्रकृत्या निर्मलः स्वच्छो ज्ञानदीपः प्रकाशते ।
सुप्रसिद्धानि भूतानि क्षित्यग्निजलवायवः ॥११९॥

क्रियन्ते ह्यन्यथा विज्ञै मन्त्रसामर्थ्ययोगतः ।
सर्ववादपरित्यज्य ... ...... ... समाचरेत् ॥१२०॥

यस्य मन्त्रस्य सामर्थ्य सूक्ष्मदेवोऽपि सिद्ध्यति ।
स्त्रीरत्नं न परित्याज्यं बोधिचित्तं न तथा गुरुम् ॥१२१॥

न ह्यात्मा प्राणिनः केऽपि समयानप्यधिष्ठयेत् ।
महारत्नं सकर्पूरं रक्तचन्दनयोजितम् ॥१२२॥

अलिवज्रादिकश्चैव पश्चैतानप्यधिष्ठयेत् ।
अन्यैश्च समयैर्द्रव्यैश्चित्तस्योत्कर्षकारकैः ॥१२३॥

मारुतक्षोभशान्त्यर्थं प्रीणयेच्चित्तवज्रिणम् ।
मक्षिकापदमात्रेण विषेणाप्यभि भूयते ॥१२४॥

अणुमात्रां घृणां लज्जां दूरतः परिवर्जयेत् ।
आन्तरलिकभावस्तु व्यर्थो वै पतनं यथा ॥१२५॥

गुरो राज्ञाश्चमुद्राश्च छायामपि न लङ्घयेत् ।
गुणास्तस्य परं ग्राह्यं दोषा नैव कदाचन ॥१२६॥

म्यथुद्धं (?) वाचां विज्ञाः स्वपरायतनमेव वा ।
आचार्यः परमो देवः पूजनीयः प्रयत्नतः ॥
स्वयं वज्रधरो राजा साक्षाद्रूपेण संस्थितः ॥१२७॥

यथोदकमणिः सम्य् कलुषोदकशोषकः ।
सद्धर्माणस्तथा प्रोक्ताश्चित्तरत्नविशोधकः ॥१२८॥

शर्घावान् पूज्यते क्वापि प्रज्ञाचक्षुविर्वर्जितः ।
उत्पादयेदतः प्रज्ञामागमाधिगर्मात्मिकाम् ॥१२९॥

श्राद्धो बहुश्रुतः प्राज्ञो प्रकृत्या करुणात्मकः ।
जगद्दुखविनाशाय सुखोपायं स विन्दति ॥१३०॥

चित्तविशुद्धिमाधाय यन्मयोपार्जितं शुभं ।
चित्त विशुद्धिमाधाय तेनास्तु सुखिनो जनाः ॥१३१॥

इति कृतिरियमार्यदेवपादानामिति

स्वपरार्थहेतुका स्वात्रहरितन्त्रे ति शुभं मये लिखितम् ।
यथात्मानः प्रियः प्राणाः सर्वेषां प्राणिनान्तथा ॥

---

# ३. हस्तवालप्रकरणवृत्तिः[१]

मञ्जुश्रिये ज्ञानसत्त्वाय नमः

त्रैलोक्ये व्यवहारमात्रे सति परमार्थाभिमानात् तत्त्वार्थानवगाहिभिः सत्त्वैर्वस्तुस्वभावविवेकद्वारेणाविपर्ययज्ञानसंप्राप्तये शास्त्ररचनेयं ।

१. रज्जौ सर्पमनस्कारो रज्जुं दृष्ट्वा निरर्थकः ।
तदंशान् वीक्ष्य तत्रापि भ्रान्ता बुद्धिरहाविव ।।६।।

२. सर्वाण्याश्रितवस्तूनि स्वरूपे सुविचारिते ।
आश्रितान्यन्यतो यावत् संवृतिज्ञानगोचरः ।।२४।।

३. निरंशानामचिन्त्यत्वादन्त्योऽप्यवस्तुना समः ।
भ्रान्तमात्रमतः प्राज्ञैः नं चिन्त्यं परमार्थतः ।।४५।।

४. भ्रान्तं तदप्य सम्यक्त्वाद् यथा भानं तथास्ति न ।
अनर्थकं भासमानं तत्सदृशात्मकं भवेत् ।।

५. सर्वमेवाश्रितं येन विद्यते सूक्ष्मबुद्धिना ।
त्यजेत् स बुद्धिमान् सुष्ठुरागाद्यहिभयं यथा ।।

६. लौकिकार्थविचारेषु लोकसिद्धिमनुव्रजेत् ।
क्लेशान् सर्वांस त्यक्तुमना यतेत परमार्थतः ।।

---

१. डा० टाससमहोदयेन (J.R.A.S, p. 267, 1918) प्रकाशिता

# चतुःशतकस्य हिन्दी भाषायां भावानुवादः

## ७—विषय सम्भोगाभिनिवेशप्रहाणोपायसन्दर्शन ।

१. आर्यदेव ने इस प्रकरण में कर्मों के विनाश का उपाय बताया है । इस दुःख रूपी अथाह समुद्र का सर्वथा अन्त नहीं होता । इस प्रकार विचार वाले इस अज्ञानी प्राणी का संसार से भय उत्पन्न क्यों नहीं होता !

२. यौवनादि से उन्मत्त यह प्राणी संसार से भयभीत नहीं होता । यौवन बारंबार उत्पन्न होता रहता है । इसलिए इस लोक में स्थिति भी गलितस्पर्धा के समान दिखाई देती है ।

३. गमन स्वेच्छया नहीं होता । कौन बुद्धिमान् व्यक्ति परतन्त्रता में रहता हुआ भी निर्भीक होता है ?

४. अतीत काल में जिस प्रकार तुम अज्ञानी बने रहे, अनागत मे भी वैसी ही अज्ञानता न रहे, ऐसा प्रयत्न करना चाहिए ।

५. श्रोता, श्रोतव्य और वक्ता इन तीनो का उद्भव अत्यन्त दुर्लभ है । अतः संक्षेपतः संसार न अनन्तवान् है और न अन्तवान् है ।

६. मानव प्रायः असत्पक्ष को ग्रहण कर लेते हैं । फलतः वे दुर्गति प्राप्त करते हैं ।

७. इस भूतलपर पाप के फल की विडम्बना देखी जाती है । अतः सज्जनों के लिए यह संसार श्मशान के समान प्रतीत होता है ।

८. विज्ञान के अनवस्थित होने से चित्तवृत्ति जब चंचल व अस्थिर हो जाती है तब पण्डित उसे उन्मत्त कहने लगते हैं ।

९. जिस प्रकार गमनादि से उत्पन्न होने वाला रोग चंक्रमण आदि को छोड़ देने से दूर हो जाता है, उसी प्रकार बुद्धिमान् व्यक्ति सर्वकर्मक्षय के लिए प्रयत्न करता है ।

१०. इस संसार में जब जगत्प्रवृत्ति का एक भी भौतिक अथवा चैतसिक कार्य का आदिकारण दिखाई नहीं देता तब एक भी कार्य का अन्त्यहीन अति विस्तार देखकर किस व्यक्ति को इस संसार से भय नहीं होगा ?

११. समस्त कार्यों की सिद्धि निश्चित रूप से नहीं होती। उनका विनाश अवश्य होता है। जिस वस्तु का शीघ्र विनाश होता है उसके प्रति आसक्ति क्यों ?

१२. कार्य के समान कर्म का विगलन भी अवश्य होता है। अतः विद्वान को कर्म के प्रति विरागभाव होना चाहिए। वैराग्य का अभाव जड़ता का प्रदर्शन है।

१३. निरुद्ध होने के कारण अतीत विज्ञान का सुख नहीं और स्थिति का अभाव होने से अनागत का सुख नही। इस प्रकार सुख न होने से सुख प्राप्ति की लालसा में यह कर्मोपार्जन रूप श्रम किसके लिए है ? यह मात्र आयास है।

१४. यद्यपि कर्मोपार्जन मात्र आयास है तथापि स्वर्ग सुख की प्राप्ति के लिए कुशल कर्म अवश्य करना चाहिए। वस्तुतः मोहमयी होने से स्वर्ग भी नरक के समान भयङ्कर है अतः सज्जन उसे छोड़ देते हैं।

१५. अज्ञानी यदि संसार के स्वरूप पर विचार करने मे समर्थ हो जायें तो वे तत्काल ही मुक्ति प्राप्त कर सकते हैं।

१६. शक्ति सम्पन्न व्यक्ति मानी होता है और मन से निर्दयता आती है। फलतः ऐश्वर्य में उसे सुखाभास होता है। यही उसके अधःपतन का कारण है।

१७. यद्यपि इस प्रकार पापाचरण से अभिमानी व्यक्ति की दुर्गति और निरभिमानी व्यक्ति की सद्गति होती है। फिर भी संसार ऐकान्तिक दृष्टि से गर्हित [ नही ] है।

१८. पूर्वकृत कर्मो का फल ऐश्वर्यप्राप्ति है और उसे रक्षणीय भी माना जाता है। परन्तु आत्मीय न होने के कारण विद्वान द्वारा वह अस्थेय नहीं।

१९. कन्यादान, पोषण आदि को धर्म मान लिया जाता है अतः देश-काल के भेद से धर्म से भी बलवान लोक परम्परा दिखाई देती है।

२०. पंचकामगुणात्मक विषय कुशल कर्म से प्राप्त होते हैं परन्तु मोक्षेच्छुकों के लिए अनर्थमूलक व रागादि के कारण भूत के विषय हेय हैं।

२१. आज्ञा रूप रसास्वादन के लिए राज्याधिपत्य रूप पुण्य कार्य करना चाहिए, ऐसा सोचना भी व्यर्थ है। बिना इसके भी सिद्धि निश्चित रूप से अनायास ही प्राप्त हो जाती है।

२२. अनागत काल मे ऐश्वर्य प्राप्ति की कामना से यह प्राणी कुशल कर्म करता है। परन्तु उसके बाद उत्पन्न दुर्गति अत्यन्त अनिष्ट होती है। अतः

फल और धर्म में राग का अभाव ही परिनिर्वाण की प्राप्ति में मूल कारण होता है।

२३. मृतक के समान यह प्राणी भी फल की आशा से दानादि क्रियाओं में प्रवृत्त होता है। परन्तु संसार का कारणभूत होने से उसकी ऐसी प्रवृत्ति नहीं होनी चाहिए।

२४. जो संसार को कारण पूर्वक उत्पन्न होने से यन्त्र मायादि के समान स्वभाव रहित अभाव रूप देखते हैं वे निर्वाण पद प्राप्त करते हैं।

२५. अतएव विषयराग अज्ञानियों के लिए संसार का कारण है। धर्म स्वभाव से सुपरिचित होने के कारण जिन्हें न संसार से अनुराग है और न अनुकूल होने पर भी दिव्य व मानवीय विषयों में आसक्ति है उन्हें जन्म, जरा, व्याधि आदि में अभिरति असम्भव है। संसार में उनकी अनुरक्ति सर्वथा अनुपयुक्त है।

## ८—शिष्यचर्या

१. जिस प्रकार प्रतिकूल व्यक्तियों में स्नेह भाव चिरकाल तक नहीं ठहरता उसी प्रकार सभी वस्तुओं का दोषज्ञान हो जाने पर रागभाव बहुत समय तक नहीं ठहरता।

२. एक ही पदार्थ में एक व्यक्ति आसक्त रहता है, दूसरा द्वेष करता है और तीसरा उसी में मोहित होता है। इसलिए रागभाव का कोई स्वरूप न होने से यह आसक्ति निरर्थक है।

३. कल्पना के बिना रागादि भावों का अस्तित्व नहीं होता। यदि पदार्थ का वास्तविक अस्तित्व होता तो कल्पना की क्या अपेक्षा थी?

४. किसी का किसी के साथ बन्धन नहीं देखा जाता। यदि बन्धन दूसरे के साथ वस्तुत: होता तो उसका विप्रयोग नहीं होना चाहिए। अतः रागादिक भाव स्वभावत: शून्यात्मक हैं।

५. संसार मे प्राणी प्राय: दुखी इसलिए दिखाई देते है कि उन अल्प पुण्यात्मक लोगो को इसके विषय मे कोई सन्देह उत्पन्न नही हुआ। यदि मात्र सन्देह उत्पन्न हो जाता तो संसार से उनकी मुक्ति हो जाती।

६. मोक्ष पर्यन्त जिस शून्यता स्वरूप धर्म की वृद्धि भगवान तथागत ने कही है उसमे जिसकी भक्ति नही, वह निश्चयेन बुद्धिमान् नही है।

७. अशून्य संसार के विषय मे यदि शून्यता के उपदेश से निर्वाण की प्राप्ति हो तो मिथ्यादर्शन ज्ञान से ही निर्वाण मिलने लगेगा। परन्तु तथागत मिथ्यादर्शन ज्ञान से तो मुक्ति मानते नही। मुक्ति तो उन्होंने सम्यग्दर्शन (सम्मादिट्ठि) से बताई है।

८. जहाँ लौकिकी देशना है वहा प्रवृत्ति का उपदेश है और जहाँ परमार्थ कथा है वहाँ निवृत्ति का उपदेश है।

९. मैं क्या करूं, समस्त जगत असत् है, ऐसा भय तुम्हें उत्पन्न हो जाता है। यदि प्रवृत्यात्मक कर्तव्य मानो तो यह धर्म निवर्तक नही, प्रवर्तक ही होगा।

१०. आर्यदेव का कहना है कि तुम्हें स्वपक्ष मे तो राग है और परपक्ष मे द्वेष है। अत: निर्वाण प्राप्ति नही हो सकेगी क्योंकि द्वन्दचारी निर्वाण नही पाते।

११. समस्त क्रियाओ मे व्यापार शून्य पुरुष निश्चित ही बिना किसी प्रयत्न के निर्वाण लाभ करता है और कुशल अकुशल आदि प्रवृत्तियो द्वारा सासारिक सुख व पुनर्जन्म प्राप्त करता है। इनमे विद्वान व्यक्ति निर्वाण प्राप्त करने का ही प्रयत्न करेगा, पुनर्जन्म का नही।

१२. जिसके चित्त मे ससार से उद्वेग नही, निर्वाण मे उसकी भक्ति कैसे संभव है! उसे इस ससार से निकलना अपने प्रासाद से निकलना जैसा दुष्कर है।

१३. दुःख से प्रपीड़ित कुछ लोग ऐसे भी देखे जाते है जो मृत्यु प्राप्ति की आकाक्षा रखते है। वे निर्वाण की ओर इसलिए नही जाते कि उन्हें सासारिक विषयो से मोह है।

१४. भगवान् बुद्ध हीन शिष्य के लिए दान, मध्य शिष्य के लिए शील और उत्तम शिष्य के लिए शान्ति का उपदेश देते थे। उनका यह भी कहना था कि सदैव शान्ति प्राप्त करो।

१५. बुद्ध शासन से क्रमशः सभी का त्याग करना आवश्यक बताया गया है। सर्वप्रथम अपुण्य ( पाप ) को दूर करना, बाद में आत्मवाद छोड़ना और तदनन्तर स्कन्ध, धातु, आयतन आदि में स्नेह भी छोड़ देना, परित्याग के इस क्रम को जो जानता है वह बुद्धिमान है।

१६. एक पदार्थ को समुचित रूप से जानने वाला समस्त पदार्थों को पूर्णतः जान लेता है। एक वस्तु में शून्यता का ज्ञान सभी वस्तुओं की शून्यता का ज्ञान कराने में सक्षम है।

१७. तथागतों ने स्वर्गादिक सुखों की प्राप्ति के लिए धर्म में राग करना बताया है और मोक्षेच्छुकों के लिए उसी धर्म की निन्दा की है।

१८. पुण्य की इच्छा से शून्यता का उपदेश कभी नहीं करना चाहिए क्योंकि औषधि का भी यदि अस्थान में प्रयोग किया जाय तो वह विष बन जाती है।

१९. अतएव जिस प्रकार म्लेच्छ अपनी ही भाषा में समझ सकता है उसी प्रकार लौकिक जन को भी पहले वस्तुधर्म आदि का ज्ञान कराकर ही शून्यता का उपदेश दिया जा सकता है।

२०. इसलिए तथागत संसारियों की स्थिति ( शक्ति ) देखकर उपाय-कौशल से किसी को सत्, किसी को असत्, किसी को सत् असत्, और किसी को न सत् न असत् का उपदेश देते हैं। यह ठीक ही है क्योंकि रोगग्रस्त होने पर औषधियाँ स्थिति को देखकर ही दी जाती है।

२१. सम्यग्ज्ञान ( सम्यग्दृष्टि ) द्वारा मुक्ति प्राप्त होती है। कुछ कम दृष्टि-ज्ञान होने पर शुभ गति मिलती है। इसलिए विद्वानों को अध्यात्म विचार में सदैव बुद्धि लगानी चाहिए।

२२. तत्वज्ञ यदि इस जन्म में निर्वाण प्राप्त नहीं कर पाता तो कर्मफल के समान पुनर्जन्म में वह बिना किसी प्रयत्न के मोक्ष प्राप्त कर लेगा।

२३. केवल चिन्ता करने से ही कार्य सिद्धि नहीं होती और न निर्वाण मिलता है। इसीलिए तो मुक्त कम ही दिखाई देते हैं।

२४. शरीर की निर्गुणता ( विनाशशीलता ) पर विचार करने से उसमें क्षण भर भी राग ( मोह ) नहीं ठहरता। इसी विराग भाव से मुक्ति प्राप्त हो जाती है।

२५. जिस प्रकार हेतु परम्परा से प्राप्त अनादिमान बीज का अन्त दाहादि द्वारा देखा जाता है, पर आदि नहीं। उसी प्रकार जन्म के कारणों के नष्ट होने से जन्म परम्परा नष्ट हो जायगी।

## ९–नित्यार्थ प्रतिषेधभावनासन्दर्शन

१. समस्त संस्कृत पदार्थ कार्य के लिए उत्पन्न हुए हैं। अतः वे नित्य नही है। बुद्ध इस अनित्य और शून्यता रूप उपदेश से ही तथागत हुए है। विपरीत तत्त्वोपदेश से यथावस्थित तत्त्वार्थो का ज्ञान न होने के कारण और दूसरा कोई तथागत नहीं है।

२. किसी भी वस्तु का कही पर कभी भी कारण के बिना अस्तित्व नही होता इसलिये कही पर कोई भी पदार्थ कभी भी शाश्वत नही है।

३. पदार्थ निर्हेतुक नही होता और जिसका कारण होना है वह पदार्थ नित्य नही होता। अतएव अकारण से सिद्धि नही होती, ऐसा तत्ववेत्ता तथागत ने कहा है।

४. अनित्य एवं कृतक ( कृत्रिम ) घट, मुखादिक का देखकर अकृत्रिम आत्मादि को यदि नित्य माना जाय तो कृत्रिम पदार्थ की अस्तित्व प्रतीति से अकृत्रिम पदार्थ मे नास्तित्व की सिद्धि क्यो न मानी जाय ?

५. पृथग्जन ( मूर्ख ) आकाशादि को कल्पान्त नित्य मानते है। परन्तु विद्वज्जन लौकिक दृष्टि से भी आकाशादिको मे कोई पदार्थ नही देखते। अतः रूप का अभाव मात्र ही आकाश है इसके अतिरिक्त वह और कुछ नही।

६. आकाश नित्य ही है व्यापक होने से यह तर्क भी संगत नहीं क्योंकि आकाश के सभी अवयव सर्वत्र व्याप्त नहीं होते। यदि सर्वत्र व्यापक है तो प्रदेश का सद्भाव नहीं रहेगा। प्रदेश के अभाव में प्रदेशी का भी अभाव हो जायगा। इस दोष को दूर करने को दृष्टि से यह मान्य है कि एक प्रदेशी में सभी प्रदेश नहीं रहते। यह सुस्पष्ट है। अन्य प्रदेश भो प्रदेश में समझना चाहिए। अतएव असर्वगत प्रदेश के समान प्रदेशी आकाश का घट के समान विभुत्व (व्यापकता) नष्ट हो जाता है।

७. कालवादी यह मानते हैं कि संसार की उत्पत्ति और लय का कारण होने से काल का सद्भाव अनुमित है। बीजादि कारणों के होने पर भी अङ्रादि की उत्पत्ति सदैव नहीं होती। इस विचार के खण्डन में आर्यदेव ने कहा है कि जिसके रहने पर अङ्कुरादि की प्रवृत्ति ( उत्पत्ति ) और न रहने पर निवृत्ति (विनाश) होती है यह कार्य किसी दूसरे के आश्रित रहता है। इस प्रकार कार्यभूत अङ्कुरादि के समान काल अनित्य ही है।

८. कालवादी की दृष्टि में बीजादि कारण ही जगत की प्रवृत्ति में फल रूप में परिणत हो जाता है। आर्यदेव का तर्क इसके खण्डन में यह है कि यदि हेतुओं में फल के बिना हेतुता ही नहीं तो उस स्थिति में सभी हेतुओं में फल वत्ता प्रसक्त हो जावेगी। परन्तु ऐसा सम्भव नहीं। अग्नि से जले बीज में अङ्कुर (फल) नहीं होता। अत: काल फलात्मक हेतु नहीं माना जा सकता।

९. कारण रूप काल ही विकृत रूप धारण करता हुआ यदि अन्य इस विचित्र जगत का कारण है तो काल को कार्योत्पादन के पूर्व अपनी नियत पूर्वावस्था को छोड़ना पड़ेगा। तब काल की उस विकृत अवस्था के होने पर काल को शाश्वत कैसे कहा जा सकता है ?

१०. फल के उत्पन्न होने पर भी काल में कोई विकार नही होता। इस लिए काल से उत्पन्न होने वाला फल बिना विकार के ही उत्पन्न होता है। अर्थात् हेतु प्रत्यय की अपेक्षा किये बिना ही स्वयमेव उत्पन्न होता है। तात्पर्य यह है कि विकृत बीज से ही अङ्कुरादि उत्पन्न होता है, पर काल का विकृत रूप अङ्कुरादि है यह कथन बुद्धिसंगत नहीं। जगत स्वत: सिद्ध है। उसकी सिद्धि के लिए काल को कारण मानने की आवश्यकता नही।

११. कभी भी नित्य पदार्थ से अनित्य पदार्थ की उत्पत्ति नहीं होती। अत: नित्यकाल रूप कारण से अनित्य जगत रूप फल की उत्पत्ति कैसे सिद्ध हो सकती है ? अत: काल नित्य नहीं।

१२. परमाणुवादियों के अनुसार पृथ्वी आदि परमाणु जो नित्य और अदृश्य है उनसे द्व्यणुक, द्व्यणुक से त्र्यणुक इत्यादि क्रम से अवयवि द्रव्यों की आरम्भिक क्रियाओं से यह विचित्र जगत उत्पन्न होता है, परन्तु यह उनकी मान्यता ठीक नही। जिस परमाणु का कोई अवयव हेतु होगा, उसी का दूसरा अवयव अहेतु भी होगा। इस प्रकार वह भिन्न भिन्न हो जावेगा। परंतु शाश्वत वस्तु का अनेक प्रकार का होना युक्तियुक्त नहीं।

१३. यदि परमाणु सर्वात्मना दूसरे परमाणु से युक्त है, प्रदेश से नहीं, तो हेतु है। हेतुभूत एक परमाणु का दूसरे परमाणु में सर्वात्मना संयोग मानने से परमाणु के अणु परिमाण का कार्य द्व्यणुका द्व्यणु में भी संयोग मानने का प्रसंग आयगा। अखिल विश्व परमाणु मात्र होने से अदृश्य (अतीन्द्रिय) हो जायगा! पर संसार दृश्य है। अतः परमाणु का परमाणु में सर्वात्मना योग नहीं मानना चाहिए।

१४. यदि एक परमाणु का दूसरे परमाणु से योग न माना जाय तो एक परमाणु का जो स्थान है, वही दूसरे परमाणु का नहीं हो सकता। हेतु और फल दोनों का समान स्थान नही माना जाता। अतः परमाणु में प्रदेश व नानात्व है। फलतः वह नित्य नही।

१५. परमाणु का परमाणु से जो संयोग होता है वह किसी एक अंश में होता है। वह अंश उसका अवयव हुआ और पूर्व का अंश अवयवी हुआ। इस स्थिति में उसे अणु नहीं कहा जा सकता। अतः परमाणु भी घटादि की तरह अनित्य है।

१६. यदि परमाणु को निरवय माना जाय तो उसमें गति नहीं होसकती। उसे गन्ता ( गमन करने वाला ) नही कहा जा सकता। गति न होन से एक परमाणु का दूसरे परमाणु स संयोग भी नही होगा। संयोग न होने से घटादि कार्य की उत्पत्ति नहीं हो सकेगी। अतः परमाणु द्रव्य नही, अनित्य है।

१७. जिस परमाणु का न आद्यंश है, न मध्यमांश है, और न अन्त्यांश है। वह अव्यक्त (अदृश्य) परमाणु किसको दृष्टि में आ सकता है? अर्थात् योगी आदि कोई भी व्यक्ति उसे नहीं देख सकता।

१८. परमाणु सृष्टि निमित्तक है और नित्य है यह कथन भी ठीक नहीं अङ्कुर रूप फल से बीज रूप हेतु का नाश हो जाता है। अतः हेतु रूपसे परमाणु

नित्य नहीं हो सकता। जिस फल रूप कार्य में हेतु विद्यमान हो तो उससे फल रूप कार्य विद्यमान नहीं रह सकता। अतः उस फल में एक साथ हेतु के विद्यमान न होने से बीजादि की तरह परमाणु भी नित्य नहीं है और न जगत की उत्पत्ति का कारण है।

१९. किसी भी अन्य पदार्थ में संश्लिष्ट रहने वाला पदार्थ शाश्वत नहीं दिखाई देता। अतः वैशेषिक दर्शन के समान बौद्ध दर्शन में भी परमाणु का नित्यत्व मान्य नही। इस प्रकार परमाणु की उत्पत्ति स्थिति और निरोध न क्रमशः होते हैं। और न युगपद्।

२०. उपाय, बन्धन और बन्ध्य इन तीनों से यदि मोक्ष भिन्न हो तो उससे कुछ भी नहीं होगा और फलतः उसे मोक्ष नहीं कहा जा सकता।

२१. निर्वाण में स्कन्ध नहीं होते। पुद्गल की भी उत्पत्ति नहीं होती। जहाँ निर्वाण दिखाई नहीं देता, वहाँ निर्वाण से तात्पर्य क्या। अतएव निर्वाण न आधारभूत है और न आधेयभूत। निराधार के आधेय के अभाव से निर्वाण कैसा! अतएव पदार्थ नित्य नहीं है।

२२. सांख्यों के अनुसार मुक्त व्यक्ति की मोक्षावस्था में ज्ञान का अस्तित्व रहता है। आर्यदेव ने इसका खण्डन करते हुए कहा है कि भवहीन व्यक्ति के लिए ज्ञान के सद्भाव का कोई लाभ नहीं। क्योंकि उसके हेतुफलात्मक सारे विकार समूह प्रशान्त हो चुके। यदि मोक्ष काल में अज्ञान माने तो ज्ञान के सद्भाव मे अभिन्न स्वभाव वाले पुरुष की अज्ञानकल्पना बन्ध्यापुत्र की तरह स्पष्टतः अस्तित्वहीन होगी।

२३. यदि मोक्षावस्था में आत्मा का अस्तित्व स्वीकारा जाय तो आत्मा के रहने से आत्माश्रित ज्ञान-शक्ति का भी अस्तित्व स्वीकार करना पड़ेगा। और ज्ञान शक्ति ज्ञान अस्तित्व स्वरूप है। अतः आत्मा के अभाव में ज्ञानशक्ति निराश्रित हो जाती है और फलतः भव-भावना भी निवृत्त हो जाती है।

२४. दुःख से विमुक्त पुरुषों में निश्चय रूप से अन्य कुछ भी नही रह जाता। आत्मा का जो क्षय है, वही श्रेयस्कर है, मुक्त आत्मा नहीं। यदि मोक्ष में भी आत्मा का अस्तित्व माना जाय तो वह नित्य और अविकारी भी है। ऐसा मानने पर बन्ध, मोक्षावस्था, संसार निवृत्ति ये सभी असंगत हो जावेंगे। यदि बन्ध-मोक्ष के लिए विकारी आत्मा को स्वीकारें तो विकारी होंने से अनित्यतापत्ति हो जायगी। अतः मुक्तावस्था में आत्मवाद अयुक्त है।

२५. संसार के दुःखों से उद्विग्न व्यक्ति के लिए दुःख त्याग ही उचित

है, सर्वाभाव नहीं। सर्वाभाव होने पर सुख का भी अभाव हो जानेसे अपना कुछ भी उपकार नहीं किया जा सकेगा। अतः लौकिक पदार्थ ही अच्छा है। लौकिक में तो कुछ रहता है, परन्तु परमार्थ में कुछ नहीं।

# १०—आत्मप्रतिषेध भावनासन्दर्शन

२२६. आत्मा नामक कोई पदार्थ स्वरूपतः नही है। यदि है तो वह नियमतः स्त्री रूप है अथवा पुरुष रूप है अथवा नपुंसक रूप। तीर्थकों ने आत्मा दो प्रकार का माना है—अन्तरात्मा और बहिरात्मा। अन्तरात्मा जब न स्त्री है न पुरुष और न नपुंसक है तो अज्ञान से ही मैं पुरुष हूँ ऐसी प्रतीत होती है।१।

२२७. जब समस्त भूतों में स्त्री, पुमान् व नपुंसक लिङ्ग नहीं है तो उन्हीं से उत्पन्न होने वाले स्त्री, पुमान् व नपुंसक क्यों होते है ? ।।२।।

२२८. जो तुम्हारा आत्मा है वह मेरा आत्मा नही। अतएव आत्मा नियमतः नहीं। अहङ्कार और आत्मस्नेह स्वभावतः नहीं प्रत्युत आत्मा में कल्पनामूलक हैं। ईन्धन में अग्नि की कल्पना के समान आत्मा की कल्पना अभूतार्थ का आरोपण मात्र है। अतः अनित्य पदार्थों में ही आत्मा की परिकल्पना होती है।।३।।

२२९. प्रवृत्ति-निवृत्ति का कारण होने से तथा शुभाशुभ कर्मों का कर्ता और भोक्ता होने से आत्मा का अस्तित्व स्वभावतः है यह कहना भी ठीक नहीं। प्रश्न है यह आत्मा जन्मान्तर परिवर्तन में दैहिक भेद के विकारों को दूर करता है अथवा नहीं ? यदि दूर नहीं करता है तो आत्मा की कल्पना निरर्थक है और

यदि दूर करता है तो देह के विकारों का अनुविधायक होने के कारण देह के एक देश के समान यह आत्मा देह से न भिन्न है और न नित्य है। अतएव आत्माध्यारोप अयुक्त है ॥४॥

२३०. दैहिक चेष्टा, संकोच, प्रसारण आदि का प्रेरक होने से भी आत्मा का अस्तित्व नहीं माना जा सकता, क्योंकि स्पर्शरहित कोई भी पदार्थ प्रेरक नहीं हो सकता। अप्रदेशाभाव से यह आत्मा स्पर्शवान् नहीं। अप्रदेशी होने से उसका संयोग भी नहीं और संयोग से विरहित वस्तु की प्रेरणा नहीं होती। अतएव दैहिक चेष्टा आदि का कर्त्ता होने से भी आत्मा के अस्तित्व को स्वीकार करना संगत नही ॥५॥

२३१. यदि आत्मा को नित्य माना जाय तो लोक में अहिंसा को धर्म मानने का क्या प्रयोजन! घुण से वज्र की रक्षा किसी भी तरह संभव नहीं ॥६॥

२३२. जातिस्मरण के सद्भाव से आत्मा यदि नित्य है तो जात्यन्तरों में हुए आघातों को देखकर तुम्हारा काय अनित्य क्यों है ॥७॥

२३३. यदि यह आत्मा जातिस्मरण स्वभाव से करता है तो भी ठीक नहीं क्योंकि कल्पना करना उसका स्वभाव नहीं। यदि सचित्त आत्मा के ज्ञातृत्व गुण उत्पन्न होता है तो सचित्त के चित्त नही होगा और पुरुष (आत्मा) नित्य नहीं होगा ॥८॥

२३४. यह आत्मा सत्व रूप से चेतना को प्राप्त होता है तथा सुख दुःखादिमान् होने से पूर्व स्वरूप को विनष्ट कर विशेष विशेष स्वरूप को प्राप्त करता है। इसलिए सुखादि के समान आत्मा की नित्यता भी युक्त नही ॥९॥

२३५. यदि आत्मा चैतन्य स्वरूप और नित्य है तो नेत्रादि ज्ञान के कारण (साधन) इन्द्रियां निरर्थक हो जावेंगी। अग्नि यदि नित्य है तो ईन्धन व्यर्थ हो जायगा। पर यह होता नही। अतः आत्मा चैतन्य स्वरूप और नित्य नहीं ॥१०॥

२३६. जैसे वृक्षादिक चलन क्रिया के प्रारम्भ से पूर्व की अवस्था से द्रव्य रूप से विद्यमान है वैसे आत्मा नहीं। क्योंकि आत्मा चैतन्य रूप मात्र होने से चैतन्य शक्ति से पृथक् है नहीं और द्रव्य रूप के अभाव से चैतन्य रहित होने पर भी उसका अस्तित्व है, ऐसी कल्पना की नहीं जा सकती। अतएव आत्मा है परन्तु चैतन्य नही, ऐसा मानना युक्ति संगत नहीं। और जो चैतन्य शक्ति के सद्भाव से आत्मा के अस्तित्व की कल्पना की जाती है वह भी युक्त नहीं। क्योंकि निराधार शक्ति का सद्भाव नहीं होता ॥११॥

२३७. यदि पुरुष (आत्मा) चैतन्य व्यक्ति के पूर्व चैतन्य शक्ति रूप हो तो चेतना धातु पृथक् देखी जाती है और चेतना पृथक् देखी जाती है। लोहे के द्रवत्व के समान पुरुष विकार भाव को प्राप्त हो जाता है ।।१२।।

